आर.एन.आई. सं.58951/94 ISSN 0975 - 0061

# आरण्यकम्

अर्धवार्षिकी सन्दर्भिता संस्कृतशोधपत्रिका

**(Bi-annual Refereed Sanskrit Research Journal)**

विश्वविद्यालयानुदानायोगस्य ( UGC ) यत्नसूच्याम् ( Carelist ) अन्तर्भुक्ता

**संस्कृतप्रसारपरिषद्**

**आरा (विहारः)**

नवविंशं वर्षम्-द्वितीयोऽङ्कः

सितम्बर 2021

# 'आरण्यक'स्य नियमाः

1. संस्कृतप्रसारपरिषद्, आरा-पक्षत इदं षाण्मासिकी शोधपत्रिका संस्कृतेन चैत्र-आश्विनमासयोः (मार्च-सितम्बर) प्रकाश्यते। वर्षारम्भः चैत्रात् (मार्च तः)मन्यते।
2. ग्राहकत्वं पूर्णवर्षस्यैव स्वीक्रियते। मध्येवर्षं ग्राहकत्वं काङ्क्षतः पूर्णवर्षस्य शुल्कम-पेक्ष्यते। तादृशाय ग्राहकाय वर्षस्य पूर्वप्रकाशितोऽङ्क उपलब्धौ सत्यां प्रेषयिष्यते।
3. वार्षिकं शुल्कम् एकशतं (100) रूप्यकाणि। एकस्याङ्कस्य शुल्कम् पञ्चाशत् (50) रूप्यकाणि।
4. आजीवनं ग्राहकताशुल्कं द्विसहस्रं (2000) रूप्यकाणि।
5. शुल्कप्रेषणस्योपायाः-

   **(i) NEFT Banking**

   Bank - Indian Bank, Ara (Bihar)
   IFSC - IDIB000A047
   Name - Sanskrit Prasara Parishad
   Acc. No. - 552203784
   शुल्कं संप्रेष्य तस्य सन्देशसूचना (Message) अत्र देया-
   डॉ. नीलमणि पाठकः, दूरभाषः 9431451895,
   Email-nilmanipathak19@gmail.com

   **( ii ) बैंक ड्राफ्ट 'संस्कृतप्रसारपरिषद्'** इति नाम्ना
   आरा (बिहार) नगरे व्यवहरणीयम्।
   **ड्राफ्ट प्रोषणस्थलम् -** डॉ. नीलमणि पाठकः, गणपति ज्वेलर्स के पीछे, महावीर स्थान, मौलाबाग, आरा (विहार)-802301
6. आरण्यकस्य बेबसाईट-**www.aranyakam.in**
7. विमर्शात्मका अनुसन्धानात्मकाश्च शास्त्रीया अप्रकाशितपूर्वा उच्चस्तरीया गम्भीराश्च मौलिका निबन्धाः प्रकाशनाय गृह्यन्ते।
8. काव्य-नाटक-चरित्रवर्णन-व्यङ्ग्य-हास्यसम्बद्धा नव्या रचना अत्र स्थानं न लभन्ते।
9. प्रकाशनाय प्रेषिताः सर्वविधा रचनाः शुद्धा एकस्मिन् पत्रपृष्ठे सुस्पष्टाक्षरैः लिखिताः टङ्किता वा स्युः। रचनाऽन्ते रचयितुः आवाससङ्केतः पदनिर्देशः ई-मेल संकेतः, दूरभाषसंख्या च उल्लिखिस्युः ताः।
10. प्रकाशितसंस्कृतकाव्यनाटकाऽऽलोचनादिग्रन्थानां समीक्षार्थं सम्बद्धग्रन्थस्य प्रतिकृतिद्वयं सम्पादकं प्रति प्रेषणीयम्।
11. लेखकेभ्यः तत्प्रकाशितलेखानां पञ्च प्रतिरूपाण्यपि दीयन्ते।
12. लेखानां प्रकाशनस्य सम्पादनस्य च सर्वाधिकारः सम्पादकाधीनः।
13. 'आरण्यक'सम्बद्धा सर्वविधा जिज्ञासा **प्रो. गोपबन्धु मिश्रः, कुलपतिः, श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम् ( गुजरात )-362266 इति सङ्केतेन** (चलः) 09450870788 विधेया।
    Email-gopabandhuh@gmail.com
14. शोधलेखसम्प्रेषणं तत्सम्बद्धपत्रव्यवहारश्च
    Email-**aranyakam94**@gmail.com इति सङ्केतेन विधातव्यः।

# आरण्यकम्

**संस्कृतप्रसारपरिषदः अर्धवार्षिकी सन्दर्भिता संस्कृतशोधपत्रिका**

**विश्वविद्यालयानुदानायोगस्य ( UGC ) यत्नसूच्याम् ( Carelist ) अन्तर्भुक्ता**


**वर्षाङ्कौ - नवविंशं वर्षम् - द्वितीयोऽङ्कः**

**आश्विनः, वि.सं. २०७८**

**सितम्बर २०२१**


**प्रतिवर्षं प्रकाशनकालः**
**चैत्रः, आश्विनः - विक्रमाब्दः**
**मार्च, सितम्बर**

*प्रत्यङ्कम् - 50 रूप्यकाणि*
*संयुक्ताङ्कः - 100 रूप्यकाणि*

*वार्षिकं शुल्कं 100 रूप्यकाणि*

**परामर्शदात्री समितिः**
डॉ. हरिहर झा, दरभङ्गा
डॉ. उमाशङ्कर शर्मा 'ऋषिः', पटना
डॉ. भागीरथ त्रिपाठी 'वागीशः शास्त्री', वाराणसी
डॉ. राय अश्विनी कुमारः, बोधगया

❁

संस्थापकः
**स्व. पण्डित व्रजभूषण मिश्र 'आक्रान्तः'**

❁

सम्पादकः
**प्रो.गोपबन्धु मिश्रः**
कुलपतिः
श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वेरावलम् (गुजरात)
gopabandhuh@gmail.com

❁

सह-सम्पादकौ
**डॉ. सञ्जय कुमार चौबे**
sanjaychaubey.lbs@gmail.com
**डॉ. सुनीलकुमार प्रधानः**
sunilkumarp435@gmail.com

❁

प्रकाशिका
**संस्कृतप्रसारपरिषद्**
रामेश्वरलीलासदनम्
महावीरस्थानम्
मौलाबाग, आरा (विहारः) 802301

❁

संस्कृतप्रसारपरिषद्, आरा पक्षतः प्रो. गोपबन्धु मिश्रेण, दी महावीर प्रेस, बी.20/44, भेलूपुर, वाराणसी इत्याख्ये मुद्रणालये मुद्रितं प्रकाशितं च।

**प्रो. गोपबन्धु मिश्रः**
सम्पादकः

# सम्पादकीयम्

भगवतः श्रीरामस्य दुःखस्य तोषस्य च हेतू निरूपयन् आदिकविः वाल्मीकिराह–

**व्यसनेषु मनुष्याणां भृशं भवति दुःखितः।**
**उत्सवेषु च सर्वेषु पितेव परितुष्यति॥** रामायणम्,अयो.2/10

उत्तरकाले सुभाषितविशेषे मित्रतालक्षणमपि एवंभूतम् उपपादितम्–

**उत्सवे व्यसने चैव दुर्भिक्षे शत्रुविग्रहे।**
**राजद्वारे श्मशाने च यस्तिष्ठति स बान्धवः॥** इति।।

तत्र उत्सवे सन्तुष्ट्या किं च व्यसने दुःखिततया उपस्थितिः मित्रतायाः कृते अभीप्सिता वृत्तिरिति स्पष्टमेव। उभयोः उद्धरणयोर्मध्ये केवलं कालगतोऽथवा ग्रन्थगतो भेदो न, अपि तु तत्र मौलिको भेदः कश्चिदन्यः एव। श्रीरामस्य तादृशदुःखसुखानुभूतिः सहजा अनायासा चासीत्, किन्तु सुभाषितमिदं बन्धुतायाः लक्षणे तथा आचरितुम् उपदिशदिव प्रवर्तते। यद्यपि स्वरूपलक्षणतया एतत् सहजधर्मतया परिगणयितुं शक्यते तथापि तटस्थलक्षणत्वेन एतदर्थम् अस्माभिः प्रयत्नो विधेयः इति कश्चित् मन्त्रोऽपि पाठ्यत एव। सद्यः प्रवृत्ते (इदानीमपि न्यूनतायां सत्यामपि प्रवर्तमाने एव) कोरोना-महामारीप्रसङ्गे एतस्य बन्धुतालक्षणस्य लक्ष्यस्थलेषु अव्याप्तिः अतिव्याप्तिर्वा परिलक्षितैव। कोरोनाभीतिकारणेन (कदाचित् कुत्रचित् अर्थलोलुपताद्यनिष्टकारणेनापि) मित्राणां कोरोनाजन्यव्यसनप्रसङ्गे श्मशाने कोरोनाजन्यमृतशरीरदाहप्रसङ्गे च निर्ममता बहुशः दृष्टा दृश्यमाना च। विविधेषु उत्सवेषु परितुष्टान्यपि मित्राणि अपेक्षितकालेऽस्मिन् व्यसनावधौ तत्तन्मित्रसङ्गतिस्तु त्यक्तैव, कदाचित् तद्व्याधिपीडापीडितवृत्तमात्रं श्रुत्वा तेन सह तत्परिजनैर्वा सह दूरभाषादिसम्पर्कोऽपि विच्छेदितः। प्रतिदिनं साक्षात् मेलनाटनसम्भाषणादिभिः सह येन साकं स्वाभाविकः सन्तोषप्रदः सम्बन्धः आसीत्, कोरोनाग्रासिते तस्मिन् कदाचित् तेन कारणेन परलोकं गते वा तस्मिन् स्वद्वारं पिधाय दूरादेव आत्मरक्षोपायमाचरितवन्तो वयमिति दशाविशेषैः परमेश्वरेण सर्वे वयं परीक्षिताः परीक्ष्यमाणाश्च स्मः एव।

साम्प्रतिके काले कोरोनाकारणेन भौतिकरीत्या साक्षात् विद्वत्सम्मेलनशोधसंगोष्ठी-कार्यशालादीनां समायोजने काठिन्ये आपतिते आभासीयरीत्या अन्तर्जालमाध्यमेन विविधाः सम्मेलन-संगोष्ठ्यादयः समायोज्यमानाः सन्ति। तत्र दूरस्थिताः अपि विद्वांसः

स्वस्वविषयानाश्रित्य व्याख्यान-शोधलेखोपस्थापनादीनि कर्माणि साधयन्तः सन्तीति नवीनं व्यापकतरम् अत्यल्पव्ययेन अथवा अव्ययेन साध्यं शैक्षणिकं संशोधनात्मकं कार्यं वर्धमानमस्तीति प्रसन्नतायाः अयं विषयः। प्रसङ्गेऽस्मिन् द्विधा विशिष्टा प्रवृत्तिरपेक्ष्यते। पूर्वं यथा सम्मेलनसंगोष्ठ्यादीनाम् अनन्तरं तत्तदवसरपठितानां चितानां शोधलेखानां सम्पादनपूर्वकं संकलनं प्रकाश्यमानं भवति स्म, तथा अत्रापि आभासीयरीत्या सम्पन्नेषु शोधसंगोष्ठ्यादिषु उपस्थापितानां शोधलेखानां संग्रहः सम्पादनं प्रकाशनं च तत्तदायोजकैः करणीयमिति भाति, अन्यथा कार्यक्रमाणाम् एतेषां बाहुल्येऽपि वास्तविकरीत्या क्रियमाणानि संशोधनकार्याणि पुरतः दृश्यमानानि उपलभ्यमानानि वा न स्युः। द्वितीयम्, एतेषु संगोष्ठ्यादिषु भाषागतं विषयगतं च प्रामाण्यं यथा न्यूनतां न गच्छेत् तदर्थम् आयोजकैः सावधानैः भवितव्यम्। याथातथ्येन उपस्थापितानां किं च साक्षात् अदृश्यमानानां कथमपि अप्रामाणिकतया अथवा अविश्वस्तप्रामाणिकतया पठितानां शोधलेखादीनां कारणेन हानिद्वयं सम्भाव्यते–(1) उपस्थापितविषयस्य गाम्भीर्यनाशः, (2) तथाविधकार्येषु निष्ठया आत्मशक्त्या प्रवर्तमानानामितरेषां संशोधनकर्मनिरतानाम् उत्साहभङ्गः विषयं प्रति उपेक्षाभाववर्धनं वा। अतः यथा भौतिकरीत्या आयोज्यमानेषु शोधसंगोष्ठ्यादिषु उपस्थाप्यमानानां विषयाणां भाषागत-विषयगतस्तरविषये विमर्शः क्रियते स्म, अत्र आभासीयोपक्रमेऽपि तथैव विधातुं यत्नो विधेयः एव।

'सुखदुःखे समे कृत्वा' इति गीतोक्तिम् अनुसृत्य सङ्कटकालेऽस्मिन् 'आरण्यकम्' इदं प्रवर्तमानम् अस्ति। एतदवसरे एव विश्वविद्यालयानुदान आयोगद्वारा यत्नसूच्याम् (Carelist) एतस्यान्तर्भावो जातोऽस्ति। साम्प्रतिकेऽङ्के दर्शपूर्णयज्ञमाश्रित्य वेदविषयको लेखः, अद्वैतवेदान्त–योग–निम्बार्कादिदर्शनसम्बद्धाः लेखाः, ध्वनिरीत्यादिसाहित्यशास्त्र-सम्बद्धाः लेखाः किं च शब्दस्वरूपं लिङ्गं चाश्रित्य व्याकरणविषयकाः लेखाः, काव्यसम्बद्धो लेखश्च स्थानं लभन्ते, तत्र च कतिपयैः ज्येष्ठैः विद्वद्भिः साकं नवीनलेखकानां संशोधनकर्मनिरतानामपि समवायो विद्यते इति महानयं प्रमोदस्यावसरः।

आरण्यकमिदं विदुषां संशोधनरतानां शोधच्छात्राणां पुरतः आत्मानम् उपस्थाप्य संस्कृतभाषया एव शोधपत्रप्रकाशनकर्मणि स्वसंकल्पं स्मरत् तद्दिशि प्रवर्तमानं सत् 'स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः' इति गीतोक्त्या विभोः समर्चनं स्वकर्मणा विधाय विशिष्टां प्रसन्नतामनुभवति।

**विदुषां वशंवदः**
गोपबन्धु मिश्र
**सम्पादकः**

# सूचीपत्रम्


| विषयः | लेखकः | पृष्ठम् |
|---|---|---|
| 1. लौकिकव्यवहारे दर्शयागस्य प्रभावः | डॉ. शत्रुघ्नपाणिग्राही<br>उपाचार्यः, वेदविभागः,<br>श्रीसोमनाथसंस्कृतयुनिवर्सिटी,<br>वेरावलम्, गुजरात | 1-11 |
| 2. किञ्चिद् रामायणीयम् | अयोध्याकाण्डम् | 12 |
| 3. आनन्दवर्धनः लोञ्जाइनसश्च : सैद्धान्तिकं साम्यम् | डॉ.शैलेश कुमार मिश्रः<br>सहायकाचार्यः, राजकीयसंस्कृत-<br>महाविद्यालयः (विनोबाभावे-<br>विश्वविद्यालयः), राँची | 13-21 |
| 4. किञ्चिद् रामायणीयम् | अयोध्याकाण्डम् | 22 |
| 5. योगधर्मशास्त्रसम्बन्धः - एकम् अध्ययनम् | डॉ. सुश्री सस्मिता पतिः<br>सहप्राध्यापिका, संस्कृतविभागः<br>गङ्गाधरमेहेरविश्वविद्यालयः,<br>सम्बलपुरम्, ओडिशा | 23-30 |
| 6. व्याकरणादिशास्त्राभिमतं लिङ्गपदार्थविवेचनम् | डॉ. शेषमणिशुक्लः<br>अतिथि-प्राध्यापकः, व्याकरणविभागः<br>संस्कृतविद्याधर्मविज्ञानसङ्कायः,<br>काशीहिन्दूविश्वविद्यालयः, वाराणसी | 31-37 |
| 7. किञ्चिद् रामायणीयम् | अयोध्याकाण्डम् | 38 |
| 8. अद्वैतवेदान्ते प्रमायाः स्वरूपम् | डॉ.कपिलः गौतमः<br>सहायकाचार्यः, संस्कृतविभागः<br>मानविकी एवं समाजविज्ञानविद्यापीठम्,<br>वर्धमानमहावीरखुलाविश्वविद्यालयः,<br>कोटानगरम्, राजस्थानम् | 39-48 |

| विषयः | लेखकः | पृष्ठम् |
|---|---|---|
| 9. रीतिविचारः | डॉ. कृष्णकुमारकुमावतः<br>सहायकाचार्यः, संस्कृतविभागाध्यक्षश्च<br>राजकीयमहाविद्यालयः,<br>राजसमन्दः, राजस्थानम् | 49-59 |
| 10. किञ्चिद् रामायणीयम् | अयोध्याकाण्डम् | 60 |
| 11. कृष्णात्रेयकवेः काव्येषु कला सौन्दर्यञ्च | डॉ. तन्मयकुमारभट्टाचार्यः<br>सहायकाचार्यः, प्राच्यविद्याविभागः<br>संस्कृतमहाविद्यालयविश्वविद्यालयः,<br>कलिकाता-73 | 61-70 |
| 12. निम्बार्कमते जीवेश्वरयोः स्वरूपविमर्शः | डॉ. रुम्पा सरकारः<br>डॉ. गौड़ मोहन राय कालेज,<br>मन्तेश्वर, पूर्व वर्धमान, पश्चिम बंगाल | 71-76 |
| 13. जगत्सृष्टेरुद्देश्यम् - वैशेषिकनयेन सह दर्शनान्तराणामेका समीक्षा | डॉ. शारदा मुखर्जी<br>50/ए, आर. के. स्ट्रीट<br>उत्तरपाडा, जि. हुगली (प.बं.) | 77-81 |
| 14. किञ्चिद् रामायणीयम् | अयोध्याकाण्डम् | 82 |
| 15. शब्दतत्त्वविमर्शः | जयदेवदिण्डा<br>शोधच्छात्रः, रामकृष्ण मिशन<br>विवेकानन्द शिक्षा और शोध-<br>संस्थान, बेलुरू मठ, हावड़ा | 83-97 |
| 16. किञ्चिद् रामायणीयम् | अयोध्याकाण्डम् | 98 |


***

# लौकिकव्यवहारे दर्शयागस्य प्रभावः

**डॉ. शत्रुघ्नपाणिग्राही**

**दर्शश्च पूर्णमासश्च यस्य रूपं परात्मनः।**
**तं वन्दे यज्ञतपसां भोक्तारमपराजितम्॥**

इति यज्ञतत्त्वप्रकाशवचनानुसारं ज्ञायते यत् यज्ञः परमात्मनः स्वरूपं वर्तते। ''**यज्ञो वै विष्णुः**''[1] इति वचनानुसारं यज्ञः साक्षात् विष्णुस्वरूपः। विष्णुशब्दस्य व्युत्पत्तिः यथा वयं पश्यामः निरुक्तग्रन्थे यत् व्याप्नोतीति विष्णुः[2] अर्थात् यः सर्वत्र विद्यमानः सः विष्णुः। यतो हि यज्ञः भवति विष्णुस्वरूपः तर्हि विष्णुसदृशः यज्ञः अपि सर्वत्रैव विद्यमानः। सर्वेषु कर्मसु यज्ञः भवति श्रेष्ठः ''**यज्ञो वै श्रेष्ठतमं कर्म**''[3] इति श्रुतेः। गृहस्थवानप्रस्थिनोर्नित्यकर्त्तव्येषु यज्ञो वैशिष्ट्यपूर्णस्थानं निर्वहति। मनुष्याणां सर्वाणि एव कार्याणि यज्ञसम्बन्धीनि भवन्ति। ब्रह्माण्डस्य पिण्डस्य च स्थूल–सूक्ष्मरचनानां क्रमशः परिज्ञानार्थम् अग्निहोत्र–दर्शपूर्णमास–चातुर्मासादिरूपाः विविधाः श्रौतयागाः प्रकल्पिताः सन्ति। विविधानां श्रौतयज्ञानां प्रकल्पना सृष्टिं विज्ञापयितुमेव कृता वर्तते।[4] **अग्निसोमात्मकं जगत्** इति वैदिकसिद्धान्तः तस्य प्रमाणम्। जगतः कारणमेव अयं यज्ञः। अतः यज्ञः भुवनस्य नाभिरूपेण स्वीकृतः। यज्ञेन अस्य विश्वस्य पालनं भवति। अस्य गुणगानं कृत्वा आचार्यमधुसूदनओझामहोदयाः स्वकीययज्ञसरस्वतीति पुस्तके लिखन्ति–

**त्रयो लोका द्वौ च सन्धी इति पञ्चाग्नयश्श्रिताः।**
**पाङ्क्तोऽग्नियज्ञः स शिवो भूतभृत् पशुभृच्च सः॥**[5] इति।

## दर्शयागस्य सामान्यपरिचयः

श्रौतस्मार्तभेदेन द्विविधौ यागौ स्तः। येषां यज्ञानां साक्षात् श्रुतिषु विधानमुपलभ्यते ते श्रौतयज्ञाः। येषां विधानं गृह्य–धर्मसूत्रेषु क्रियते ते स्मार्तयज्ञा इत्याख्यायन्ते। आहत्य एकविंशतिः यज्ञसंस्थाः गृह्यन्ते। ते पाकयज्ञसंस्थाः, हविर्यज्ञसंस्थाः, सोमयज्ञसंस्थाश्चेति त्रिधा विभज्यन्ते। सर्वाः एताः यज्ञसंस्थाः प्रत्येकं सप्तसंख्यका भवन्ति। तत्र सप्तहविर्यज्ञसंस्थासु दर्शपूर्णमासौ अन्यतमौ। दर्श इति शब्दस्यार्थो भवति अमावास्या। अपि च केचनाचार्याः

दर्श इति शब्दस्यार्थः अग्निरिति कथयन्ति। दर्शपूर्णमासौ कालविशेषवाचकौ। अकरणे प्रत्यवायश्रवणादयं नित्यः, फलश्रवणात् काम्यश्च। प्रत्येकं चान्द्रमासस्य पक्षान्तेऽयमनुष्ठेयः। तत्र कृष्णपक्षान्तेऽमावास्यायां दर्शयागः, शुक्लपक्षान्ते पूर्णिमायां पौर्णमासयागश्च विहितौ। उभयोर्मेलनेनैक एव यागो भवति। प्रत्येकं दिनद्वयसाध्यमिदं कर्म। अर्थात् दर्शयागः अमावास्यायां प्रातरारभ्य तदनन्तरशुक्लप्रतिपदि पूर्वाह्णे समापनीयो भवति। अत्र दर्शयागे आग्नेयपुरोडाशयागः, ऐन्द्रदधियागः, ऐन्द्रपयोयागश्च प्रधानयागाः भवन्ति। अग्नि-होत्रहोमानन्तरं प्रत्येकं पर्वकालेऽयं दर्शपूर्णमासयागोऽनुष्ठेय इति कात्यायनेनोक्तम्।[6] कृताधानस्य दारवतः त्रैवर्णिकस्य दर्शयागे अधिकारः, न अकृतदारस्य, न वा मृतपत्नीकस्य। तत्रापि श्रौतयज्ञानां प्रकृति–विकृतिभेदे दर्शपूर्णमासौ प्रकृतियागेऽन्तर्गतौ भवतः। सर्वासामपीष्टीनामियं प्रकृतिः। शुक्लयजुर्वेदस्य प्रथमाध्यायतः आरभ्य उनचत्वारिंशदध्यायं यावत् यज्ञकर्मसम्पादनार्थं श्रुतिः उपदिशति। तत्र शुक्लयजुर्वेदस्य प्रथमाध्यायतः द्वितीयाध्यायस्य त्रिचश्चत्वारिंशत्तमं मन्त्रं यावत् दर्शपूर्णमासयागस्य वर्णनं दृश्यते।

**सामाजिकव्यवहारे दर्शयागस्य प्रभावः**

मनुष्य एकः सामाजिको जीवो वर्तते। समाजे सः यत् किमपि आचरति तत्सर्वं शास्त्राणामनुसरणं कृत्वैव। अनेन न्यायेन दर्शयागस्य सम्पादनावसरे यानि यानि कार्याणि दर्शयागे दरीदृश्यन्ते तानि तानि सर्वाणि कार्याणि सामाजिकजीवनेऽपि अस्माभिः परिपाल्यन्ते। लौकिकव्यवहारे दर्शयागस्य प्रभावप्रसङ्गे केचन बिन्दवः उपस्थाप्यन्तेऽत्र–

**1. नीरोगजीवनम् ( पर्वप्रतिपदस्सन्धिः प्रधानानुष्ठानस्य मुख्यकालः )**

दर्शयागः अमावास्यायां प्रातरारभ्य प्रतिपदि पूर्वाह्णे समापनीयः।[7] दिनद्वयानुष्ठेयमिदं कर्म। तत्र सूर्योदयादनन्तरं कर्मारम्भः। श्रद्धावान् पुरुषः यस्मिन् कस्मिंश्चिद्वसन्ततौ विधिवदग्नीनाधाय, आधानदिन एव पवमानेष्टिमनुष्ठाय तद्दिन एव सायमग्निहोत्रम् आरभेत। आरभ्य च प्रतिदिनं सायं प्रातश्चाग्निहोत्रं कुर्यात्। समनन्तरभाविन्याम् अमावास्यां मलमासशुक्रास्तादिदोषरहिते सति दर्शयागम् आरभेत। पर्वप्रतिपदस्सन्धिः प्रधानानुष्ठानस्य मुख्यकालः।

अमावास्याप्रतिपत्सन्धौ अयं यागः कर्तव्य इति प्रथमवैशिष्ट्यम्। यतोहि रोगाणामुत्पत्तिः सन्धिकाल एव भवति।[8] अपि च मनसि विकारभावनाः सन्धिकाल एव आगच्छन्ति। अस्मिन् समये यज्ञसम्पादनेन परमात्मना सह मनसः सम्बन्धो जायते। सन्धिसमये यागसम्पादनेन गवां घृतम् अग्निसंयोगेनागत्य वातावरणं शुद्धं करोति। दर्शपूर्णमासयागे अयम् अग्निः पावक–शुचि–पवमानादिपदैः सम्बोध्यते। अस्य नाम श्रवणेन एव ज्ञायते

यत् अग्निः शोधनयुक्तो वर्तते।[9] यागस्य समीपे यानि रोगोत्पत्तिकारणानि जीवाणवः भवन्ति तेषां नाशो भवति, यत्प्रभावात् यजमानः तथा तस्य गृहे तिष्ठन्तः जनाः नीरोगिणो भूत्वा सुखेन तिष्ठन्ति। अतः सन्धिसमये यागः कर्तव्य इति कात्यायनेनोक्तम्।[10] यतो हि आधिदैविकजगता सह यज्ञानां साक्षात् सम्बन्धो विद्यते, यथा–दर्शपूर्णमासयोः कृष्णपक्षशुक्लपक्षाभ्यां सह, अग्निहोत्रस्य अहोरात्रेण सह, चातुर्मास्यानाम् ऋतुभिः सह।

## 2. गवां स्तुतिः ( गोदोहनप्रसङ्गः )

दर्शपूर्णमासयागे प्रथमं दर्शयागः विधीयते। तत्र त्रीणि हवींषि आग्नेयोऽष्टकपालः, ऐन्द्रं दधि, ऐन्द्रं पयः इति। इदं दधि प्रतिपदि होतुममायां रात्रौ गावो दोग्धव्याः। तत्र च वत्साः स्वमातृभ्यः पलाशदण्डेनापाक्रियन्ते। दोहनार्थं तिस्रो गावः स्वीक्रियन्ते। तत्र ताः अभिलक्ष्य दर्शयागे मन्त्रविशेषः श्रूयते, यथा–

''**सा विश्वायुः सा विश्वकर्मा सा विश्वधायाः**''[11] इति। अर्थात् इन्द्रः सर्वा देवतास्ताभ्यो दोग्ध्री दिविष्ठाः गौः। सा विश्वेष्वायुः प्रवर्तयति। तस्मात् सा विश्वायुः। अथ वायुः सर्वा देवताः ताभ्यो दोग्ध्री गौरन्तरिक्षस्था। सा विश्वेषु अङ्गप्रत्यङ्गचेष्टां प्रवर्तयति, तस्मात् सा विश्वकर्मा। अथ अग्निः सर्वा देवता। ताभ्यो दोग्ध्री गौः पृथिवीस्था। सा विश्वेषु धारणशक्तिं प्रतिष्ठां प्रवर्तयति, तस्मात् सा विश्वधायाः। आयुश्चेष्टा प्रतिष्ठा एवैतासां पयांसि। गव्यानां क्षीरदधिघृतादीनां मनुष्यजीवनेऽस्ति महत्त्वपूर्णं स्थानम्। श्रूयते यथा–

**अन्धस्थान्धो वो भक्षीय महस्थ महो वो भक्षीयोर्जस्थोर्जं वो भक्षीय रायस्पोषस्थ रायस्पोषं वो भक्षीय॥**[12] इति।

अर्थात् हे गावः! यूयमन्धस्थ अन्नरूपाः स्थ। क्षीराज्यादिरूपस्यान्नस्थजनक-त्वादन्नत्वोपचारः। अतो भवत्प्रसादाद्वो युष्मत्संबन्धि अन्धः क्षीराज्यादिरूपमन्नमहं भक्षीय। तथा यूयं महस्थ पूज्यरूपाः स्थ। अतः युष्माकं पूज्यानां प्रसादादहमपि पूज्यत्वं सेवेय। अत्र महः शब्देन दश वीर्याण्युच्यन्ते। तानि यथा–'गौर्वै प्रतिधुक् तस्यै शृतं तस्यै शरः तस्यै दधि तस्यै दधिरसः तस्याः आतञ्चनं (दधिपिण्डः) तस्यै नवनीतं तस्यै घृतं तस्या आमिक्षा तस्यै वाजिनम्' इति श्रुत्युक्तानि।[13] गोक्षीरादेर्बलहेतुत्वात् बलरूपाः स्थः। अथात्र वैदिकवाङ्मये राजते गौः। तां विना यज्ञकर्म निरर्थकम्। साक्षात् भगवान् शङ्करः हि नीलवृषरूपधरः। माता पार्वती च धेनुरूपवती।[14] अतः वैदिकवाङ्मये गावः ईश्वररूपाः इति प्रतिपादिताः वर्तन्ते। अतः दर्शयागस्य प्रारम्भे गोदोहनप्रसङ्गे 'अघ्न्या' इति शब्दस्य प्रयोगो दृश्यते। अत्र 'अघ्न्या' इति शब्दस्यार्थो भवति अहन्तव्या।[15] महाभारतेऽपि

प्रतिपादितं वर्तते–

**'अघ्न्या' इति गवां नाम क एता हन्तुमर्हति।**
**महच्चकाराकुशलं वृषं गां वाऽऽलभेत्तु यः॥**[16] इति।

पुनश्च गोमेधयागप्रसङ्गे तत्रैव कथयति व्रीहिमयेन पशुना तत्पूर्तिः कर्तव्या। महाभारते वर्णनं दृश्यते यथा–

**श्रूयते हि पुराकल्पे नृणां व्रीहिमयः पशुः।**
**येनायजन्त यज्वानः पुण्यलोकपरायणः॥**[17] इति।

अतः सर्वैः गोरक्षां स्वधर्ममिति ज्ञात्वा गवां शुश्रूषा करणीया।

### 3. सत्यस्य स्थापनम् ( व्रतग्रहणम्, पत्नीसंनहनम् )

सत्यवदनादिरूपव्रतग्रहणम्। आहवनीयस्य पश्चाद्भागे तिष्ठन् उदकं स्पृष्ट्वा **'अग्ने व्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यताम्। इदमहमनृतात् सत्यमुपैमि।'**[18] इति मन्त्रेण व्रतं नियमं सपत्नीको यजमानो गृह्णीयात्। रात्रौ ब्रह्मचर्यधारणपूर्वकम् आहवनीयागारे गार्हपत्यागारे वा भूमौ शयनम्। फलाहारी स्यात्।

दर्शयज्ञकर्म सम्पादनार्थं यजमानस्य कृते व्रतग्रहणस्य विधानं वर्तते। यज्ञसम्पादना-वसरे यजमानः सङ्कल्पं गृह्णाति यत् अद्यारभ्य अहं सत्यं वदामि, मिथ्याभाषणं न करोमि।[19] तत्रैव सपत्नीको यजमानः गार्हपत्यागारे ब्रह्मचर्यधारणपूर्वकं भूमौ शयनं करोति।[20] धार्मिककृत्यसम्पादननिमित्तं पर्वाण्युद्दिष्टानि सन्ति। तत्र सम्भोगकामना भवेच्चेत् धार्मिककृत्यं निरर्थकं भवति। अतः इन्द्रियसंयमब्रह्मचर्यादिव्रतमेव सर्वेषां जीवपुरुषाणां कृते प्रधानधर्मरूपेण विहितं वर्तते। ब्रह्म सर्वेषां भूतानां हृदये विराजमानं परमविशुद्धः प्रकाशमयो ज्ञानस्वरूपः परमात्मा भवति। एष परमात्मा सदैव सत्यभाषण–तपश्चर्या–सम्यग्ज्ञान–संयमसाधनादिद्वारा द्रष्टुं शक्यते।[21] असंयमेन संसारभोगासक्तेन जीवेनेदं परब्रह्म कदाचिदपि ज्ञातुं न शक्यते। दर्शयागे सत्यभाषणस्य विषये चर्चा वर्तते। अस्य यागस्य प्रारम्भे व्रतग्रहणं विधाय यजमानः सपत्नीकः संसारयुक्तो भवति। अतः श्रूयते अथर्ववेदे–**'धर्मवसानः तपसो दतिष्ठत्।**[22] विष्णुधर्मोत्तरपुराणेऽपि प्रतिपादितं वर्तते यथा–**ऋषीणां ब्रह्मचर्येण श्रुतेन तपसा तथा।**[23] अथर्ववेदस्य भूमिसूक्तेऽपि सत्य–दीक्षा–तप आदिगुणानामाधारेण पृथिव्याः पालनं भवतीति श्रूयते।[24] व्रताचरणं कृत्वा यजमानः सत्यस्वरूपो भवति। अस्मिन् प्रसङ्गे आचार्यमधुसूदनओझामहोदयाः कथयन्ति–

**यज्ञस्यारम्भणं सत्यं ब्रह्मा सत्यभृदक्षरः।**
**विष्णोर्यज्ञभृतो जज्ञे भूतं तद् भूतभृच्छिवः॥**[25] इति।

अपि च पत्न्याः कटिप्रदेशे मेखलाबन्धनेन तस्या अपि संस्कारो जायते, येन सा आज्यावेक्षणं कर्तुं शक्नोति। इदानीमपि जनाः सामाजिककर्मणि आदौ व्रतग्रहणं (संकल्पं) कुर्वन्ति।

### 4. कर्मविभाजनम्/वर्णाश्रमधर्मं प्रति प्रेरणाप्रदानम् ( ऋत्विग्वरणविधिः )

दर्शयागकर्मणि चत्वारः ऋत्विजः भवन्ति। ऋग्वेदस्य 'होता' नामक ऋत्विक् याज्यापुरोनुवाक्यपुरःसरं देवानाम् आवाहनं करोति। यजुर्वेदस्य 'अध्वर्यु' नामक ऋत्विक् आवाहितदेवानां कृते हविःप्रदानं करोति। अथर्ववेदस्य 'ब्रह्मा' नामक ऋत्विक् यज्ञस्य निरीक्षण–कार्यं करोति। अपरः 'आग्निध्र' नामक ऋत्विक् अध्वर्योः सहायकरूपेण कार्यं करोति। अत्र प्रत्येकं कर्म पृथक् पृथक् वर्तते। व्यवस्थापनादृष्ट्या यदि वयं पश्यामश्चेत् दर्शयागः सुव्यवस्थितः वर्तते। तत्र यागसम्पादनसमये यदा कदा यस्य कस्यचित् कर्म आगच्छति तदा सः तस्मिन् कर्मणि प्रवृत्तात् प्रागेव ब्रह्मणः अनुज्ञां नयति। उदाहरणरूपेण अध्वर्युकर्तृकम् अपां प्रणयनम्। ब्रह्मन्नपः प्रणेष्यामीति ब्रह्माणं पृच्छन्नध्वर्युः 'ओम् प्रणय' इति ब्रह्मणानुज्ञातः प्रणयनं कृत्वा प्रणीतापात्रमाहवनीयस्योत्तरतः बहिर्वेदि '**कस्त्वायुनक्ति**'[26] इत्यादि मन्त्रेण स्थापयेत्। अत्र दर्शयागस्य कर्मविभाजनस्य प्रभावः आधुनिकसमाजे महत्त्वपूर्णं स्थानं वहति। यतो हि समाजे चतुर्विधानि कार्याणि भवन्ति। तेषाम् अन्तः अनेकविधाः क्रियाः भवन्ति। तानि सन्ति शिक्षणं, रक्षणं, उपार्जनम्, सेवा च। येषां कर्म भवति ज्ञानानुसन्धानं लोकेभ्यश्च विद्यावितरणं ते ब्राह्मणा इति कथ्यन्ते।[27] ये समाजे सुव्यवस्थां परिरक्षन्ति, शत्रूणाम् आक्रमणेभ्यः राष्ट्रं रक्षन्ति, प्रजानां पालनं च कुर्वन्ति ते क्षत्रियाः।[28] ये कृषिकर्मणा, पशुपालनेन, धनधान्यादीनामुत्पादनं समाजेषु वितरणं च कुर्वन्ति ते वैश्याः।[29] ये च स्वदेहेन अन्येषां वर्णानां शुश्रूषया स्वस्य कृते भोजनवस्त्रवासादि-युक्तामाजीविकाम् अर्जयन्ति ते शूद्रा उच्यन्ते।[30] यथा दर्शयागस्य सम्पादने चतुर्षु वेदेषु चत्वारः ऋत्विजः पृथक्–पृथग्रूपेण स्व–स्व कार्यं सम्पादयन्ति तद्वत् सर्वस्यापि लौकिकव्यवहारसिद्धये उक्तानां कर्मणां सुसम्पादनाय एव चातुर्वर्ण्यस्य समायोजना कृताऽस्ति। श्रूयते ऋग्वेदे यथा–

**ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः।**
**ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत॥**[31] इति।

इयं वैदिकी वर्णव्यवस्था दर्शयागस्य ऋत्विग्व्यवस्थावत् समाना वर्तते। यथा यज्ञकर्मणि आग्निध्रस्य कर्म होता न सम्पादयति तथैव समाजे प्रत्येकं वर्णस्य कृते तन्निर्दिष्टं कर्म आचरणीयम्। येन समाजे काऽपि विसंगतिः न भवेत्।

### 5. सांसारिकसम्बन्धः ( अपां प्रणयनम् )

प्रोक्षणीसाधनभूतानामपां प्रणीतापात्रेण पृथक्करणमपां प्रणयनमुच्यते। 'ब्रह्मन्नपः प्रणेष्यामी'ति ब्रह्माणं पृच्छन्नध्वर्युः 'ॐ प्रणय' इति ब्रह्मणानुज्ञातः प्रणयनं कृत्वा प्रणीता-पात्रमाहवनीयस्योत्तरतः बहिर्वेदि **'कस्त्वायुनक्ति'** इत्यादि मन्त्रेण स्थापयेत्। अग्निप्रणीतयोरन्तरालेन कोऽपि न गच्छेत्।[32]

वैदिकसंस्कृतौ विशेषतः यज्ञकर्मणि जायायाः उपस्थितिः अपरिहार्या वर्तते। तत्र पत्या सह पत्न्याः सहभागिता सर्वत्र दृश्यते। दर्शपूर्णमासयागे अपां प्रणयनम् उत्तरस्यां दिशि भवति। अत्र अग्निः भवति पुरुषः, आपः भवन्ति स्त्री। शतपथब्राह्मणे श्रूयते– **योषा वा आपः वृषाग्निः, गृहा वै गार्हपत्यः ... मिथुनमवैतत्प्रजननं क्रियते।**[33] लोकेऽपि पत्युः उत्तरस्यां दिशि पत्न्याः स्थानं भवति। अतः सा वामाङ्गी इति कथ्यते। पुनश्च गार्हस्थधर्मस्य सम्पादनमपि गृहेष्वेव भवति। अत्र गार्हपत्यागारः गृहमिति उच्यते। अत्र लौकिकं सांसारिकं सम्बन्धं प्रदर्शयति दर्शयागस्य अपां प्रणयनविधिः।

### 6. आध्यात्मिकचिन्तनम् ( शकटारोहणम् )

दर्शयागे हविर्ग्रहणप्रसंगे यजमानः अग्निहोत्रहवणिं शूर्पं च गृहीत्वा शकटस्य समीपं गच्छति। तत्र शकटारोहणसमये कथयति शकटारोहणं स्वयं विष्णुदेवः करोति न तु अहम्। श्रूयते यथा–**विष्णुस्त्वाक्रमताम्**[34] इति। पुनश्च शकटारोहणानन्तरं हविर्ग्रहणसमयेऽपि कथयति सवितृदेवस्य प्रेरणया, अश्विनकुमारयोः बाहुभ्यां, पूषादेवस्य हस्ताभ्यां हविर्ग्रहणं करोमि। श्रूयते यथा-

**देवस्य त्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्।**[35]

अस्य मन्त्रस्यानुशीलनेन ज्ञायते यद्यपि यजमानः स्वयं हविर्निर्वापकर्म सम्पादयति तथापि सर्वस्य लोकस्य प्रेरयितुः सवितृदेवस्य प्रेरणया हविर्गृह्णातीति कथयति। **''यज्ञो वै विष्णुः''**[36] इति शतपथ-ब्राह्मणस्य वचनम्। यज्ञशब्देन विष्णुः ज्ञायते। **यज्ञो यजमानस्य**[37] इति निरुक्तवचनानुसारम् अचेतनभूतदेवस्य यज्ञस्य कार्यं चेतनरूपजीवपुरुषः सम्पादयति। अतः दर्शयागसम्पादनसमये यजमानः स्वकीयामवस्थितिं विस्मृत्य देवैः सहाध्यात्मिकसम्बन्धं स्थापयति।[38]

**7. क्रमनियमस्य प्रभावः ( पात्रासादनम् )**

पात्राणां द्वन्द्वशः स्थापनं पात्रासादनमुच्यते। शूर्पम्, अग्निहोत्रहवणी, स्फ्यः, कपालानि, शम्या, कृष्णाजिनम्, उलूखलम्, मुसलम्, दृषत्, उपलमिति दशपात्राणि गार्हपत्यस्य पश्चादुत्तरतो वा क्रमेण आसादनीयानि। कर्मानुसारमादौ शूर्पेण विविनक्ति, अग्निहोत्रहवण्या हवींषि निर्वपति, स्फ्येनोद्धरति, कपालेषु श्रपयति, शम्याया अधि दृषदमुपदधाति, कृष्णाजिनमास्तृणाति, उलूखले धान्यान्यावपति, मुसलेनावहति, दृषदि तण्डुलानोप्योपलेन पिनष्टि। यथाक्रमं दर्शयागस्य सम्पादने पात्राणां भवति तथैव यदि अस्माकं जीवनेऽपि आगतानि सर्वाणि कार्याणि क्रमानुसारं भवेयुः चेत् अवश्यमेव जीवनं सुखमयं भविष्यति।

**8. लौकिकव्यवहारः ( हविः प्रोक्षणम्, वेदीपरिस्तरणम् )**

पवित्रार्थं कुशयोः छेदनम्, यथाविधि पवित्रसम्पादनम्, पवित्रमग्निहोत्रहवण्यां निक्षिप्याग्निहोत्रहवणीं जलेन पूरयित्वा ता आप उत्पुनाति पवित्राग्रभागं वामहस्ताङ्गुष्ठतर्जनीभ्यां तथैव मूलभागं दक्षिणहस्ताङ्गुष्ठतर्जनीभ्यां परिगृह्य पूर्वां दिशमारभ्य पश्चिमदिक्पर्यन्तं चालयेत्। इदमेवोत्पवनं कथ्यते। प्रणीतापात्रस्थिताभिरद्भिः अग्निहोत्रहवणीस्था आपः प्रोक्षति। अनन्तरं शूर्पस्थे हवींषि प्रोक्षति। सर्वत्र प्रोक्षणं समन्त्रकम् 'अग्नये त्वा जुष्टं प्रोक्षामि' 'अग्निषोमाभ्यां त्वा जुष्टं प्रोक्षामि' इति प्रोक्षेत्। एवमेव प्रतिपात्रं पृथक् पृथक् मन्त्रेण '**दैव्याय कर्मणे...**'[39] इत्यादिना प्रोक्षणम्।

यथा वेदे तथा लोके इति न्यायेन दर्शयागसम्पादनसमये हविःप्रोक्षणम्, फलीकरणम्, वेदीपरिस्तरणादिकर्मणि ये वैदिकनियमाः दृश्यन्ते ते नियमाः अपि मानवाः लौकिकव्यवहाररूपेण स्वकीयजीवने परिपालयन्ति। अध्वर्युः प्रागग्रैरुदग्रैश्च कुशैः आहवनीयगार्हपत्यदक्षिणाग्नीन् क्रमेण अग्नीन् परितः स्तृणाति। इदं परिस्तरणं देवानामुपवेशनार्थं भवति। लौकिकव्यवहारदृष्ट्याऽपि आतिथ्यप्रदाने एतद् अस्माभिः अवधातव्यमस्ति। पुनश्च हविः प्रोक्षणवत् अस्माकं भोजनपात्राण्यपि मार्जनीयानि इति लौकिकव्यवहारशिक्षा दर्शयागतः मिलति।

**9. यज्ञकर्मणि नारीणामधिकारः ( आज्यावेक्षणे, हविर्निष्पादने )**

अध्वर्युः यजमानो वा कृष्णाजिनमादाय "**अवधूत गुं रक्षः**[40]... इत्यादिमन्त्रेण अवधूनोति। तदुपरि उलूखलं स्थापयित्वा उलूखले हविर्द्रव्यं प्रक्षिपति। ततो मुसलमादाय अवहननं कुर्वन्नध्वर्युः अवहनने सहायार्थं यजमानपत्नीम् आह्वयति। हविष्कृदेहि हविष्कृदेहि

हविष्कृदेहीति[41] हविष्कृत आह्वानम्। हविष्कृत् यजमानपत्नी। सा व्रीहीनवहन्ति। तण्डुलकणानां पृथक्करणमपि करोति।

दर्शयागे हविर्निष्पादनसमये हविःकुट्टनार्थम् ऋत्विक् यजमानस्य पत्नीं **हविस्कृदेहीति** शब्देन आह्वयति। अत्र हविस्कृत् नाम यजमानपत्नी। सा ब्रीहीन् अवहति, अनन्तरं फलीकरणकार्यमपि सम्पादयति। **''अयज्ञो वै एषः योऽपत्नीकः''**[42] इति कृष्णयजुर्वेदीयवचनानुसारं ज्ञायते यज्ञकर्मणि पत्न्याः सहभागिता वर्तते। आज्यावेक्षणकर्म अपि पत्न्याः अधीन एव वर्तते। परन्तु एतदर्थं ताः संस्कारिताः स्युः। वैदिकमन्त्राणामध्ययनेऽपि तासां सहभागिता विद्यते। यदा पत्नी आज्यावेक्षणं करोति तदा मन्त्रमिदं पठति– **'अदब्धेन त्वा चक्षुषावपस्यामि।'**[43] पुरुषो यावत्पर्यन्तं जायां न विन्दते तावत्पर्यन्तं सोऽर्द्धो भवति।[44] जायाप्रजाभ्यां पुरुषः सम्पूर्णो भवतीति शुक्लयजुर्वेदीयशतपथब्राह्मणे श्रूयते यथा–

**अर्द्धो ह वा एष आत्मनो यज्जाया तस्माद्यावज्जायां न विन्दते नैव तावत्प्रजायते असर्वो हि तावद्भवति, अथ यदैव जायां विन्दतेऽथ प्रजायते तर्हि हि सर्वो भवति॥**[45] इति।

अतः प्राचीनकाले स्त्रीणां यज्ञाधिकारः आसीत्। परम्परानुसारं यज्ञानुष्ठाने पत्या सह पत्न्याः अपि उपस्थितिः अनिवार्या आसीदिति शिक्षा मिलति।

### 10. अहिंसायाः आचरणम् ( कृष्णाजिनमास्तरणम्, अग्निस्थापनम् )

**धर्म एव हतो हन्ति धर्मो रक्षति रक्षितः।**
**तस्माद्धर्मो न हन्तव्यो मा नो धर्मो हतोऽवधीत्॥**[46]

इति मनुवचनानुसारं ज्ञायते यत् धर्मः कदाचिदपि नातिक्रमणीयः। स एव धर्मः वेदे यज्ञरूपेण प्रतिपादित।[47] वेदः यज्ञप्रधानः। पुरुषसूक्तानुसारं यज्ञद्वारा ईश्वरेण सृष्टमिदं जगत् ईश्वर एव। जगति ये जीवाः दृश्यन्ते ते परमात्मनः अंशरूपाः सन्ति। जीवतीति जीवः इति विग्रहे जीव प्राणने इत्यस्मात् धातोः निष्पन्नस्य जीवशब्दस्यार्थो भवति प्राणधारकं चेतनतत्त्वम्। जीवः वास्तविकरूपेण ब्रह्म एव वर्तते। तथापि अज्ञानेन हेतुना अयं संसारिजीवः ईश्वराद् भिन्नो भवति। जीवोऽस्ति उपासकः, ईश्वरः उपास्यः। अतः दर्शयागकर्मणि यथा कस्यचित् जीवस्य वधो न भवेत् तदर्थं कृष्णाजिनम् अवधूनोति यजमानः। येन कृष्णाजिने स्थितानां जीवानां वधो न भवेत्। श्रूयते यथा–

**अवधूतं रक्षोऽवधूता अरातयः।**[48] पुनश्च अग्निस्थापनानन्तरं समित्प्रदानात्

प्राग् एव प्रोक्षणकर्म, आज्यावेक्षणकर्म, द्रव्यसंस्कारकर्म अपि भवति। एतानि सर्वाणि कर्माणि जीवहिंसानिवारणाय एव प्रवर्तन्ते।

**स्वच्छताभियानम् ( फलीकरणम्, उत्करस्योपयोगः )**

आग्निध्रनामक ऋत्विक् आहवनीयस्योत्तरत उत्करं (Dustbin) कुर्यात्।[४९] अनपेक्षिततृणादीनां प्रक्षेपणस्थानमुत्करशाब्दाभिधेयम्। इदञ्च स्थानं गर्तरूपं भवति। दर्शयागे उत्करस्य वर्णनं दृश्यते। अनेन स्पष्टं भवति वैदिकयुगेऽपि उत्करस्योपयोगः (Dustbin) आसीत्। यस्य प्रभावः आधुनिकसमाजे दृश्यते। तत्र फलीकरणप्रसंगेऽपि यदा यजमानस्य पत्नी शूर्पमाध्यमेन तण्डुलेषु संलग्नानां तुषाणां निरसनं करोति तदा तेषां तुषाणां प्रक्षेपकार्यम् उत्कर एव करोति न तु अन्यत्र।

अतः निष्कर्षरूपेण वक्तुं शक्यते यत् यथा वेदे तथा लोके इति न्यायेन दर्शयाग-सम्पादनसमये व्रतग्रहणम्, गोदोहनम्, शकटारोहणम्, हविर्ग्रहणम्, हविःप्रोक्षणम्, कृष्णाजी-नास्तरणम्, उत्करनिर्माणम्, फलीकरणम्, वेदिपरिस्तरणादिकर्मणि ये वैदिकनियमाः दृश्यन्ते तान् नियमान् अपि मानवाः लौकिकव्यवहाररूपेण स्वकीयजीवने परिपालयन्ति। अतः दर्शयागस्य सम्पादनेन इहलौकिकं पारलौकिकमुभयविधं फलं प्राप्यते। ''यावज्जीवं दर्शपूर्णमासाभ्यां यजेत'' इति शतपथब्राह्मणस्य वचनानुसारं दर्शपूर्णमासयज्ञसम्पादनपूर्वकं ब्रह्मणः उपासनया भगवतः प्राप्तिं कुर्यात्।

**

**सन्दर्भाः–**

1. शतपथब्राह्मणम्, 1.1.2.13
2. निरुक्तम्, 12.2
3. शतपथब्राह्मणम्, 1.3.1.5
4. मनोवाक्प्राणतन्त्रायी ब्रह्मा सत्यः प्रजापतिः।
   मनसा वचसा प्राणैः सृष्टिं सृजति यज्ञतः।। यज्ञसरस्वती, मङ्गलाचरणम्, श्लो.8
5. यज्ञसरस्वती, मङ्गलाचरणम्, श्लो.7
6. कात्यायनश्रौतसूत्रम्, 2.1.17
7. सायमादि प्रातरन्तमेकं कर्म प्रचक्षते।
   दर्शान्तं पौर्णमासाद्यमेकमेव मनीषिणः।।
   ऊर्ध्वं पूर्णाहुतेः प्रातर्हुत्वा तां सायमाहुतिम्।
   प्रातर्होमस्तदैव स्यादेष एवोत्तरो विधिः।। इति। कात्यायनस्मृतिः, 18.1,6
8. भैषज्ययज्ञा वा एते यच्चातुर्मास्यानि। तस्मादृतुसन्धिषु प्रयुज्यन्ते। ऋतुसन्धिषु हि व्याधिर्जायते। कौषीतकिब्राह्मणम्, 5.1
9. ऋग्वेदः, 1.12.2
10. ऋतुमुखे यजेत्, कात्यायनश्रौतसूत्रम्, प्रथमाध्यायस्य तृतीयपादः
11. शुक्लयजुर्वेदकाण्वसंहिता , 1.7
12. शुक्लयजुर्वेदः, 3.20
13. शतपथब्राह्मणम्, 2.3.3.3
14. अग्निर्ह नः प्रथमजा ऋतस्य पूर्व आयुनि वृषभश्च धेनुः। ऋग्वेदः, 10.5.7
15. अघ्न्या अहन्तव्या भवन्त्यघ्नीति वा, निरुक्तम्, 11.43
16. महाभारतस्य, शान्तिपर्वणि, 262.47
17. महाभारतस्यानुशासनपर्वणि, 115.56
18. शुक्लयजुर्वेदः, 1.5
19. सत्यं वाचः प्रतिष्ठा, सत्ये सर्वं प्रतिष्ठितम्, तस्मात्सत्यं परमं वदन्ति।
    महानारायणोपनिषद्,17.1
20. ब्रह्मचर्यं नाम सर्वावस्थासु मनोवाक्कायकर्मभिः सर्वत्र मैथुनत्यागः।
    शाण्डिल्योपनिषद्, 1.1.3
21. सत्यज्ञाने निबध्यन्ते पुरुषाः पाशबन्धनैः।
    मद्भावाच्च विमुच्यन्ते ज्ञानिनः पाशपञ्जरात्।। शिवोपनिषद्, 1.13

22. अथर्ववेदः, 1 1.5.5
23. विष्णुधर्मोत्तरपुराणम्, 2.94.4
24. अथर्ववेदः, 12.1.1
25. यज्ञसरस्वती, मङ्गलाचरणम्, श्लो.3
26. यजुर्वेदः 1.6
27. मनुस्मृतिः, 1.88
28. तत्रैव, 1.89
29. तत्रैव, 1.90
30. तत्रैव, 1.91
31. ऋग्वेदः, 10.90.12
32. शतपथब्राह्मणम्, 1.1.1.2
33. शतपथब्राह्मणम्, 1.1.1.18-20
34. शुक्लयजुर्वेदः, 1.9
35. शुक्लयजुर्वेदः, 1.10
36. शतपथब्राह्मणम्, 1.1.1.13
37. निरुक्तम्, 7.2
38. छान्दोग्योपनिषद्, 4.16.5
39. शुक्लयजुर्वेदः, 1.13
40. शुक्लयजुर्वेदः, 1.14
41. शुक्लयजुर्वेदः, 1.15
42. कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणम्, 2.2.2.6
43. यजुर्वेदः, 1.30
44. अर्द्धो वा एष आत्मनः, यत्पत्नी, तैत्तिरीयब्राह्मणम्, 3.3.3.5
45. शतपथब्राह्मणम्, 5.1.6.10
46. मनुस्मृतिः, 8.15
47. यागादिरेव धर्मः, पूर्वमीमांसा
48. यजुर्वेदः, 1.14
49. विपर्यस्योत्तरत उत्करः, कात्यायनशुल्बसूत्रम्, 1.28

**

## किञ्चिद् रामायणीयम्

*** अयोध्यायां राज्ञो दशरथस्य पुत्रत्वम् आप्तस्य रामरूपस्य सत्यसन्धस्य वीरस्य सर्वेषां हितैषिणः विष्णोः सहायाः कीदृशाः आसन्?**

(1) कामरूपिणः, (2) मायाविदः, (3) शूराः,

(4) जवे वायुवेगसभाः, (5) नयज्ञाः, (6) बुद्धिसम्पन्नाः,

(7) विष्णुतुल्यपराक्रमाः, (8) असंहार्याः, (9) उपायज्ञाः,

(10) दिव्यसंहननान्विताः, (11) अमृतप्राशनाः देवाः इव सर्वास्त्रगुणसम्पन्नाः।

*** एते सर्वे कुत्र सृष्टाः? केन रूपेण च सृष्टाः?**

कुत्र = (1) मुख्यासु अप्सरस्सु (2) गन्धर्वीणां तनूषु (3) यक्षपन्नगकन्यासु (4) ऋक्षविद्याधरीषु (5) किन्नरीणां गात्रेषु (6) वानरीणां तनुषु च

केन रूपेण देवताभ्यः देवतुल्यपराक्रमाः पुत्राः वानररूपेण सृष्टाः?

*** कस्माद् देवाद् ( विशिष्टतया ) कः उत्पन्नः?**

| **सर्जकः देवः** | **सृष्टः ऋक्षः/वानरः** |
|---|---|
| स्वयम्भूः ब्रह्मा | ऋक्षपुङ्गवः जाम्बवान् |
| इन्द्रः | वाली (वानरेन्द्रः) |
| तपनः | सुग्रीवः |
| बृहस्पतिः | तारः (महाकपिः) |
| धनदः | गन्धमादनः (वानरः) |
| विश्वकर्मा | नलः (महाकपिः) |
| पावकः | नीलः (अग्निसदृशः (पुत्रः) कपिः) |
| अश्विनौ | मैन्दः, द्विविदः |
| वरुणः | सुषेणः (वानरः) |
| पर्जन्यः | शरभः |
| मारुतः | हनूमान् (श्रीमान् व्रजसंहननोपेतः जवे वैनतेयसमः सर्ववानरमुख्येषु बुद्धिमान् बलवान् अपि) |

**बालकाण्डम् 17/1-17**

# आनन्दवर्धनः लोञ्जाइनसश्च : सैद्धान्तिकं साम्यम्

**डॉ. शैलश कुमार मिश्रः**

सत्स्वपि बहुषु भिन्नत्वेष्वपि पौरस्त्यपाश्चात्त्ययोः साहित्यशास्त्रीयपरम्परयोः बह्व्यः चिन्तनसरण्यः साम्यं भजन्ते। स्यादियं रीतिः शैली वा वक्रोक्तिरभिव्यञ्जना वा ध्वनिर्वा औदात्त्यं वा स्यात् सर्वत्र द्वयोः परम्परयोः बहुषु विचारतत्त्वेषु अद्भुतं साम्यं परिलक्ष्यते। शोधनिबन्धेऽस्मिन् पौरस्त्याचार्याणां ध्वनिप्रस्थापकानां श्रीमदानन्दवर्धनाचार्याणामथ च यूनानदेशीयानाम् औदात्त्यसिद्धान्तप्रवर्तकानां लोञ्जाइनसनामधेयाचार्याणां सिद्धान्तावधिकृत्य विचारसाम्यमन्विष्यते।

यूनानदेशीयचिन्तनपरम्परायां सुकरातप्लेटोऽरस्त्वादीनां विचारसरण्यो यथा महत्त्वातिशय्यं भजन्ते तथैव काव्यतत्त्वचिन्तने प्रस्थानप्रवर्तकानां लोञ्जाइनसमहोदयानामपि विचाराः महत्त्वपूर्णाः वर्तन्ते। यद्यपि लोञ्जाइनसमहोदयस्य समयः तिमिराच्छन्नो वर्तते किन्तु प्रथमतृतीयखीस्तश-ताब्द्योर्मध्ये स विद्यमान आसीदिति विदुषामभिमतम्। यूनानीभाषया विरचिता 'पेरि इप्सुस' (Peri Hypsus) नामधेया तस्य कृतिः बहुकालपर्यन्तं विलुप्ता आसीत्। सहस्राधिकवर्षानन्तरं 1554 खीस्तवर्षे रॉबरतेल्लोनामधेयेन इटलीदेशवास्तव्येन केनचिद्विदुषा कृतिरियं प्राकाश्यं नीता। 'Of the height of eloquence' इति नाम्ना पुस्तकस्यास्य आङ्गलभाषान्तरं 1625 खीस्ताब्दे प्रकाशितं यस्य भाषान्तरकारः जॉनहॉलनामधेयः विद्वान् आसीत्। लियोनर्ड वेल्स्टेड (Leonard Welsted) इत्याख्यः कश्चिद्विद्वान् 'On the sovereign pefection of writing' इति नाम्ना अथ च जॉर्ज ग्रूब इत्याख्यः कश्चित् साहित्यशास्त्री 'Of Great Writing' इति नाम्ना आङ्गलभाषान्तरणं कृतवन्तौ। 1739 ईस्वीयाब्दे 'विलियमस्मिथ' इत्याख्येन केनचिद्विपश्चिता ग्रन्थस्यास्याभिधानं 'On the sublime' इति विहितं साहित्यजगति यस्य समादरो दरीदृश्यते। 'Sublimity' इति शब्दः लोञ्जाइनसमहोदयस्याभिप्रायमभिव्यक्तुं सर्वथा समर्थ इति विदुषां मतम्। Sublime शब्दः उदात्तशब्दस्य वाचकः अस्ति।

'पेरिइप्सुस' इत्याख्या षष्टिपृष्ठपरिमिता लघ्वाकारा कृतिरियं वस्तुतः पत्ररूपा अस्ति। काव्यतत्त्वं जिज्ञासमानं तेरेन्तियानुसनामधेयं स्वकीयं मित्रं सम्बोध्य लोञ्जाइनस महोदयेनेदं पत्ररूपं पुस्तकं विरचितम्। लघुकायेऽस्मिन् पुस्तके चतुश्चत्वारिंशद् अध्यायाः सन्ति। केचन अध्यायास्तु अतिलघुकलेवराः अनुच्छेदैकमात्राः एव सन्ति।

नवमशताब्द्यां वर्तमानः प्रस्थानप्रवर्तकाचार्यरूपः सुविश्रुतो भारतीयः आचार्यः आनन्दवर्धनः ध्वनिसिद्धान्तस्य प्रवर्तनं विदधात्। ध्वनिविषयकं यदपि पूर्ववर्तिचिन्तनमासीत् तस्य परिमार्जनं परिवर्धनं च विदधता आचार्यानन्दवर्धनेन ध्वनिचिन्तनपरायणो गभीरचिन्तनसंवलितो ध्वन्यालोकाभिधानो ग्रन्थः प्रणिन्ये। साहित्यजगति सुविश्रुतः श्रीमदभिनवगुप्तपादाचार्यः ध्वन्यालोकमधिकृत्य लोचनाख्यं भाष्यं कृतवान्। उदात्ततत्त्वस्य लक्षणं निरूपयता लोञ्जाइनसमहोदयेन निगदितं यदुदात्ततत्त्वमिदम् अभिव्यञ्जनायाः अनिर्वचनीयः प्रकर्षो विद्यते। तदित्थं वदति लोञ्जाइनसः–

Sublimity is a certain distinction and excellence in expression and that is from no other source than this that the greatest poets and writers have derived their eminence and gained an immortality of renown. The effect of elevated language upon an audience is not persuasion but transport. At every time and in every way imposing speech, with the spell it throws over us prevails over that which aims at persuasion and gratification. Our persuasion we can usually control, but influences of sublime bring power and irresistible might to bear, and reign supreme over every hearer ... Sublimity flashing forth at the night moment Scatters everything before it like a thunderbolt, and at once displays the power of orator in all its plentiude.[1]

तस्याभिमतमिदं वर्तते यदौदात्त्यं नाम काव्यतत्त्वमिदं निजप्रभावात् श्रोतृणां सम्मोहनं (Entrancement) कुरुते न तु अनुनयनम् (Persuasion)। अनुनयनमस्माभिः नियन्त्रितं स्यात् किन्तु औदात्त्यं स्वीयाऽप्रतिरोध्यशक्त्या अस्मान् वशीकरोति किं वा वयं तस्य विलक्षणप्रभाववशात् सम्मोहिताः भवामः। औदात्त्यमिदम् अशेषरचनायां प्रसृतं न भवति। अशेषा काव्यरचना यद्यपि सर्जनाकौशलपरिपूर्णा भवति तथापि औदात्त्यं खलु विद्युदुन्मेष इव सम्पूर्णरचनामुद्भासयति।

लोञ्जाइनसमहोदयेन औदात्त्यस्य पञ्च आधारभूतानि तत्त्वानि प्रतिपादिकानि– विचारमहत्ता, भावतीव्रता, अलङ्काराणां समुचितप्रयोगः, भव्यपदयोजना रचनायाः गरिमा च। एतेषु आद्ये द्वे अन्तरङ्गतत्त्वे स्तः अवशिष्टानि त्रीणि बहिरङ्गानि तत्त्वानि सन्ति।

वैचारिकी महत्ता औदात्त्यस्य आद्यं स्रोतः। महतां विचाराणां धारणक्षमता औदात्त्यस्य भूमिः। सिद्धान्तकारः एतत् प्रतिपादयति यदुदात्ततत्त्वमिदं महतः आत्मनः प्रतिध्वनिर्वर्तते–

**Sublimity is the echo of a great soul.**[2]

अनेनैतत् सिध्यति यद् वाग्मितायाः उत्कर्षं दधानः कश्चिदपि कथमपि अधमत्वं न याति।

प्रतीयमानं व्याचक्षाणः आनन्दवर्धनाचार्योऽपि प्रतिपादयति–

**प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम्।**[3]

तस्याभिमतमिदं यत् प्रतीयमानं महाकवीनां वाणीषु विलसति। निश्चयेन एतद् वक्तुं शक्यते यद् औदात्त्यस्य यत्स्वरूपं वर्तते तस्य साम्यं प्रतीयमानेन दृश्यते यत् खलु महतामात्मनां प्रतिध्वनिरित्यभिधीयते। सामान्यास्तु वाच्यार्थरीत्या व्यवहरन्ति किन्तु महतां कवीनां वाणीषु व्यङ्ग्यार्थस्य सौन्दर्यं भासते। महतां विपश्चितां वाक् रसध्वनिसरस्वतीविशिष्टा भवतीति कथयति आचार्यानन्दवर्धनः–

**सरस्वती स्वादु तदर्थवस्तु निःष्यन्दमाना महतां कवीनाम्।**
**अलोकसामान्यमभिव्यक्ति परिस्फुरन्तं प्रतिभाविशेषम्॥**[4]

आनन्दवर्धनः एवं ब्रवीति यद् आस्वादपरिपूरितार्थवस्तुनिःष्यन्दिनी कविवाक् अलोकसामान्यप्रतिभां प्रकटयति। आनन्दवर्धनः कृतिकारस्य प्रतिभास्फुरणं निर्दिशति लोञ्जाइनसश्च रचनायां विद्यमानौदात्त्यस्य स्फुरणं प्रतिपादयति। एतादृशाः अलोकसामान्य-प्रतिभावन्तः कवयः अत्यल्पाः एव भवन्ति। तस्मादाचार्यः एवं वदति–

**द्वित्राः पञ्चषा वा महाकवय इति गण्यन्ते।**[5]

आनन्दवर्धनाचार्यस्याभिप्रेतमिदं वर्तते यद् तादृग्विधाः वाक्चमत्कारकारिणो दुर्लभा एव। लोञ्जाइनसमहोदयोऽपि एतद् ब्रूते यद् औदात्त्यस्य संस्पर्शः अतीव विरलः। तच्च उदात्ततत्त्वं सम्पूर्णरचनायां विरलत्वेनावलोक्यते। महादात्मतत्त्वोद्भूतं एतदौदात्त्यं खलु काव्योद्भवस्य भूमौ प्रतिभायाः प्रतिष्ठां करोति। अस्मिन् सिद्धान्ते एषा अन्तःप्रेरणा किं वा प्रतिभा आत्मोत्कर्षनाम्ना अभिहिता।

भावानां तीव्रता औदात्त्यसिद्धान्तस्यापरम् आधारभूततत्त्वं वर्तते। भव्यावेगवशाद् हर्षोल्लासनिमग्नः आत्मा उच्चाकाशे विचरति। भारतीयसाहित्यदृष्ट्या एषा चित्तस्य दीप्ति-रित्यभिहिता। स्वकीये ग्रन्थे होमरकवेः 'इलियड' 'ओडिसी' नामधेयं काव्यद्वयं व्याचक्षाणो

लोञ्जाइनस इत्थं वदति–

Imagine whereas in the lliad which was written when his genius was in its prime; the whole structure of the poem is founded on action and struggle, in the Odyssey he generally prefers the narrative style, which is proper to old age. Hence Homer in his Odyssey may be compared to the setting sun; he is still as great as ever, but he has lost his fervent heat.[6]

होमरकविः निजतारुण्ये इलियडनाम काव्यं विरचितवान्। तस्मिन् काव्ये सङ्घर्ष-प्राचुर्यमवलोक्यते। ओडिसीनामधेयम् अपरं काव्यं तेन वार्धक्ये विरचितम्। ओडिसी-काव्यस्याधिकांशः आख्यानमयो वर्तते। ओडिसी अस्तङ्गच्छतः सूर्यस्य औपम्यं भजते यस्मिन् भव्यता भवति किन्तु तीव्रता न। तुलनात्मकदृष्ट्या तरुणहोमरकवेः 'इलियड' इत्यस्माद् वृद्धहोमरकवेः कृतिः ओडिसी हीनप्रभा अस्तीति लोञ्जाइनसमहोदयस्य विचारः। तत्र भावसान्द्रत्वं प्राचुर्येण नास्ति न च जीवनस्य याथार्थ्यं सुचित्रितं वर्तते। लोञ्जाइनसो वदति यद् ओडिसीकाव्ये होमरकवेः माहात्म्यक्षयोऽवलोक्यते। एतत् प्रतिभाति यत् शान्तावेगः कश्चित् महासागरः सीमाबद्धो वर्तते इति। प्रबलभावावेगः औदात्त्यं जनयति किन्तु तत्र भावतीव्रतामध्ये भावातिरेको न स्यादिति लोञ्जाइनसो निर्दिशति। भावानामतिरञ्जितप्रयोगः अविश्वासं जनयति येन आह्लादप्रतीतिः बाध्यते। लोञ्जाइनसमहोदयेन निरूपितो भावावेगः इव भारतीयपरम्परायां निरूपितः आदिकवेः वाल्मीकेः शोकोत्थभावः काव्यसर्जनाप्रेरकोऽभवत्। एषा भावसान्द्रतैव काव्यस्य विनिर्माणे आधारभूता–

**काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा।**
**क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः॥**[7]

अलङ्काराणां समुचितविनिवेशः औदात्त्यसिद्धान्तस्य अन्यद् महत्त्वपूर्णं वस्तु वर्तते। लोञ्जाइनसस्याभिमतं वर्तते यदलङ्काराः साधनभूताः औदात्त्यं च साध्यभूतं वर्तते। औदात्त्यस्य तीव्रतरप्रभावसर्जनार्थम् अलङ्काराः साधनभूताः स्युः। यदा हि अलङ्काराः प्राधान्यं भजन्ते तर्हि ते साध्यभूताः भवन्ति। अनेन मूलकथ्यस्य सौन्दर्यमपक्षीयते। अलङ्काराः तावदेव औचित्यं भजन्ते यावत्तेषां प्रयोगः मूलवस्तुनः सौन्दर्यं वर्धयति। काव्यस्यार्थग्रहणे अलङ्काराणाम् अस्तित्वं गौणभूतं स्यात् तर्हि ते शोभाधायकाः भवन्ति। काव्ये अलङ्काराणां विनिवेशः तथाविधः स्यात् तेन सहृदयानां दृष्टौ न ते प्रधानभूताः स्युः। लोञ्जाइनसमहोदयस्याभिमतम् इदमित्थं वर्तते–

It is very brilliancy of the orator's figure which blinds us to the

fact that it is a figure.[8]

काव्ये अङ्गरूपत्वेन अलङ्काराणां विनिवेशः स्यादिति आनन्दवर्धनेन अपि ध्वन्यालोके प्रतिपादितम्–

**रसाक्षिप्ततया यस्य बन्धः शक्यक्रियो भवेत्।**
**अपृथग्यत्ननिर्वर्त्यः सोऽलङ्कारो ध्वनौ मतः॥**[9]

आनन्दवर्धनस्याभिप्रायो वर्तते यद् रसाभिव्यञ्जनार्थं यदा कविः विभावादीन् सङ्घटयति तदा स्वतः स्फूर्तोऽलङ्कारः यदि कश्चित् समुद्भवति; स च रसाभिव्यञ्जनकार्ये अनिवार्यः प्रतीयते चेत् स एव कश्चित्। अन्यत्रापि ध्वनिकारेण स्पष्टीकृतं यदलङ्कारस्यास्तित्वं शब्दार्थरूपस्य काव्यशरीरस्य कटककुण्डलादिबाह्यप्रसाधनवत् स्यात्–

**अङ्गाश्रितास्त्वलङ्काराः विज्ञेयाः कटकादिवत्।**[10]

लोञ्जाइनसप्रतिपादिते औदात्त्यसिद्धान्ते प्रसङ्गानुकूलपदानां भव्यता श्रोतृवर्गम् आह्लादयति। स एतदपि प्रतिपादयति यद् विचाराणां भावानां च आरोहावरोहावधिकृत्य शैली अपि तदनुकूला स्यात्। शैल्याः एकरसता प्रयोक्तुः निर्बलत्वं सूचयति। प्रसङ्गानुकूलानि गभीरार्थवाचकानि पदानि काव्यौत्कृष्ट्यं सृजन्ति। उपयुक्तशब्दानां प्रयोगेण वैचारिकी श्रीवृद्धिर्जायते इति नात्र विसंवादः कश्चित्। श्रुतिरपि शब्दप्रयोगवैशिष्ट्ये इत्थं वदति–

**एकः शब्दः सम्यग्ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके च कामधुग्भवति।**[11]

एनं प्रसङ्गमधिकृत्य आनन्दवर्धनाचार्येण निगदितं यद् ध्वन्युक्तेः विषयी स एव शब्दो भवेद् यः खलु व्यञ्जनामाश्रित्य तच्चारुत्वं प्रकाशयेत् यन्न उक्त्यन्तरेण केनाप्युपायेन प्रकाश्यं स्यात्–

**उक्त्यन्तरेणाशक्यं यत् तच्चारुत्वं प्रकाशयन्।**
**शब्दव्यञ्जकतां बिभ्रद् ध्वन्युक्तेर्विषयी भवेत्॥**[12]

लोञ्जाइनसमहोदयस्य विचारभूमौ शब्दशक्तीनां काचित् परम्परा नासीद्, अत एव पदयोजनायाः चारुत्वमधिकृत्य तेन भावानां आरोहावरोहानुकूल्यं निर्दिष्टम्। एतदेव आनन्दवर्धनाचार्येण शब्दशक्तिपरम्परामाश्रित्य व्यञ्जनावृत्तिमाध्यमेन स्पष्टीकृतम्। आनन्द-वर्धनः एतदपि वदति यत् शब्दाः यदा स्वविषयाद् अन्यस्मिन् कस्मिन्नपि विषये रूढाः भवन्ति तदा ते लावण्यादिशब्दाः ध्वनिस्थानीयाः न भवन्ति। रूढिवशात् लावण्यादिशब्देषु

सत्यपि व्यङ्ग्यार्थे ध्वनेः सत्ता न भवति। लावण्यपदस्य वाच्यार्थो भवति–लवणरसयुक्तम्। लवणरसयुक्तं वस्तु प्रियं भवतीति साम्यमाधारीकृत्य लावण्यशब्दः सौन्दर्यवाचकः स्वीकृतः। लावण्यशब्दो रमणीयतायाः अर्थे रूढः सञ्जातः किं वा सौन्दर्यशब्द एव लावण्यस्य वाच्यार्थो जातः। अत एव ध्वन्यालोककारेणापि समुचितपदप्रयोगः समर्थितः–

**रूढा ये विषयेऽन्यत्र शब्दाः स्वविषयादपि।**
**लावण्याद्याः प्रयुक्तास्ते न भवन्ति पदं ध्वनेः॥**[13]

रचनायाः गरिमा इति शीर्षकमधिकृत्य लोञ्जाइनसमहोदयः एतत् प्रतिपादयति यन्न केवलं पदानां सौन्दर्यं प्रकरणानुकूलत्वमेव च काव्यसौन्दर्यं सृजतः अपितु तेषां पदानां समुचितविन्यासोऽपि अपेक्षितः। लोञ्जाइनसो वदति यद् औदात्त्यसिद्धान्तस्य आधारभूततत्त्वानां विचारभावालङ्कारपदादीनां सामञ्जस्यम् अत्यावश्यकम्। सर्वाण्येतानि तत्त्वानि अङ्गाङ्गिभावेन संयोजितानि स्युः। एतेषाम् अङ्गाङ्गिभावसंयोजना एव औदात्त्यसाधिका भवति। तस्याभिप्रायो वर्तते यद् विचारानुकूलभावानां भावानुकूलपदावलीनां पदानुकूलालङ्काराणां विन्यासो यथायथं भवेदिति विचारणीयः। लोञ्जाइनस एतेषां तत्त्वानां संयोजनं निर्दिशति–यथा हि लयबद्धध्वनिसमन्विता काचिद्वंशी सर्वेषाम् आकर्षणहेतुर्भवति तथैव काचिदपि रचना उपर्युल्लिखितवैशिष्ट्यानां सामञ्जस्यं सहृदयहृदयाकर्षि भवति। लोञ्जाइनस इदमित्थं वदति–

Harmony is an instrument which has natural power, not only to win and to delight, but also in a remarkable degree to exalt the soul and sway the heart of man. When we see that a flute kindles certain emotions in its hearers, rendering them almost beside themselves and full of an orgiastic frenzy, and that by starting some kind of rhythmical beat it compels him who listens to move in time and assimilate his gestures to the tune, even though he has no taste whatever for music...[14]

अभिव्यञ्जनायाः प्रकर्षे लयस्य महत्त्वपूर्णा भूमिका भवतीति स्वीकरोति लोञ्जाइनसः। नृत्ये सङ्गीते वा विनिबद्धो लयः शब्दस्य च लयो भिन्नौ वर्तेते। लोञ्जाइनसः द्वयोः भिन्नत्वं यथायथं व्याख्याति। यथा हि कस्यचित् पदार्थस्य सम्यगनुपातः सुसङ्घटना निर्माण-कौशलं च सौन्दर्यं सृजन्ति तथैव औदात्त्येऽपि तस्य तत्त्वानां सम्यगनुपातः सुसङ्घटनं रचनाकौशलं च अपेक्ष्यन्ते। आनन्दवर्धनोऽपि एतत् प्रतिपादयति यत् काव्यतत्त्वानि सर्वाणि एकात्मभूतानि स्युः परस्परानुस्यूतानि स्युः न च तेषां पार्थक्यं दृश्यमानं स्यात्। यथा हि कस्याश्चिद् विकसितयौवनायाः कामिन्याः चारुमुखस्तनजघनाद्यवयवानां सौन्दर्याद्

विलक्षणलावण्यधारा किं वा सौन्दर्यच्छटा तस्याः अवयवसम्पूर्णतायां विराजते न तु कस्मिन्नपि एकस्मिन्नवयवे–

**प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम्।**
**यत् तत्प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु॥**[15]

लोञ्जाइनसो वदति–

In speech as in the structure of the human body is the collocation of limbs, single one of which, if several from the rest, possesses in itself nothing remarkable, but all units together make a full and perfect organism ... so the constituents of grandeur...[16]

इङ्ग्लैण्डदेशीयस्य प्रख्यातकवेः अलेक्जेण्डरपोपमहोदयस्यापि एतादृश एव विचारो वर्तते–

In wit as nature what effects our hearts is not the exactness of peculiar parts; it is not a lip or eye we beauty call; but the joint force and full result of all.[17]

काव्ये समुचितपदविन्यासः स्यादिति आनन्दवर्धनोऽपि स्वीकरोति। ध्वन्यालोके स कथयति यद् एकमात्रमनौचित्यमेव रसभङ्गस्य कारणम् अस्ति। औचित्यं खलु रसध्वनेः परमावश्यकं तत्त्वमस्ति–

**अनौचित्यादृते नान्यद् रसभङ्गस्य कारणम्।**
**प्रसिद्धौचित्यबन्धस्तु रसस्योपनिषत् परा॥**[18]

काव्यस्याङ्गीभूतं ध्वनिं प्रस्थापयत् तस्याङ्गभूतानां गुणसङ्घटनवृत्त्यलङ्कारादीनां प्रयोगे औचित्यस्य आवश्यकता प्रोक्ता। एतेषां गुणादीनां तत्त्वानां औचित्यपूर्णः सन्निवेशः कविभिः यथायथं ध्यातव्यः। औचित्याद्विहीनाः गुणरसादयो वैरस्यं जनयन्ति। गुणालङ्कारादीनां विधानं तथा स्याद् यथा रसध्वनिः उत्कर्षम् अवाप्नुयात्। एतदेव महाकवेः प्रधानं कर्म–

**वाच्यानां वाचकानां च यदौचित्येन योजनम्।**
**रसादिविषयेणैतत् कर्म मुख्यं महाकवेः॥**[19]

आनन्दवर्धनस्याभिमते रसध्वनिरेव काव्यस्यात्मा। लोञ्जाइनस एवं वाण्याः चरमोत्कर्षं कथयति। कृतिकारस्य कृतेश्च प्रकर्षातिशयः उदात्ततत्त्वस्य कृते आवश्यकः इति लोञ्जाइनस-महोदयो मन्यते। काव्यकारस्यात्मा महान् स्यात्। तस्य हृदये विचाराणां भव्यता भावानामु-

दात्तता च अपेक्ष्यते। क्षुद्रचरित्रः कश्चिज्जनः शाश्वतचमत्कारं जनयितुं सर्वथा अक्षमो भवति काव्यं च सद्यः सहृदयहृदयाह्लादकारि स्याद् येन बहुशः आस्वादितञ्चापि तत् सहृदयहृदयाकाङ्क्ष्यं स्यात्। वस्तुतः प्रत्येकस्मिन् क्षणे तत् काव्यं नवतामाप्नुयादिति। रमणीयतत्त्वानां चैषः गुणः इति महाकविमाघस्यापि मतम्–

**क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः।**

स्वकीयग्रन्थस्य पञ्चत्रिंशत्तमे षट्त्रिंशत्तमे चाध्याये लोञ्जाइनसो विचाराणां विषयाणां महत्त्वं रचनायाश्च कलात्मकत्वं विचारयति। एतेषु त्रिषु तत्त्वेषु किमिदं महत्त्वातिशय्यं भजते इति विचारयन् लोञ्जाइनसमहोदयः प्रतिपादयति यद् विषयस्य गरिमा महत्त्वपूर्णो वर्तते यतो हि एता एव विचारोत्कृष्टताः भावोत्कृष्टताः चित्तं चमत्कुर्वन्ति औदात्त्यं च साक्षात्कारयन्ति। एभिर्गुणैः समन्वितं काव्यम् ईषद्दोषयुक्तमपि स्याच्चेत् ग्राह्यं भवति। काव्यलक्षणे 'अदोषौ' इति पदेन मम्मटोऽपि एतदेव स्वीकरोति। लोञ्जाइनस एतदपि प्रतिपादयति यन्न केवलं कलात्मकशब्दार्थयोजनया कश्चित् कविः औदात्त्यसर्जनाय क्षमो भवति अपितु एतत्कृते चारित्र्यं महदावश्यकम्।

**उपसंहारः**

लोञ्जाइनसहोदयस्य औदात्त्यविषयकमान्यताभिराभिः एतत् सिध्यति यत् प्रकारान्तरेण किं वा शब्दान्तरेण सोऽपि रसध्वनिसम्मतां व्यञ्जनावृत्तिं स्वीकुरुते। शब्दशक्तिदायविहीना तस्य चिन्तनसरणिः किञ्चिद् भिन्नत्वं भजते अत एव सौन्दर्याधायकतत्त्वरूपेण भावविचारादीनां गरिम्णोऽनिवार्यता प्रतिपादिता। भारतीयाचार्याणां ध्वनिविषयकचिन्तने यत्र व्यङ्ग्यस्य प्राधान्यं स्वीक्रियते तत्र पाश्चात्याचार्यैः बिम्बस्य (image) सर्जना आवश्यकी मन्यते। बिम्बं न केवलं शब्दार्थयोः स्थूलं समायोजनं वर्तते अपितु शब्दार्थयोः व्यङ्ग्यार्थरूपं समायोजनं वर्तते। रचनायाः माहात्म्यं प्रदर्शयन् लोञ्जाइनसो बिम्बयोजनायाः यत् तथ्यं निर्दिशति तच्च प्रकारान्तरेण व्यञ्जना एव वर्तते। अलङ्काराणां प्रयोगे तु द्वयोः आनन्दवर्धनलोञ्जाइनसयोः मतैक्यं पूर्णत्वेन दृश्यते। निश्चयेन यद्व्यङ्ग्यं समाश्रित्य काव्यम् उत्कृष्टतां भजते तद्वदेव लोञ्जाइनसप्रतिपादितस्य उदात्ततत्त्वस्य स्वरूपं वर्तते। औदात्त्यप्रतिष्ठायाम् आत्मनः उत्कर्षं संस्थापयन् लोञ्जाइनसः उत्कृष्टकाव्यसर्जनायाम् आध्यात्मिकाधारं परिपोषयति। तस्यैतद् अभिमतं रससिद्धान्तस्य नैकट्यमवाप्नोति यत्र रसानुभूतिः आत्मनः उत्कर्षम् आत्मानन्दो वेति व्याख्यातृभिः शब्दशक्तिपरम्परामाश्रित्य भारतीयाचार्यैः यो ध्वनिरित्यभिधीयते स एव लोञ्जाइनसदृष्ट्या औदात्त्यं किं वा अभिव्यञ्जनायाः अनिर्वचनीयप्रकर्ष इति नाम्ना निर्दिश्यते।

**

**सन्दर्भाः–**


1. Longinus on the Sublime (W.Rhys Roberts), p.43
2. Ibid, p.61
3. ध्वन्यालोकः, 1.4
4. तत्रैव, 1.6
5. तत्रैव, 1.6 वृत्तिः
6. Longinus on the Sublime (H.L.Havell), p.20
7. ध्वन्यालोकः, 1.5
8. L.O.S. (H.L.Havell), p.41
9. ध्वन्यालोकः, 2.16
10. ध्वन्यालोकः, 2.6
11. म.भा.पस्पशाह्निकम् (प्रदीप)
12. ध्वन्यालोकः, 1.5
13. ध्वन्यालोकः, 1.16
14. Longinus on the Sublime (H.L.Havell), p.73-74
15. ध्वन्यालोकः, 1.4
16. Longinus on the Sublime (W.Rhys Roberts), p.145-147
17. Essay on criticism, p.8
18. ध्वन्यालोकः, 3.14 वृत्तिः
19. ध्वन्यालोकः, 3.32


**

## किञ्चिद् रामायणीयम्

*** विश्वामित्रद्वारा श्रीरामाय प्रदत्तानि दिव्यास्त्राणिः**

(क) (1) दण्डचक्रम्, (2) धर्मचक्रम्, (3) कालचक्रम्,
(4) विष्णुचक्रम्, (5) ऐन्द्रचक्रम्।

(ख) (1) वज्रम् अस्त्रम् (इन्द्रस्य), (2) शूलवरम् (शैवम्), (3) ब्रह्मशिरः,
(4) ऐषिकास्त्रम्, (5) ब्राह्मम् अस्त्रम्।

(ग) मोदकी शिखरी चेति द्वे गदे।

(घ) (1) धर्मपाशः, (2) कालपाशः, (3) वारुणः पाशः

(ङ) द्वे अशनी – शुष्कः आर्द्रः च।

(च) पिनाकास्त्रम्, नारायणास्त्रम्, शिखरम् इति नामकम् आग्नेयास्त्रम्, हयशिरः (अस्त्रम्), कङ्कालम्, मुसलम्, कापालम्, किङ्किणी, नन्दनम् इति नामकं विद्याधाराणाम् अस्त्रम्, सम्मोहनम् इति नामकं गान्धर्वम् अस्त्रम्। प्रस्वापनम्, प्रशमनम्, सौम्यं च (अस्त्रम्)

(छ) असिरत्नम्

(ज) एतान्यपि अस्त्राणि–

(1) वर्षणम्, (2) शोषणम्,
(3) सन्तापनम्, (4) विलापनम्,
(5) कन्दर्पस्य प्रियं मादनम्, (6) गन्धर्वाणां प्रियं मानवास्त्रम्,
(7) पिशानां प्रियं मोहनम् अस्त्रम् (8) तामसम्,
(9) सौमनम्, (10) संवर्तम्,
(11) दुर्धर्षम्, (12) मौसलम्,
(13) सत्यम्, (14) मायामयम्,
(15) सूर्यस्य तेजःप्रभं नाम परतेजोऽपकर्षणम् अस्त्रम्।
(16) सोमास्त्रम्।
(17) त्वष्टुः प्रियं त्वाष्ट्रम् अस्त्रम्।
(18) भगस्य दारुणम् अस्त्रम्।
(19) मनोः शीतेषुनामकम् अस्त्रम्।

एतानि सर्वाणि राघवस्य किंकराः इव स्थिताः।

**बालकाण्डम् 27**

# योगधर्मशास्त्रसम्बन्धः-एकम् अध्ययनम्

**डॉ. सुश्री सस्मिता पतिः**

**शोधसारः**

भारतीयदर्शनसाहित्ये योगदर्शनस्य स्थानं विश्वप्रसिद्धम्। न केवलं दर्शनशास्त्रेषु अपितु वेदोपनिषत्पुराणस्मृत्यादिष्वपि योगतत्त्वानां समुल्लेखः प्राप्यते। योगेनैव मानवस्य चित्तं निर्मलं शुद्धं स्थिरञ्च भवितुमर्हति। एवं योगसाधनेन योगी चित्तवृत्तिमपहाय पारमार्थिकसुखं मोक्षं चानुभवति। ब्रह्मरहस्योन्मोचनकारिणां कृते पातञ्जलयोगदर्शनं बहुमूल्य-निधिस्वरूपम्। नास्ति योगसमं बलमिति सर्वथा प्रमाणितम्।

स्मृतिग्रन्थः भारतीयशास्त्रपरम्परायां प्रमुखस्थानमावहति। स्मृतिः श्रुतिमूला तथा धर्मोपदेशप्रधाना। तथा चोच्यते–**श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिः।** स्मृतेः श्रुतिमूलत्वात् मन्वादिस्मृतीनां प्रमाण्यं स्थापितं भवति। यदि च श्रुतिस्मृत्योः एकस्मिन्नर्थे विरोधः प्रतीयते, तत्र श्रौतः अर्थ एव साधीयान् इति निर्णीतः। धर्मशास्त्रपरेषु स्मृतिसूत्रग्रन्थेषु धर्मस्य सुविशदं व्याख्यानं समुपलभ्यते।

योगशास्त्रं धर्मशास्त्रं च परिपूरकमेव। यत्र योगशास्त्रेषु धर्म–मोक्ष–अष्टाङ्गयोगादिविषये नियमाः उपायाश्च वर्णिताः, तत्र धर्मशास्त्रेषु एतेषां महदुपयोगितानां फलप्राप्त्यादीनां च वर्णनमस्ति।

अस्मिन् शोधप्रबन्धे योगधर्मशास्त्रयोः स्वरूपम्, महत्त्वम्, भेदाः, एतयोः मानवजीवने प्रभावः इत्यादिविषयाः पर्यालोचिताः। साम्प्रतिकसमाजे धर्मशास्त्रविधिषु योगशास्त्रस्य प्रभावः शास्त्रोदाहरणैः प्रमाणितः।

(**कूटशब्दाः–**योगः, धर्मः, आचारः, आचार्यसेवा, ब्रह्मचर्यम्।)

**उपोद्घातः–**भारतीयसंस्कृतसाहित्येषु योग–धर्मशास्त्रयोः स्थानं महत्त्वपूर्णम्। यत्र योगः समाजे आध्यात्मिकचेतनायाः परिवर्धकः, तत्र धर्मशास्त्रं मानवसमाजस्य मार्गनिर्देशकः।

एतयोः सम्बन्धमात्रया जगति भगवदाराधनया सह नित्यनैमित्तिककर्मणां सम्यक् सम्पादनम् अपि भवति। यदि वा योगशास्त्रम् आस्तिकदर्शनस्य पृष्ठपोषकतुल्यं तथापि अस्मिन् शोधप्रबन्धे धर्मशास्त्रग्रन्थेषु योगस्य प्रभावः विदुषां ज्ञानवर्धनाय उल्लिखितः।

**योगशास्त्रस्य स्वरूपं वैशिष्ट्यञ्च**

**1. स्वरूपम्—**योगशास्त्रं शरीर–मनस्–आत्मा इति त्रयाणां संयोजकज्ञानोद्दिष्टम्। योगः इति शब्दः युज् धातोः (रुधादि वर्गस्य धातुः) घञ् प्रत्यययोगात् निष्पन्नः। अस्यार्थः भवति संयोजनम्, मेलनम्, सम्बन्धः। जीवपरमात्मयोः स्थापनमिति अस्य लक्ष्यमस्ति। सायणाचार्यस्य मतानुसारं योगशब्दस्यार्थः अप्राप्तेः प्राप्तिलाभः वर्तते।[1] पुराण–महाभारतादिषु ऐतिहासिकग्रन्थेषु योगदर्शनस्योल्लेखः सांख्यदर्शनेन साकं लभते। अतः सांख्ययोगयोः पारस्परिकसम्बन्धः प्रसिद्धः।[2]

योगः इति शब्दस्य प्रयोगः बहुविधार्थेषु दृश्यते।[3] वैदिककालात् पूर्वं योगाभ्यासस्य प्रचलनमभवत्। योगः क्रियायोगः, भक्तियोगः, कर्मयोगः, पुंयोगः इत्यादयः शब्दाः योग-सिद्धान्तानां भिन्नमतानि प्रकाशयन्ति। पाणिनेः अनुसारेण योगशब्दस्यार्थः समाधिः इति व्यासेनोक्तम्। योगदर्शनस्य प्रयोगः न केवलं हिन्दुधर्मे अपितु बौद्ध–जैन–शैव–शाक्तादि–धर्मेष्वपि समुपलभ्यते।

**2. वैशिष्ट्यम्—**योगतत्त्वस्य प्रधानलक्ष्यमस्ति–

* योगः दर्शनस्य अन्यतमः सम्प्रदायः।
* योगाभ्यासेन शरीर–आत्मा उभयोः परिचालनं सम्भवति।
* योगशास्त्रं न्याय–वैशिषिकशास्त्रस्य पथप्रदर्शकम्।
* योगः हठ–मन्त्र–लयव्यवस्थानां संयोजकः।
* योगः शरीरेषु आत्मप्रवेशकरणार्थं व्यवस्थापकः।

**3. प्रकारभेदाः—**योगचतुष्टयस्य वर्णनं योगशास्त्रे विद्यते। यथा–

**मन्त्रयोगः—**इदं मनोविज्ञानं भवति। जन्म–मरणयोः एकाग्रमननात् मन्त्रयोगस्य प्राप्तिः सम्भवति। शिवप्रोक्ततन्त्रागमस्य सम्यक् साधनोपायः भवति मन्त्रयोगः।

**लययोगः—**गुरूपदिष्टोपदेशेन पिण्डगतज्ञानलाभो भवति। वैज्ञानिकक्रियया पुरुष–प्रकृत्योः विलयो भवति लययोगः।

**राजयोगः—**स्वकीयोज्जीवितचेतनया परमात्मप्राप्तिविधिः भवति राजयोगः।

**हठयोगः—**अयं भवति शारीरिक–मानसकिशक्तिवर्धनार्थं शारीरिकाभ्यासः।

**भक्तियोगः—**मनसि स्थितम् ईश्वरं प्रति आत्मसमर्पणभावगतः भक्तियोग इति ज्ञेयः। श्रद्धाविश्वासादीनां ब्रह्मसान्निध्यप्राप्तिरेव भक्तियोगस्य महत्त्वम्।

**कर्मयोगः—**स्वार्थत्यागपूर्वकं निष्कामेण आत्मना सह कृतं कार्यं कर्मपदवाच्यम्। कर्मयोगे स्वधर्मपालनं प्रमुखम्।

**राजयोगः—**मानसिकशक्तिमाध्यमेन जीवात्म–परमात्ममध्ये सम्पर्कस्थापनं राजयोगस्य विषयः। महर्षिपतञ्जलिकृते योगसूत्राख्ये ग्रन्थे अष्टाङ्गयोगस्य उल्लेखः प्राप्यते। यथा– यम–नियम–आसनादयः।

**धर्मशास्त्रस्य परिचयः तन्महत्त्वं च—**

भारतीयसंस्कृतिषु धर्मशास्त्रस्य नितरां प्रसिद्धिरस्ति। धृ इति धारणार्थे धातोः मनिन् प्रत्यययोगात् निष्पन्नस्य धर्मशब्दस्य लक्षणं संस्कृतसाहित्यं विहाय अन्येषु शास्त्रेषु न लभ्यते। धर्मशब्दस्य अर्थः न्यायः यः समाजकल्याणकारिजीवनयापनपद्धतिं निर्दिशति।

धर्मशास्त्रं शासनव्यवस्थायाः मूलाधारः। प्रजापालने धर्म एव संरक्षकः। महाभारतस्य कर्णपर्वणि यथोक्तम्–

**धारणाद् धर्म इत्याहुर्धर्मो धारयते प्रजाः।**
**यत् स्याद् धारणसंयुक्तं स धर्म इति निश्चयः।।**[4]

धर्मशास्त्रस्य विषयाः प्रमुखतया त्रिविधाध्यायेषु समावेशिताः।

**1. आचाराध्यायः—**शास्त्रप्रोक्तं आचरणम् आचारः। अस्मिन् सामाजिकजीवने, गृहे च संस्काराणां नियमाः अनुसरणयोग्याः।[5]

आचारविहीनः मनुष्यः पापी तथा दुःखी भवति। सदाचारी सदाचारैः संस्कारैश्च सदा इष्टार्थसिद्धिं लभते। आचारप्रसङ्गे वर्णधर्मः, आश्रमधर्मः, संस्काराः च आलोचिताः।

**2. व्यवहाराध्यायः—**धर्मशास्त्रेषु व्यवहारभागः प्रमुखः। व्यवहारप्रकरणे लौकिकालौकिकव्यवहारयोग्यविषयाः वर्णिताः। स्मृतिसूत्राणामनुसारं न्यायप्राप्त्यर्थं वेदगतज्ञानानां, सत्यवादिनां, न्यायदर्शिनां सम्मेलनमावश्यकम्। राजशासनगतः राजधर्मः व्यवहारोचितधर्मः भवतीति शास्त्रेषु उल्लिखितः। दायभागः, ऋणादानं, वेतनदानकर्म, क्रयविक्रयः, सीमानिर्णयः, दण्डविधानं, स्तेयम्, स्त्रीपुंधर्मादयः आलोच्यविषयाः।

**3. प्राचश्चित्ताध्यायः—**प्रायश्चित्तशब्दस्यार्थः भवतीति पश्चात्तापजनितं मनः।[6]

प्रायश्चित्तविषये जपतपः–कृच्छ–अतिकृच्छचान्द्रायणादिव्रतानां नियम–विधिक्रमाणां समालोचनमत्र लभ्यते। हननम्, अभक्ष्यभक्षणं, मिथ्यावाचनम् इत्यादिविषयेषु प्रायश्चित्तपरि-पालनस्य स्पष्टोक्तिः प्राप्यते।

**महत्त्वम्–**धर्मशास्त्रस्य मूलोद्देश्यानि सन्ति–

* समाजे मानवस्य कर्तव्यपालनगतनियमसाधनम्।

* स्वपरराष्ट्रेषु सौहार्द्रस्य तथा च साम्यस्य सुस्थापनम्।

* आध्यात्मिकचेतनैः ईश्वरसानिध्यानुभूतिः।

* संसारे धर्म–नीतिविचारधारायाः संरक्षणम्।

* मानवस्य नित्यकर्मादीनां प्रचारः प्रसारश्च।

* राजशासने दण्डविधानव्यवस्थामाध्यमेन शान्तिसंरक्षणम्।

**भेदाः–**धर्मशास्त्रस्य मूलतत्त्वरूपेण धर्मस्य प्रकारभेदाः शास्त्रेषु प्राप्यन्ते। तेषु मुख्यतः धर्मः द्विविधः।

**( क ) सामान्यधर्मः–**स्मृतिकाराः सामान्यधर्मप्रसङ्गे अहिंसा–सत्य–शौच–इन्द्रियनिग्रहादीनां मानवजीवने एतेषाम् उपस्थितिः अत्यावश्यकी इति प्रमाणितवन्तः।[7]

सामान्यधर्मः न केवलं चतुर्वणानां कृते अपि तु सर्वेषां मनुष्याणां कृते उद्दिष्टः।

**( ख ) विशेषधर्मः–**काले–काले जीवनपरिधारणाय देशावस्थानकृते च विशेषधर्माणाम् आवश्यकता अनुभूयते। मनुस्मृतौ विशेषधर्मः वर्ण–आश्रम–नैमित्तिक–राज–युग–पुरुष–स्त्री–प्रवृत्ति–निवृत्तिभेदेषु निर्दिष्टः।

**योग–धर्मशास्त्रयोः समावेशः**

संस्कृतसाहित्ये प्रमुखसम्प्रदायेषु योगशास्त्र–धर्मशास्त्रयोः सम्बन्धः दुर्लभः। यद्यपि बाह्यलक्षणे एतेषु मतभेदः परिलक्ष्यते, परन्तु धर्मशास्त्रेषु योगशास्त्रस्य बहुलः प्रभावः प्राप्यते। इदानीमत्र द्वयोः शास्त्रयोः समावेशगतविषयाः प्रमुखतया आलोच्यन्ते।

**1. ब्रह्मज्ञानसिद्धिः–**योगशास्त्रमते ज्ञानस्याधारः ऐश्वरिकसान्निध्यं भवति। ब्रह्मस्वरूप-ज्ञानम् आत्मतत्त्वसाधनम् एव सर्वोच्चज्ञानम्। उपनिषदि, योगसूत्रे, पुराणे ब्रह्मप्राप्त्युपायविषयः स्पष्टः। धर्मशास्त्रकाराः अपि वैदिकज्ञानार्जनार्थं प्रोत्साहनं कुर्वन्ति स्मृत्यादिग्रन्थेषु। मनुस्मृतौ अस्ति[8] यत् सर्वशास्त्रज्ञानोपकारकाः वेदाः। वेदेषु आत्मज्ञानविचारः सूत्ररूपेण मन्त्ररूपेण वा प्रदत्तः। धर्मशास्त्रेषु वैदिकज्ञानाधाररीत्या पुण्यार्जनं भवतीति उपदेशाः प्रदत्ताः।

आपस्तम्बधर्मसूत्रं योगस्य पराकाष्ठां प्रदर्श्य कथयति यत् मनुष्यस्य सर्वदोषाणां नाशो भवति योगाभ्यासेन। मोक्षाकाङ्क्षी सदा दोषाणां मूलोत्पाटनं कृत्वा शान्तिं लभते।[9] याज्ञवल्क्यस्मृतौ योगेन आत्मदर्शनमेव परमो धर्मः इति लिखितम्।[10] ब्रह्मात्मज्ञानस्य कारणानि सन्ति वेदाध्ययन–यज्ञ–ब्रह्मचर्य–तपः–दम–श्रद्धा–उपवास–स्वातन्त्र्यादयः इति।[11]

**2. कर्तव्यविवेकः–**कर्मयोगविचारप्रसङ्गे योगशास्त्रे वर्णनमस्ति यत् परमेश्वरः पुरुष एव क्लेशात्, कर्मफलभोगात् तथा स्वेच्छायाः भिन्नः भवति। साधारणतः ईश्वरः कर्मसंयुक्तः परन्तु कर्मफलभोगात् प्राप्तेर्वा भिन्नः।[12] कर्मयोगे मानवः ब्रह्मसान्निध्यप्राप्त्यर्थं मनोयोगपूर्वकं सर्वेभ्यः सेवाप्रदानं कुर्यादिति निर्दिष्टम्। निष्कामयोगी कर्मफलं विना पुण्यार्जनं कृत्वा देहत्यागानन्तरम् स्वर्गमुखं लभते इति शास्त्रेषु वर्णितमस्ति। यदि मनुष्यः प्रतिदिनं परिपूर्णनिष्ठया एवं च भक्तिभावेन सह स्वधर्मे व्यापृतोऽस्ति, तर्हि स न केवलं पुण्यार्जनं करोति अपरं तु मोक्षमार्गे अपि अग्रेसरो भवति।

धर्मशास्त्रेष्वपि स्वधर्म–कर्माचारविधिः आलोचितः। मनुस्मृतौ वर्णधर्मप्रसङ्गे महर्षिः कथयति यत् यः मनुष्यः यस्य वर्णस्यौचित्यानुसारं स्वधर्मं पालयति, तस्य कर्मफलं स्वस्य बाह्याभ्यन्तरं पवित्रीकरोति।[13] अत्र स्पष्टं जायते यत् वेदोक्तकर्म मानवानां कृते अनुसरणयोग्यम्। वेदोक्तं यजनं, याजनं, अध्यापनादीनि कर्माणि मानवस्य मुख्यधर्मः स्यात्।

महाभारतस्य शान्तिपर्वणि योगिजैगीषव्यगृहस्थासितयोः मध्ये कथोपकथने स्पष्टमुल्लिखितं यत् योगाचरणे व्यापृताः संन्यासिनः अन्यजनानां निन्दां प्रशंसां वा न कुर्वन्ति न वा शृण्वन्ति। एतत् तु योगस्य प्रभाव इति।[14]

**3. सत्याहिंसाचारः–**अहिंसा सत्यञ्चेति शब्दद्वयं पतञ्जलियोगसूत्रानुसारेण अष्टाङ्गयोगेषु अंशभूतमेव।[15] पतञ्जलिना स्पष्टम् उपदिष्टं यत् अहिंसायाः प्रतिष्ठामात्रेण वैरस्वभावस्य निवारणं भवति। सत्यवचनमात्रेण योगी मनोवाच्छितफलानां अधिकारी भवति।

अहिंसासत्याचरणाभ्यासमात्रेण मनुष्यः साधकः इति आख्यायते। परमेश्वरस्य ज्ञानं केवलं पूजार्चनया असम्भवम्। अपरन्तु अहिंसा–सत्याचरणेन योगी ईश्वरस्य प्रत्यक्षीकरणं लभते। धर्मशास्त्रेऽपि उक्तमस्ति–

**अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः।**
**एतं सामासिकं धर्मं चातुर्वर्ण्येऽब्रवीन्मनुः॥**[16]

जगति चतुर्वर्णैः अहिंसा–सत्य–शौचादिमाध्यमेन स्वकर्म–धर्मस्य निर्वहणं साधितव्यम्।

एतैः संसारे शान्तिः समताभावश्च सर्वदा विराजिष्येते। महाभारते योगेन धर्मानुकुलाचरणेन स्त्रीपुरुषाणां मोक्षप्राप्तिः सम्भवा इति वर्णितमस्ति।[17]

स्मृतौ राजधर्मप्रसङ्गे राजा सत्यवादी भवेदिति कथितम्। सत्यसन्धाता राजा अहिंसा-धैर्यानसूयाभिः सुशासकपदयोग्यः भवतीति वर्णितमस्ति परन्तु यदा दुर्बलानां रक्षणार्थं युद्धमावश्यकं, तदा अहिंसां परित्यज्य शत्रूणां संहारार्थं युद्धं करणीयम्। राज्यस्य समुन्नतिः प्रजारञ्जने अस्तीति राजा सर्वदा जानीयादिति महाभारतस्योक्तिः स्पष्टं करोति।[18]

**4. सदाचारः–**योगस्य आचारः भवति सदाचारः (सज्जनानां आचारः) यम–नियमयोः पालनमात्रेण सदाचारः लभ्यते। सदाचारत्वात् मनसि स्थितौ रजस्तमोगुणौ दूरीभूतौ भवतः। योगशास्त्रे सत्य–शौच–अहिंसा–इन्द्रियनिग्रहादयः सदाचारप्रसङ्गे परिदृश्यन्ते।

धर्मशास्त्रे धर्मस्य लक्षणेषु सदाचारः अन्यतमः।[19] मनुस्मुतिकारानुसारं सदाचारः इत्युक्ते साधूनां गृहीतः आचरणविधिः इति बोध्यते। दक्षस्मृतिः योगध्यानेषु विचक्षणः योगी यस्मिन् देशे भवति स देशः पवित्रतमः भवतीति कथयति।[20] पुनश्च शान्तिपर्वणि योगस्य पञ्चदोषानां निराकरणमपि आलोचितम्।[21]

**5. आचार्यसेवा–**योगाचरणम् आचार्यसेवां विना असम्पूर्णम्। आचार्यं प्रति श्रद्धाभावः मानवकृते आशीर्वादरूपः भवति। आचार्यस्य आशीर्वादेन आत्मतत्त्वस्य गूढसिद्धिः सम्भवति। आचार्यः एव आत्म–ब्रह्मज्ञानस्य पथप्रदर्शनकारी। गुरोः निर्देशपालनेन आचार्येष्वपि ब्रह्मदर्शनस्य सौभाग्यं लभते। आचार्यसेवा निःश्रेयससाधनेषु अन्यतमा इति स्मृतिभिः प्रमाणिता।[22]

धर्मशास्त्रेषु गुरुः, आचार्यः, शिक्षकः इत्येतेषां पदानां विस्तृतालोचना प्राप्यते। मनुस्मृत्यनुसारं गुरुः पितुरपि गरीयान्।[23] यतः मनुष्यः ब्रह्मज्ञानलाभात् इहलौकिकं पारलौकिकं च शाश्वतजीवनमनुभवति। आचार्यः पितृतुल्यः स्नेहशीलः संयमी च भवति। गुरोः अनुगमनकारी ईश्वरसान्निध्यप्राप्तियोग्यः भवतीति शास्त्रमतम्।

**6. ब्रह्मचर्य–संन्यासाचरणम्–**योगशास्त्रे आलोचितं यमनियमासनरूपं मुख्याङ्गं ब्रह्मचर्याश्रमे अभ्यस्येत्। ब्रह्मचर्यं शारीरिक–मानसिकभेदेन द्विविधम्। शारीरिकब्रह्मचर्ये कामक्रोधलोभादिरिपूणां विनाशपूर्वकं संयमाचरणं तथा मानसिकक्षेत्रे लोभमायाविरहितः स्वभावः ब्रह्मचारिणः लक्षणं भवति। ब्रह्मचर्यप्रतिष्ठायां सिद्धिरूपं वीर्यं लभते।[24] संन्यासिनां कृते मानापमानौ न हि प्रीत्युद्वेगकारकौ अपरं तु सिद्धिकारकौ। अपमानः तु अमृतं मानः तु विषसदृश इति मार्कण्डेयपुराणस्य योगिधर्माचारमतम्।[25]

धर्मशास्त्रे ब्रह्मचर्याश्रमः चतुर्विधाश्रमेषु अन्यतमः। सर्वप्रथमम् आश्रमरूपेण स्वीकृतं ब्रह्मचर्याश्रमस्य मूललक्ष्यमस्ति वेदपठनपाठनादिकार्यैः मनुष्यस्य प्रकृष्टज्ञानोदयः। ब्रह्मचर्याश्रमे प्राप्तं ब्रह्मात्मज्ञानम् अग्रिमे आश्रमे भगवच्चेतनायाः आधारशीलारूपेण व्यवह्रियते। ब्रह्मचर्याश्रमे स्थितानाम् आसनादीनाम् उपयोगः भेदाश्चापि स्मृतौ वर्णिताः।

**उपसंहारः**

धर्मयोगशास्त्रयोः सम्मिश्रणसंस्कारैः मानवस्य आध्यात्मिकजागरणं सम्भवति। योगशास्त्रस्य शैली क्रियात्मिका परन्तु धर्मशास्त्रस्य शैली उपदेशात्मिका। योगः शरीरमानसिकगतिधर्मी परन्तु धर्मशास्त्रं आचारगतिधर्मि। उभौ परस्परं परिपूरकरूपेण कार्यं कुरुतः। दैनन्दिनजीवने एतयोः सौहर्द्यं मानवजन्मनः सार्थकत्वं प्रमाणीकरोति।

**

**सन्दर्भाः–**


1. ऋग्वेदः, 1.52
2. पञ्चविंशतितत्त्वानि तुल्यान्युभयतः समम्।
   योगे सांख्येऽपि च तथा विशेषांस्तत्र मे शृणु।। महाभारतम्, शान्ति., 228.28
3. अध्यात्मिकान् योगाननुतिष्ठेन्न्यायसंहितानानैश्चारिकान्। आपस्तम्बधर्मसूत्रम्, 1.8.1
4. महाभारतम्, कर्णपर्व
5. आचारः परमो धर्मः श्रुत्युक्तः स्मार्त एव च। मनुस्मृतिः, 1.108
6. प्रायो नाम तपः प्रोक्तं चित्तं निश्चय उच्यते।
   तपो निश्चयसंयुक्तं प्रायश्चित्तमिति स्मृतम्।। अङ्गिरास्मृतिः, 4.1
7. अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः।
   एतं सामासिकं धर्मं चार्तुवर्ण्येऽब्रवीन्मनुः।। मनुस्मृतिः, 10.63
8. सर्वोऽभिहितो वेदे। मनुस्मृतिः, 2.7
9. दोषाणां तु निर्घातो योगमूल इह जीविते।
   निर्हृत्य भूतदाहीयान् क्षेमं गच्छति पण्डितः।। आपस्तम्बधर्मसूत्रम्, 1.8.23.3
10. अयं तु परमो धर्मो यद् योगेनात्मदर्शनम्। याज्ञवल्क्यस्मृतिः, 1.8

11. वेदानुवचनं यज्ञो ब्रह्मचर्यं तपो दमः।
श्रद्धोपवासः स्वातन्त्र्यमात्मनो ज्ञानहेतवः।। याज्ञवल्क्यस्मृतिः, 3.193
12. क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः। पातञ्जलयोगसूत्रम्, 1.2
13. वैदिकैः कर्मभिः पुण्यैर्निषेकादिर्द्विजातीनाम्।
कार्यः शरीरसंस्कारः पावनः प्रेत्य चेह च।। मनुस्मृतिः, 2.26
14. महाभारतम्, शान्तिपर्व, 222
15. अहिंसाप्रतिष्ठायां तत्सन्निधौ वैरत्यागः।
सत्यप्रतिष्ठायां क्रियाफलाश्रयत्वम्।। योगसूत्रम्, 2.35-36
16. मनुस्मृतिः, 10.63
17. महाभारतम्, शान्तिपर्व, 232.32
18. प्रजासुखे सुखं राज्ञः प्रजानां च हिते हितम्।
नात्मप्रियं राज्ञः प्रजानां तु प्रियं हितम्।। अर्थशास्त्रम्, 1.19
19. वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः।
एतच्चतुर्विधं प्राहुः साक्षाद्धर्मस्य लक्षणम्।। मनुस्मृतिः, 2.12
20. यस्मिन्देशे वसेद्योगी ध्यायी योगविचक्षणः।
सोऽपि देशो भवेत्पूतः किं पुनस्तस्य बान्धवाः।। दक्षस्मृतिः, 7.85
21. योगदोषान् समुच्छिद्य पञ्च यान् कवयो विदुः।
कामं क्रोधं च लोभं च भयं स्वप्नं च पञ्चमम्।। महाभारतम्, शान्तिपर्व, 232.4
22. वेदाभ्यासस्तपो ज्ञानमिन्द्रियाणां च संयमः।
अहिंसा गुरुसेवा च निःश्रेयसकरं परम्।। मनुस्मृतिः, 10.83
23. उत्पादकब्रह्मदात्रोर्गरीयान्ब्रह्मदः पिता।
ब्रह्मजन्म हि विप्रस्य प्रेत्य चेह च शाश्वतम्।। मनुस्मृतिः 2.146
24. ब्रह्मचर्यप्रतिष्ठायां वीर्यलाभः। मनुस्मृतिः, 2.38
25. मानापमानौ यावेतौ प्रीत्युद्वेगकरौ नृणाम्।
तावेव विपरीतार्थौ योगिनः सिद्धिकारकौ।।
मानापमानौ यावेतौ तावेवाहुर्विषामृते।
अपमानोऽमृतं तत्र मानस्तु विषमं विषम्।। मार्कण्डेयपुराणम्, 38.2-3

**

# व्याकरणादिशास्त्राभिमतं लिङ्गपदार्थविवेचनम्

**डॉ. शेषमणिशुक्लः**

समग्रस्यापि शास्त्रस्य कश्चन विशिष्टः सिद्धान्तो विद्यते। तमेव सिद्धान्तम् अवलम्ब्य शास्त्राणि प्रवर्तन्ते, अथ च तत्तच्छास्त्रेषु अन्ये नैकविधाः पदार्थाः विवेचितास्सन्ति तेष्वन्यतमः लिङ्गपदार्थः। व्याकरणन्यायमीमांसोत्तरमीमांसादिग्रन्थाध्ययनकाले साक्षादेतद्दृष्टमस्माभिर्यत् पूर्वोक्तेषु शास्त्रेषु लिङ्गपदार्थस्य महती परिचर्चा विद्यते। अत एष लिङ्गपदार्थः अवश्यं विवेचनीयः इति प्रसङ्गतः सम्प्राप्तं तदेवेदानीं विविच्यते–भ्वादिगणस्थात् लिगि गत्यर्थकेत्यस्माद्धातोः अच् प्रत्यये विभक्त्यादिकार्ये च कृते सति लिङ्गशब्दः निष्पद्यते। ''**पुंसोऽसाधारणचिह्ने उपस्थेन्द्रिये**'' इत्यमरः। ''**लीनमर्थं गमयतीति लिङ्गम्**'' चिह्नम्, ज्ञापकम्, अवबोधकम्, हेतुकम् इत्यपरपर्यायः लिङ्गशब्दस्य। शब्दधर्मिक-विभागविशेषः लिङ्गम्। लौकिकव्यवहारनिर्वाहार्थं व्याकरणशास्त्रे शब्दस्य स्त्रीपुम्–नपुंसक-भेदेन त्रिधा विभागः पुंसस्त्रीक्लीबरूपः कृतो विद्यते तत्रापि–अजन्तहलन्तभेदेन द्वेधा विभागोऽवलोक्यते तद्यथा–केचन पुँल्लिङ्गाः शब्दाः–

**रामो हरिः करी भानुर्मरुत्कर्ता च चन्द्रमाः।**
**विद्वाँश्च भगवानात्मा दशैते पुंसि नायकाः॥**[1]

श्रीमता भट्टोजिदीक्षितेन वैयाकरणसिद्धान्तकौमुद्याम् अजन्तपुँल्लिङ्गप्रकरणे हलन्त-पुँल्लिङ्गप्रकरणे च अकारादिक्रमेण नानाविधाः पुँल्लिङ्गशब्दाः प्रक्रियापूर्वकं प्रदर्शिताः। तेषु नानाविधेषु पुँल्लिङ्गशब्देषु केचिदिमे प्रतिनिधिभूताः प्राधान्येन परिगणिताः रामादिशब्दाः सन्ति। सप्तसु विभक्तिषु यथा एतेषां रामादिशब्दानां रूपाणि प्रदर्शितानि सन्ति तथैवान्येषा-मकारादिपुँल्लिङ्गशब्दानां रूपाणि प्रचलन्तीति निष्कर्षः। एवमेव स्त्रीलिङ्गे नपुंसकलिङ्गेऽपि सर्वैरवधेयम्। तथा च प्रतिनिधिभूताः स्त्रीलिङ्गशब्दा नपुंसकलिङ्गशब्दाश्चाधो निर्दिष्टास्सन्ति येषां पारायणेन विधिवदभ्यासेन चान्येऽपि–स्त्रीलिङ्गनपुंसकलिङ्गशब्दाः सौकर्येणावगन्तुं शक्यन्ते।

केचित् स्त्रीलिङ्गशब्दाः–

**रमा रुचिर्नदी धेनुर्वाक्स्त्रीश्रीगौर्वधूस्तथा।**

**क्षुत्प्रावृट् च शरच्चैव द्वादश स्त्रीषु नायकाः।।**[2]

केचिन्नपुंसकाः प्रमुखाः शब्दाः–

**ज्ञानं दधि पयो वर्म धनुर्वारि जगत्तथा।**

**मधु नाम मनोहारि दशैतानि नपुंसके।।**[3]

एतदतिरिक्तम् अव्ययप्रकरणे अव्ययपदानि परिगणितानि सन्ति तानि च सर्वेषु लिङ्गेषु सर्वासु विभक्तिषु सर्वेषु वचनेषु च विकृतिं न प्राप्नुवन्ति। अनेन ज्ञायते स्वरादीनां निपातानां सर्वेषामप्यव्ययपदानाञ्च सर्वत्र समानमेव स्वरूपमवलोक्यते। तदुक्तं ग्रन्थकारेण–

**सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु।**

**वचनेषु च सर्वेषु यन्न व्येति तदव्ययम्।।**[4] इति।।

लिङ्गं हि लोकव्यवहारहेतुः लिङ्गज्ञानं विना लोके शब्दव्यवहारः न कर्तुं पार्यते। अथ व्याकरणशास्त्रे शब्दस्य द्विधा विभागः कृतो विद्यते। यथा–शब्दप्रकृतिकः धातु-प्रकृतिकश्च। तत्राद्यः लिङ्गसहितः विभागः, द्वितीयः लिङ्गरहितः विभागः, किञ्च लिङ्गपरिज्ञानं विना शब्दव्यवहारः नैव कर्तुं शक्यते लिङ्गनिर्धारणञ्च लोकाधीनमत एव महाभाष्यकृता भगवता पतञ्जलिना प्रोक्तम्– **''लिङ्गज्ञानं लिङ्गमशिष्यम् लोकाश्रयत्वाल्लिङ्गस्य''** अर्थात् लिङ्गज्ञानं तु लोकाश्रितं विद्यते। एतदर्थं श्रीपाणिनिमुनिना तु लिङ्गानुशासनार्थं पृथक्तया लिङ्गानुशासननामकं प्रकरणमेव प्रारब्धम्। अथ च पणिनीयव्याकरणस्य नियमोऽयं सर्वानुभवसिद्धोस्ति–

**यल्लिङ्गं यद्वचनं या च विभक्तिर्विशेष्यस्य।**

**तल्लिङ्गं तद्वचनं सैव विभक्तिर्विशेषणस्यापि।।**

किन्तु कुत्रचिद् अस्य नियमस्य बाधोऽपि भवति। यतो हि अयं नियमः समानलिङ्गस्थले एव प्रवर्तते न तु असमानलिङ्गस्थले। यथा–''**वेदाः प्रमाणम्**'', ''**शतं ब्राह्मणाः**'' इत्यादौ अन्वयबोधानुपपत्तिरवलोक्यते। किञ्च–

**विंशत्याद्याः सदैकत्वे सर्वा संख्येयसंख्ययोः।**

**संख्यार्थे द्विबहुत्वे स्तस्तासु चानवतेः स्त्रियः।।**[5]

इत्यमरकोशानुशासनबलात् ''शतं ब्राह्मणाः'' इत्यादिवाक्यानां साधुत्वेऽपि ''वेदाः

प्रमाणम्'' इत्यादयः प्रयोगाः कथं सङ्गच्छन्ते? इति प्रश्नः जागर्ति। यतो हि प्रथमाकारके समानवचनकत्वपरिष्कारावसरे व्युत्पत्तिवादाख्ये ग्रन्थे श्रीमद्गदाधरभट्टाचर्यो वक्ति– **''विशेष्यविशेषणवाचकपदयोरसति विशेषानुशासने समानवचन-कत्वनियमात्, अन्यथा 'घटा नीलः' इत्यादेरपि साधुताप्रसङ्गात्। समानलिङ्गक-स्थले तथानियमोपगमेन 'वेदाः प्रमाणम्' इत्यादेः साधुत्वोपपादनेऽपि 'इति हेतुस्तदुद्भवे' इति कारिकायाः 'इति त्रयः समुदिता हेतुः' इतिकाव्य-प्रकाशव्याख्याया असङ्गतिर्दुर्वारैव। एवमसमानलिङ्गकस्थले विशेष्यवाचक-पदाऽसमानवचनस्यापि विशेषणपदस्य साधुत्वे तादृशस्थले औत्सर्गिकमेक-वचनमेव सर्वत्र विशेषपदानन्तरं प्रयोक्तुमुचितमिति 'प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि', 'पितरो देवताः' इत्यादेरनुपपत्तिः।''** कारकप्रकरणस्य **''प्राति-पदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा''**[6] इति आदिमसूत्रव्याख्यानावसरे भट्टोजिदीक्षितो वक्ति लिङ्गं प्रातिपदिकार्थकुक्षिप्रविष्टं विद्यते पुनः सूत्रे लिङ्गग्रहणं व्यर्थमिति कृत्वा व्यर्थं सन्नियामकम् एवमेव अनुबन्धविषयकं व्याख्यानं कुर्वता महाभाष्यकारेण भगवता पातञ्जलिना न्यगादि यत्–**विषयेण तु नानालिङ्गकरणात्सिद्धम्। यदयं विषये विषये नानालिङ्गमकारं करोति–कर्मण्यण्, आतोनुपसर्गे कः, इति तेन ज्ञायते नानुबन्धसङ्करोऽस्तीति। यदि हि स्यान्नानालिङ्गकरणमनर्थकं स्यात्। एकमेव सर्वगुणमुच्चारयेत्। नैतदस्ति ज्ञापकम्। इत्संज्ञाप्रक्लृप्त्यर्थमेतत्स्यात्। न ह्ययमनुबन्धैः शल्यकवच्छक्य उपचेतुम्। इत्संज्ञायां हि दोषः स्यात्। आयम्य हि द्वयोरित्संज्ञा स्यात्। आद्यन्तयोः। एवं तर्हि–विषयेण तु पुनर्लिङ्ग-करणात्सिद्धम्।**[7]

**न्यायवैशेषिकदर्शने** लिङ्गपदार्थस्य महती विवेचना विद्यते तत्र व्याप्तिविशिष्टपक्षधर्म-ताज्ञानजन्यं ज्ञानमनुमितिः, तत्करणमनुमानम्। तच्च लिङ्गपरामर्शो न तु परामृश्यमानं लिङ्गमिति तर्कसङ्ग्रहमुक्तावलीत्यादिग्रन्थेषु द्रष्टव्यम्। श्रुतिद्वितीया **''क्षमता च लिङ्गम्''** लिङ्गत्वञ्च प्राकृतगुणगतावस्थात्मको धर्म एव तद्विशेषश्च पुंनपुंसकत्वादि। वाक्यं पदान्येव तु संहितानि सा प्रक्रिया या कथमित्यपक्षा स्थानक्रमो योगबलसमाख्या **''श्रुतिलिङ्ग-वाक्यप्रकरण-स्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात्।''**[8]

मीमांसाशास्त्रे विनियोगविधेः अङ्गाङ्गिभावबोधकानि श्रुत्यादिषट् प्रमाणानि स्वीकृतानि विद्यन्ते। तानि च–**''श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यारूपाणि। एतत्सहकृतेनानेन विधिनाङ्गत्वं परोद्देशप्रवृत्तकृतिसाध्यत्वरूपं पारार्थ्यपरपर्य्यायं ज्ञाप्यते।''**[9] अतोऽग्रे

वक्ति ग्रन्थकारः इयं श्रुतिः लिङ्गवाक्यप्रकरणस्थानसमाख्याभ्यः षट् प्रमाणेभ्यः प्रबला। तथाहि–''**सेयं श्रुतिर्लिङ्गादिभ्यः प्रबला। लिङ्गादिषु न प्रत्यक्षो विनियोजकः शब्दोऽस्ति किन्तु कल्प्यः। यावच्च तैर्विनियोजकशब्दः कल्प्यते तावत्प्रत्यक्षया श्रुत्या विनियोगस्य कृतत्वेन तेषां कल्पकत्वशक्तेर्व्याहतत्वात्। अत एवैन्द्रया लिङ्गान्नेन्द्रोपस्थानार्थत्वम्। किन्तु 'ऐन्द्रयागार्हपत्यमुपतिष्ठत' इत्यत्र गार्हपत्यमिति द्वितीया श्रुत्वा गार्हपत्योपस्थानार्थत्वम्।**''[10] मीमांसा-शास्त्रे लिङ्गनिर्वचनं क्रियते ''**शब्दसामर्थ्यं लिङ्गम्**'' इत्येवंरूपेण। यथोक्तं तत्र वार्तिकम्–''**सामर्थ्यं सर्वशब्दानां लिङ्गमित्यभिधीयते**'' इति। तथाहि मूले–''**शब्दसामर्थ्यं लिङ्गम्। यच्चाहुः 'सामर्थ्यं सर्वशब्दानां लिङ्गमित्यभिधीयते' इति। सामर्थ्यं रूढिरेव। तेन समाख्यातोऽस्या भेदः। यौगिकशब्दसमाख्यातो रूढ्यात्मकलिङ्गशब्दस्य भिन्नत्वात्। तेन 'बहिर्देवसदनन्दामी'ति मन्त्रस्य कुशलवनाङ्गत्वं न तूलपादिवनाङ्गत्वम्। तस्य बहिर्दामीति लिङ्गात् तल्लवनं प्रकाशयितुं समर्थत्वात्। एवमन्यत्रापि लिङ्गाद्विनियोगो द्रष्टव्यः। तदिदं लिङ्गं वाक्यादिभ्यो बलवत्। अत एव 'स्योनन्ते सदनं कृणोमी'ति मन्त्रस्य पुरोडाशसदनकरणाङ्गत्वम्। सदनं कृणोमीति लिङ्गात्। न तु वाक्यात्।**[11] एवमेव अन्यस्मिन् मीमांसाग्रन्थेऽपि लिङ्गलक्षणं प्रतिपादितं ग्रन्थकृता– ''**सामर्थ्यं सर्वभावानाम्**'' इति।

यद्यपि सर्वत्र लिङ्गेत्याकारिका आनुपूर्वी सममेव दृश्यते तथापि तत्तच्छास्त्र-सिद्धान्तमर्यादानुसारं तत्तच्छास्त्रेषु विशिष्टार्थनियामकः लिङ्गपदार्थो विध्यर्थप्रतिपादको विद्यते।

वेदान्तशास्त्रेऽपि स्थूलशरीरम् (सूक्ष्मशरीरम्) कारणशरीरम् इत्येवं रूपेण लिङ्गपदार्थः विवेचितो विद्यते। तत्र स्थूलसूक्ष्मकारणभेदेन शरीरस्य त्रिधा विभागो दृश्यते। तेषु त्रिविधेषु शरीरेषु सप्तदशावयवात्मकं लिङ्गशरीरमत्र विवेचयामो वयम्। लिङ्ग्यते ज्ञाप्यते बोध्यते प्रत्यगात्मतत्त्वस्वरूपं येन तल्लिङ्गम्। सप्तदशावयवास्तु ज्ञानेन्द्रियपञ्चकं बुद्धिमनसी कर्मेन्द्रियपञ्चकं वायुपञ्चकञ्चेति। सप्तदशावयवानां विभागः लिङ्गशरीरस्य''**ज्ञानेन्द्रियाणि श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणाख्यानि। एतान्याकाशादीनां सात्त्विकांशेभ्यो व्यस्तेभ्यः पृथक् पृथक् क्रमेणोत्पद्यन्ते। बुद्धिर्नाम निश्चयात्मिकान्तःकरणवृत्तिः। मनो नाम संकल्पविकल्पात्मिकान्तःकरणवृत्तिः। अनयोरेव चित्ताहंकारयोरन्तर्भावः। एते पुनराकाशादिगतसात्त्विकांशेभ्यो मिलितेभ्य उत्पद्यन्ते। एतेषां प्रकाशात्म-कत्वात्सात्त्विकांशकार्यत्वम्। इयं बुद्धिर्ज्ञानेन्द्रियैः सहिता विज्ञानमयकोशो भवति। अयं कर्तृत्वभोक्तृत्वसुखित्वदुःखित्वाद्यभिमानत्वेनेहलोकपरलोकगामी**

**व्यावहारिको जीव इत्युच्यते। मनस्तु ज्ञानेन्द्रियैः सहितं सन्मनोमयकोशी भवति। कर्मेन्द्रियाणि वाक्पाणिपादपायूपस्थाख्यानि। एतानि पुनराकाशादीनां रजोंऽशेभ्यो व्यस्तेभ्यः पृथक् पृथक् क्रमेणोत्पद्यन्ते। वायवः प्राणापानव्यानोदानसमानाः। प्राणो नाम प्राग्गमनवान्नासाग्रस्थानवर्ती। अपानो नामावाग्गमनवान्पाय्वादि-स्थानवर्ती। व्यानो नाम विष्वग्गमनवानखिलशरीरवर्ती। उदानो नाम कण्ठस्थानीय ऊर्ध्वगमनवानुत्क्रमणवयुः। समानो नाम शरीरमध्यगतशितपीतान्नादि-समीकरणकरः। केचित्तु नागकूर्मकृकलदेवदत्तधनञ्जयाख्याः पञ्चान्ये वायवः सन्तीति वदन्ति। तत्र नाग उद्गिकरणकरः। कूर्म उन्मीलनकरः। कृकलः क्षुत्करः। देवदत्तो जृम्भणकरः। धनञ्जयः पोषणकरः। एतेषां प्राणादिष्वन्त-र्भावात्प्राणादयः पञ्चैवेति केचित्। एतत्प्राणादिपञ्चकमाकाशादिगतरजोंऽशेभ्यो मिलितेभ्य उत्पद्यते। इदं प्राणादिपञ्चकं कर्मेन्दियैः सहितं सत्प्राणमयकोशो भवति। अस्य क्रियात्मकत्वेन रजोंऽशकार्यत्वम्। एतेषु कोशेषु मध्ये विज्ञानमयो ज्ञानशक्तिमान् कर्तृरूपः। मनोमय इच्छाशक्तिमान् करणरूपः। प्राणमयः क्रियाशक्तिमान् कार्यरूपः। योग्यत्वादेवमेतेषां विभाग इति वर्णयन्ति। एतत्कोशत्रयं मिलितं सूक्ष्म-शरीरमित्युच्यते।''**[12] सारांशतोऽत्र वेदान्तशास्त्रानुसारं लिङ्गशरीरम् उक्तम्। किञ्च एवमेव वेदान्तपरिभाषायामपि विषयपरिच्छेदे विस्तरेण लिङ्गशरीरं निरूपितमस्ति।

साङ्ख्यशास्त्रे तु सर्वादौ दुःखत्रयाभिधातं पञ्चविंशतितत्त्वानि व्यक्ताव्यक्तज्ञरूपाणि च निरूप्य प्रमाणलक्षणं प्रोक्तवता श्रीमदीश्वरकृष्णेन प्रत्यपादि–

**त्रिविधं प्रमाणमिष्टं प्रमेयसिद्धिः प्रमाणाद्धि।।**
**प्रतिविषयाऽध्यवसायो दृष्टं त्रिविधमनुमानमाख्यातम्।**
**तल्लिङ्गलिङ्गिपूर्वकमाप्तश्रुतिराप्तवचनन्तु ।।**[13]

अत्र हि तल्लिङ्गलिङ्गिपूर्वकमित्यस्य कारिकांशस्य विचारे क्रियमाणे सति तत्पदेनानुमानं गृह्यते, लिङ्गपूर्वकमित्यनेन पदेन यत्र लिङ्गेन लिङ्गी अनुमीयते इत्यवगम्यते उदाहरणं तु–दण्डेन यतिः। किञ्चेदानीं लिङ्गमस्यास्तीति लिङ्गीति लिङ्गिपूर्वकं चेति व्याचष्टे–यत्र लिङ्गिना लिङ्गमनुमीयते तद्यथा–दृष्ट्वा यतिमस्येदं त्रिदण्डमिति। अग्रे च आप्तश्रुतिराप्तवचनन्तु इत्येवं त्रिविधं प्रमाणमुक्तं ग्रन्थकृता। किञ्चाग्रिमायां कारिकायामुच्यते–

**हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिङ्गम्।**
**सावयवं परतन्त्रं व्यक्तं विपरीतमव्यक्तम्।।**[14]

कारिकायामस्यां क्रमेण–1. हेतुमद्, 2. अनित्यम्, 3. अव्यापि, 4. सक्रियम्, 5. अनेकम् , 6. आश्रितम्, 7. लिङ्गमत्यादि व्याचष्टे। अत्रापि लिङ्गपदमागतं विद्यते तस्मात्तद्व्याख्यायते–लिङ्गमित्युक्ते **''लययुक्तम्। लयकाले पञ्चमहाभूतानि तन्मात्रेषु लीयन्ते तान्येकादशेन्द्रियैः सहाहंकारे। स च बुद्धौ सा च प्रधाने लयं याति इति।''**[15] किञ्चात्र विंशतिकारिकायाम्–

**तस्मात्तत्संयोगादचेतनं चेतनावदिव लिङ्गम्।**
**गुणकर्तृत्वे च तथा कर्त्तेव भवत्युदासीनः॥**[16]

महदादेश्चेतनतुल्यता पुरुषस्य कर्तृता भ्रमश्च निरूप्यते तथा च–**इह पुरुषश्चेतनावान्, तेन चेतनाऽवभाससंयुक्तं महदादि लिङ्गं चेतनादिव भवति। यथा लोके घटः शीतसंयुक्तः शीतः, उष्णसंयुक्त उष्णः, एवं महदादि लिङ्गं तस्य संयोगात् = पुरुषसंयोगात् चेतनावदिव भवति। तस्माद् गुणा अध्यवसायं कुर्वन्ति, न पुरुषः।**[17] ततोऽग्रे चतुर्विंशतिकारिकायां सूक्ष्मलिङ्गशरीरनिरूपणावसरे गौडपादभाष्ये प्रत्यपादि महर्षिणा–**लिङ्गमिति। प्रलयकाले महदादि सूक्ष्मपर्यन्तं करणोपेतं प्रधाने लीयते, असंसरणयुक्तं सत् आसर्गकालमत्र वर्तते प्रकृतिमोहबन्धनबद्धं सत् संसरणादिक्रियास्वसमर्थमिति। पुनः सर्गकाले संसरति, तस्माल्लिङ्गं सूक्ष्ममिति।**[18] अनेन फ्रकारेण अष्टादशावयवात्मकं लिङ्गशरीरं स्वीकुर्वन्ति सांख्याः। एवमेव अग्रिमायामपि कारिकायां लिङ्गपदार्थः विवेचितो विद्यते। अथ च साङ्ख्यसूत्रे वैराग्याध्याये लिङ्गशरीरं तत्कार्यञ्च प्रतिपादयन् श्रीकपिलमहर्षिः सूत्रञ्चकार **''सप्तदशैकं लिङ्गम्''** इति (सूक्ष्मशरीरमप्याधाराधेयभावेन द्विविधं भवति। तत्र सप्तदश मिलित्वा लिङ्गशरीरम्, तच्च सर्गादौ समष्टिरूपमेकमेव भवतीत्यर्थः) परमात्मा पुरुषो योऽसौ बन्धमोक्षैः प्रयुज्यते। ससप्तदशकेनापि राशिना युज्यते च सः। **तदधिष्ठानाश्रये देहे तद्वादात् तद्वादः।**[20]

**''ऋचं वाचं प्रपद्ये मनो यजुः प्रपद्ये सामप्राणं प्रपद्ये वागो जः सहौजो मयि प्राणापानौ'' इत्यस्मिन् यजुर्वेदीयमन्त्रे सप्तदशावयवोपलक्षणं सप्तदशावयवं प्रजापतेर्लिङ्गं प्रपद्ये इत्यर्थः त्रयी–विद्यां लिङ्गशरीरं च प्रपन्नं प्रवर्ग्यो न नाशयेदिति भावः।**[21] **पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वितम्, अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोगसाधनम्।**[22]

इत्थं व्याकरणन्यायवैशेषिक मीमांसावेदान्तसांख्यशास्त्रादिषु लिङ्गपदार्थस्य यत्स्वरूपं तत् संक्षेपतोऽत्र विवेचितम्।

**

**सन्दर्भाः–**


1. पाणिनीयप्रबोधः, पृ.16
2. पाणिनीयप्रबोधः, पृ.33
3. पाणिनीयप्रबोधः, पृ.43
4. वैयाकरणसिद्धान्तकौमुदी, अव्ययप्रकरणम्
5. अमरेकोशे, वैश्यवर्गः 2.9.85
6. अष्टाध्यायी सूत्रसंख्या, 2.3.46
7. व्याकरण-महाभाष्यम्, द्वितीयाह्निकम्, पृ.60, 61
8. जै.सू., 3.3.145
9. अर्थसंग्रहः, विनियोगविधेः श्रुत्यादिषट्प्रमाणानि
10. अर्थसंग्रहः, श्रुतिः
11. अर्थसंग्रहः, लिङ्गनिर्वचनम्
12. वेदान्तसारः लिङ्गशरीरनिरूपणम्
13. साङ्ख्यकारिका, 4,5
14. साङ्ख्यकारिका, 10
15. साङ्ख्यकारिका, 10, सगौडपादभाष्याभिनवराजलक्ष्मीविराजिता
16. साङ्ख्यकारिका, 20
17. साङ्ख्यकारिका, 20, सगौडपादभाष्याभिनवराजलक्ष्मीविराजिता
18. साङ्ख्यकारिका, 40, सगौडपादभाष्याभिनवराजलक्ष्मीविराजिता
19. साङ्ख्यसूत्रम्
20. साङ्ख्यसूत्रम्, वैराग्याध्यायः, 3.9.11
21. महिधरकृते वेददीपे
22. आत्मबोधः, श्लो.13


**

## किञ्चिद् रामायणीयम्

**रामः**

*** रामस्य वृत्तयः काः?**

- सर्वाणि प्रियाणि हितानि च पौरकार्याणि पितुः आज्ञया चकार।
- परमयन्त्रितः मातृभ्यः मातृकार्याणि कृतवान्।
- गुरूणां गुरुकार्याणि काले काले अन्वैक्षत। **( बालकाण्डम्77/21-22 )**
- नित्यं प्रसन्नात्मा मृदुपूर्वं भाषते।
- परुषम् उच्यमानोऽपि उत्तरं न प्रतिपद्यते। **( अयोध्या. 1/10 )**
- कदाचित् कृतेन एकेन उपकारेण तुष्यति, आत्मवत्तया अपकाराणां शतम् अपि न स्मरति। (अयोध्या. 1/11)

*** रामः कीदृशः?** **रामः**

- बुद्धिमान्
- मधुराभाषी
- पूर्वभाषी
- प्रियंवदः
- वीर्यवान् किन्तु स्वेन महता वीर्येण न विस्मितः
- न अनृतकथः
- विद्वान्
- वृद्धानां प्रतिपूजकः
- प्रजाभिः अनुरक्तः
- प्रजाः अनुरज्यते च
- सानुक्रोशः
- जितक्रोधः
- ब्राह्मणप्रतिपूजकः
- दीनानुकम्पी
- धर्मज्ञः
- नित्यं प्रग्रहवान्
- शुचिः
- कुलोचितमतिः
- स्वधर्मं क्षात्रं बहु मन्यते
- न अश्रेयसि रतः
- न विरुद्धकथारुचिः
- वाचस्पतिः इव उत्तरोत्तरयुक्तीनां कर्ता
- अरोगः
- तरुणः
- वाग्मी
- वपुष्मान्
- देशकालवित्
- लोके एकः पुरुषसारज्ञः साधुः
- श्रेष्ठैः गुणैः युक्तः
- प्रजानां बहिश्चरः प्राणः इव गुणतः प्रियः
- कल्याणाभिजनः
- साधुः
- अदीनः
- सत्यवाक्
- ऋजुः
- वृद्धैः द्विजैः अभिविनीतः
- धर्मकामार्थतत्त्वज्ञः
- स्मृतिमान्
- प्रतिभानवान्
- लौकिके समयाचारे कृतकल्पः विशारदः।

**अयोध्या. 1/13-22**

# अद्वैतवेदान्ते प्रमायाः स्वरूपम्

## ( धर्मराजाध्वरीन्द्रकृतस्य वेदान्तपरिभाषाग्रन्थस्य विशेषसन्दर्भे )

**डॉ. कपिलः गौतमः**

**प्रमाता प्रमाणं प्रमेयं प्रमितिरिति चतसृषु विधासु तत्त्वं परिसमाप्यते।**[1]
इति न्यायसूत्रभाष्यकाराणां वात्स्यायनाचार्याणां मते यदि तत्त्वस्य समग्रज्ञानस्याभिलाषास्ति तदा सर्वप्रथमं प्रमातृ–प्रमाण–प्रमेय–प्रमितीनां चतुर्णां ज्ञानं परमावश्यकम्। अद्वैतवेदान्तस्य प्रमेयमस्ति ब्रह्मन् (आत्मन्)–**इह तु भूतं ब्रह्म जिज्ञास्यम्।**[2] प्रमातास्ति–अन्तःकरणे प्रतिबिम्बितं चैतन्यम् अर्थात् जीवः। वेदान्तसारेऽधिकारिनिरूपणप्रकरणे प्रोक्तप्रमातृशब्दोपरि टिप्पणीं कुर्वन् रामतीर्थयतिः स्वटीकायां विद्वन्मनोरञ्जिन्यां लिखति–यथार्थज्ञानमधिकृत्य प्रमाणद्वारा वा लौकिकवैदिकव्यवहारस्य सम्पादनकर्ता जीवः प्रमाता इत्यभिधीयते–

**लौकिक-वैदिकव्यवहारेष्वभ्रान्तो जीव एव प्रमातेह विवक्षितः।**[3]

शाङ्करवेदान्ते प्रमाणं किम्? इति प्रश्नस्य समाधानं धर्मराजाध्वरीन्द्रकृते वेदान्तपरिभाषाग्रन्थे प्रदत्तम्–**तत्र प्रमाकरणं प्रमाणम्। तानि च प्रमाणानि षट्–प्रत्यक्षानुमानोपमानागमार्थापत्त्यनुपलब्धिभेदात्।**[4]

प्रमायाः यत् करणं तत् प्रमाणमिति। प्रमाणानि षड्विधानि– प्रत्यक्ष–अनुमान–उपमान–शब्द–अर्थापत्ति–अनुपलब्धीनि। अत्र प्रमाणं लक्ष्यं तथा च प्रमाकरणमिति तस्य लक्षणम्। अत्र शङ्का भवितुं शक्यते यत् करणमित्येतादृगेव प्रमाणलक्षणमकृत्वा प्रमाकरणमिति लक्षणविस्तरेण को लाभः? उत्तरम्–'करणं प्रमाणमि'त्येवं यदि प्रमाणलक्षणं क्रियते तर्हि दण्डादीनामपि घटादीनां करणत्वात् तत्र प्रमाणप्रसङ्गः स्यात् अर्थात् प्रमाणलक्षणस्यातिव्याप्तिः दण्डादिष्वपि करणेषु भवेत्। अत एव प्रमाकरणमित्येव प्रमाणस्य सामान्यलक्षणमुचितम्।

अद्वैतवेदान्ते प्रमितिः (प्रमा) इत्यनेन कोऽभिप्रायः? किं तत्स्वरूपमिति शोधपत्रेऽस्मिन् विस्तरेण विवेचितमस्ति।

**प्रमायाः लक्षणम्–**

तत्र प्रमाकरणं प्रमाणमित्यत्र प्रयुक्तस्य प्रमाशब्दस्य कोऽर्थः?

**उत्तरम्–**प्रमाशब्दस्यार्थोऽस्ति यथार्थज्ञानम्। तार्किकाः प्रत्यक्षादिप्रमाणेभ्यः जन्यमनुभवरूपं ज्ञानमेव प्रमेति कथयन्ति। स्मृतिर्न साक्षात् प्रत्यक्षादिप्रमाणेभ्यः उत्पद्यते, किन्तु प्रत्यक्षादीनामनुभवेभ्यः संस्कारः जायते तथा च संस्कारात् स्मृतिर्भवति–

**सर्वव्यवहारहेतुर्बुद्धिर्ज्ञानम्। तत् द्विविधं स्मृतिरनुभवश्च। संस्कारमात्रजन्यं ज्ञानं स्मृतिः। तद्भिन्नं ज्ञानमनुभवः।**[5] अतः तार्किकमते संस्कारेषु प्रमाणत्वाभावात् स्मृतिः प्रमायां न गण्यते।

प्रमायाः किं लक्षणं भवितव्यम्? इति विचारयता वेदान्तपरिभाषायां धर्मराजाध्वरीन्द्रेण प्रमायाः द्वे लक्षणे निरूपिते। एकस्मिन् लक्षणे प्रमायां स्मृतेः विलोपनं कृतं तत् स्मृतिव्यावृत्तमिति कथितं यत् केवलम् अनुभवोपरि घटितं भवति तथा च द्वितीये लक्षणे स्मृतेः ग्रहणं कृतम्। लक्षणमिदमनुभवे स्मृतौ चोभयत्र समानमेव घटितं भवति। तल्लक्षणं स्मृतिसाधारणमिति रूपेण वर्णितम्–**तत्र प्रमाकरणं प्रमाणम्। तत्र स्मृतिव्यावृत्तं प्रमात्वमनधिगतावाधितार्थविषयकज्ञानत्वम्। स्मृतिसाधारणन्तु अबाधित-विषयकज्ञानत्वम्।**[6]

**( क ) स्मृतिव्यावृत्तम्–**लक्षणेऽस्मिन् स्मृतिं पृथक्कृत्य केवलमनुभवात्मकप्रमायाः **'अनधिगताबाधितविषयज्ञानत्वं प्रमात्वम्'** इति लक्षणं प्रस्तुतम्। अत्र 'प्रमात्वम्' इति लक्ष्यं तथा च 'अनधिगत–अबाधित–विषयज्ञानत्वम्' इति लक्षणमस्ति। 'अनधिगतम्'– यत् पूर्वमेव न ज्ञातं प्राप्तम् वा। 'अबाधितम्'–प्रमाणान्तरेण (उत्तरज्ञानेन वा) मिथ्या न सिद्धम् न बाधितम् इति वा। उभयविशेषणविशिष्टं यद्विषयं तद् ज्ञानमेव प्रमेति कथयितुं शक्यते। लक्षणेऽस्मिन् त्रीणि पदानि प्रयुक्तानि–अनधिगतम्–अबाधितम्–विषयज्ञानत्वम्।

**( 1 ) अनधिगतम्–**स्मृतेः विषयः (यस्य स्मरणं भवति स पदार्थः), पूर्वमेवाधिगतः (ज्ञातः) भवति, यतोहि विना अनुभवं स्मरणं न भवति। अतः प्रमायाः लक्षणे विषयस्य अनधिगतमिति विशेषणस्याङ्गीकरणात् स्मृतेर्व्यावृत्तिर्भवति।

**( 2 ) अबाधितम्–'शुक्तौ इदं रजतम्'** दूरात् दर्शने सति शुक्तौ रजतस्य अवभासः भवति। अत्र ज्ञानस्य विषयः रजतमस्ति। यदा शुक्तेः समीपं गत्वा दर्शनं क्रियते तर्हि रजतस्य निरासो भवति अर्थात् रजतं प्रमाणान्तरेण बाधितं भवति। अतः शुक्तौ भासमानः रजतरूपभ्रमः नास्ति प्रमा। अतः बाधितविषयाणां निवृत्तये लक्षणे विषयस्य अबाधितमिति विशेषणं प्रयुक्तमस्ति।

**( 3 ) विषयज्ञानत्वम्**—लक्षणेऽस्मिन् विषयज्ञानत्वमित्यत्र यद् ज्ञानपदम् तत् प्रमायाः स्वरूपप्रकटनार्थं विद्यते। प्रमा इच्छाद्यन्तःकरणवृत्तिरूपा नास्ति। इच्छा अन्तःकरणस्य वृत्तिरूपं ज्ञानमेव भवति, परन्तु अनधिगतमिति विशेषणेन तस्याः निरसनं जायते यतोहि ज्ञातविषयेष्वेव इच्छादयः प्रवर्तन्ते। अथवा चक्षुरादिषु लक्षणस्यातिव्याप्तिर्न भवेत्। अतः प्रमायाः लक्षणे ज्ञानमिति पदं प्रदत्तम्। यतो हि अद्वैतवेदान्ते चक्षुरादीनामपि घटादिस्फुरणद्वारा घटादिविषयत्वमभ्युगम्यते। अत्र ज्ञानस्यार्थः ज्ञप्तिः (अनुभवः) अस्ति। अस्मात् कारणाद् ज्ञानस्य यत् करणमन्तःकरणवृत्तिरूपं, तत्र लक्षणस्यास्य नातिव्याप्तिर्भवति।

**( ख ) स्मृतिसाधारणम्**—साधारणमित्यनेनाभिप्रायः यदनेकेषु समानरूपेण घटितं भवति। लक्षणमिदमनुभवस्मृत्योः उभयत्र समानरूपमेव घटितं भवति। अतः प्रमायाः लक्षणमिदं स्मृतिसाधारणमित्यस्ति। यस्य स्मृतेर्विषयः यथार्थः भवति अर्थात् उत्तरज्ञानेनाबाधितो भवति एतादृशी स्मृतिरपि प्रमारूपेण मन्यते। अतः **'अबाधितविषयज्ञानत्वं प्रमात्वम्'** इति द्वितीयं स्मृतिसाधारणं लक्षणं प्रदत्तम्। 'उत्तरज्ञानेन अबाधितं विषयज्ञानमेव प्रमा। प्रथमतः 'अयं घटः' इति ज्ञानं भवति तस्योत्तरज्ञानेनापि बाधो न भवति। तस्माद् ज्ञानादन्तःकरणे सूक्ष्मसंस्कारा उत्पद्यन्ते। तस्मात् संस्कारात् किञ्चित्कालानन्तरं तस्यैव घटस्य स्मरणं भवति। एतादृशे स्मृतेः विषय अबाधितघट एव। अतः स्मृतिरियं प्रमास्ति। एवमेव अबाधितघटस्य ज्ञानमपि प्रमास्ति। एतद्विपरीतं शुक्तौ रजतावभासमाने अथवा रज्जौ सर्पप्रतीतौ तत्र समीपमेत्य किं निश्चितं रजतमिदं सर्पोऽयं वा? इत्यनेन प्रकारेण प्रमाणद्वारा निरूपणं क्रियते। तदा शुक्तिरियं नेदं रजतं वा रज्जुरयं नायं सर्प इति ज्ञानं भवति। अत्र उत्तरज्ञाने जाते रजतज्ञानं सर्पज्ञानञ्च बाधिते भवतः, एतादृक्स्थलेषु यदनुभवरूपं ज्ञानं तद् बाधितविषयकत्वम् अत एव नास्ति प्रमा। अतः बाधितविषयाणां कालान्तरे जायमाना स्मृतिरपि नास्ति प्रमा। अतः अनुभवः स्मृतिश्चेत्यनयोः प्रमयोः 'अबाधितविषय-ज्ञानत्वमि'ति साधारणलक्षणमस्ति।

**धारावाहिकज्ञाने प्रमायाः लक्षणस्य व्याप्तिः—**

अत्रैका शङ्का जायते यत् स्मृतिं प्रमारूपेण स्वीकरणे किं धारावाहिकज्ञानस्थले प्रमालक्षणमव्याप्तं भवति अतः अत्राव्याप्तिदोषः—**लक्ष्यैकदेशवृत्तित्वमव्याप्तिः।**[7] लक्ष्य-स्येकदेशमात्रत्वम् अर्थात् लक्ष्यस्य एकस्मिन् भागे विद्यमाने सत्यन्यस्मिन् भागेष्वविद्यमान-त्वमतोऽत्राव्याप्तिदोषः। यथा प्रमायाः लक्षणं स्मृतौ घटिते सति धारावाहिकज्ञाने न घटित-मव्याप्तिदोषः। स्मृतिधारावाहिकज्ञाने प्रमे स्तः। किं नाम धारावाहिकज्ञानम्? धाराप्रवाह-रूपेण निरन्तरतायामेकस्यैव ज्ञानस्यानुवृत्तिबोधः धारावाहिकज्ञानं भवति। उदाहरणस्वरूपं

सर्वप्रथमम् अयं घट इति ज्ञानमभवत्। किञ्चित्क्षणानन्तरं पुनः अयं घट इति ज्ञानमभवत्। तदनु कतिपयनिमेषे व्यतीते पुनः अयं घटः–इति ज्ञानं भवति। अत्र यत् पौनःपुन्येन अयं घटः अयं घटः एवंरूपस्य ज्ञानस्यानुवर्तनं भवति तद् धारावाहिकज्ञानमिति प्रोच्यते। 'अयं घटः' 'अयं घट' इति धारवाहिकज्ञानस्थले अयं घटः–इदं ज्ञानं, द्वितीय–तृतीय–चतुर्थ इत्यादिषु ज्ञानेषु क्रमशः पूर्वपूर्वज्ञानस्य विषयोऽस्ति। अतः द्वितीयादिज्ञानेष्वधिगत-विषयत्वं (यत् पूर्वमेव ज्ञातम्) भवति। तद्विपरीतं प्रमायाः लक्षणमस्ति–अनधिगतम् – अर्थात् स विषयः यः पूर्वमेव न ज्ञातः। अत्र धारावाहिकज्ञाने एकस्यैव विषयस्य पौनःपुन्येना-नुवर्तनं भवति। अस्मादेव कारणादत्र 'अनधिगतविषयज्ञानत्वमि'ति प्रमायाः लक्षणं धारावाहिकज्ञानस्थलेऽव्याप्तम्। अस्याः शङ्कायाः समाधानमेवं प्रस्तूयते–

**नीरूपस्यापि कालस्येन्द्रियवेद्यत्वाभ्युपगमेन, धारावाहिकबुद्धेरपि पूर्वपूर्वज्ञानाविषयतत्तत्क्षणविशेषविषयकत्वेन न तत्राव्याप्तिः।**[8]

अर्थात् अद्वैतवेदान्ते रूपरहितकालस्यापि इन्द्रियवेद्यमानत्वात् धारावाहिकज्ञानस्यापि पूर्वपूर्ववर्तिक्षणस्य ज्ञानस्य विषयः परवर्तिक्षणस्य ज्ञानस्य विषयरूपेण नाधिगम्यते। तत्तत्क्षणज्ञानस्य विशेषविषयभूयात् धारावाहिकज्ञाने नास्त्यव्याप्तिदोषः। अयमाशयः यत् प्रथमक्षणे भूतं यद् घटज्ञानं तद् द्वितीयक्षणे भूतात् घटज्ञानात् परस्परं भिन्नं भवति। एवं-प्रकारेण द्वितीयक्षणे भूतं यद् घटज्ञानं तत् तृतीयक्षणे भूतात् घटज्ञानात् परस्परं भिन्नं भवति। यतो हि प्रत्येकक्षणे यद्भूतं घटं तद् एकं विशेषविषयकत्वं ज्ञानं भवति। अतः धारावाहिकज्ञानमप्यनधिगतमेव (पूर्वमज्ञातमेव) भवति। अद्वैतवेदान्ते रूपरहितकालस्यापि इन्द्रियवेद्यत्वं मन्यते अर्थात् नीरूपस्यापि कालस्य प्रत्यक्षमङ्गीक्रियते कथमिति चेत् तार्किकाणा-मनुसारेण यस्मिन् द्रव्ये महत्–परिणामत्वं तथा च उद्भूतरूपत्वं भवति तद् द्रव्यं, चक्षुरिन्द्रि-यस्य विषयो भवति अर्थात् अक्ष्णा द्रष्टुं शक्यते–**यत्र यत्र प्रत्यक्षत्वं तत्र तत्र महत्परिणामवदुद्भूतरूपत्वम्।**[9] तेषामनुसारेण कालस्योद्भूतरूपाभावात् तस्य प्रत्यक्षं न भवति किन्तु वेदान्तमतानुसारेण 'अस्मिन् समये घटः विद्यते' अयमनुभवः सर्वेषां कृते भवति। 'अस्मिन् समये' इत्यनेन सिद्धं यत् कालस्यापि प्रत्यक्षं भवति। उपर्युक्तवाक्ये ''अस्मिन् समये'' इत्यनेन सिद्धं यत् कालस्यापि प्रत्यक्षं भवति। उपर्युक्तवाक्ये ''अस्मिन् समये'' पदमिदं वर्तमानकालं बोधयन्नस्ति। अतः द्रव्यस्य चाक्षुषप्रत्यक्षे महत्परिणामत्वम् उद्भूतरूपत्वञ्चेति तार्किकाणां सिद्धान्तः कालद्रव्यमतिरिच्य अन्यद्रव्यविषयेषु घटितो भवतीति मन्तव्यम्। यस्मिन् द्रव्ये महत्परिणामत्वं तथा च उद्भूतरूपत्वं भवति तद् द्रव्यं, चक्षुरिन्द्रियस्य विषयः भवति इति तार्किकमतमभ्युपगम्यमाने तु रूपरहितस्य रूपस्यापि चाक्षुषप्रत्यक्षं कर्तुं

न शक्यते परन्तु तार्किकाः रूपस्य प्रत्यक्षत्वं मन्यन्ते तद्विपरीतं रूपे उद्भूतरूपत्वं तथा महत्परिणामत्वं चोभयं न भवति। वैशेषिकमते गुणेषु गुणानां स्थितिः न स्वीक्रियते। रूपं गुणोऽस्ति, अतः रूपनामके गुणे उद्भूतरूपनामकद्वितीयगुणस्य स्थितिं कल्पयितुं न शक्यते। इति न्यायेन अद्वैतमते रूपरहितकालस्य चक्षुरिन्द्रियस्य विषयत्वमभ्युगम्यते।

'अयं घटः अयं घटः अयं घटः' इति धारावाहिकी बुद्धिरपि पूर्वपूर्वक्षणे ज्ञानस्य विषयं परित्यज्य। उत्तर–उत्तरक्षणे ज्ञानस्य नूतनविषयं जनयति। अर्थात् 'अयं घट' इति प्रथमक्षणे भूतस्य ज्ञानस्य विषयः प्रथमे क्षणे स्थितः घटः भवति। द्वितीयक्षणे तथा च द्वितीयक्षणे भूतस्य ज्ञानस्य विषयो यद् घटः तत् प्रथमक्षणस्य ज्ञानस्य विषयाद्घटाद् भिन्नः भवति। प्रथमक्षणे यस्य घटस्य ज्ञानमभवत् तद्घटस्तु प्रथमक्षणेन सहैव निवृत्तोऽभवत्। अस्मादेव कारणात् द्वितीयक्षणस्य ज्ञानस्य विषयको घटः, पूर्वक्षणे जायमानात् ज्ञानविषयाद् घटात् पृथग्भवति। अनेन प्रकारेण तृतीयक्षणीयज्ञानस्य विषयभूतात् 'घटात्' द्वितीयक्षणिकज्ञानविषयको घटः भिद्यते। अतः धारावाहिकज्ञाने प्रत्येकक्षणे ज्ञानस्य विषयः 'घटः' परस्परभिन्नभूतत्वात् धारावाहिकज्ञानेऽधिगतविषयत्वं न प्रविशति। अतः 'अनधिगतज्ञानविषयत्वम्' इदं प्रमायाः लक्षणं धारावाहिकबुद्धावपि घटितं भवति। अतः धारावाहिकज्ञानेऽस्य लक्षणस्य नातिव्याप्तिः।

**धारावाहिकज्ञानेऽद्वैतवेदान्तस्य परमसिद्धान्तः–**

अधुना सिद्धमिदं भवति यद् धारावाहिकज्ञाने प्रत्येकक्षणे परस्परभिन्नघटस्य ज्ञानं भवति अर्थात् प्रथमद्वितीयतृतीयादिक्षणानि परस्परभिन्नघटविषयकाणि भवन्ति। किं तर्हि प्रत्येक्षकक्षणे घटरूपविषयस्य भिन्नत्वात् ज्ञानमपि भिन्नं भवति अथवा एकमेव भवति? सर्वप्रथमं ज्ञातुमिदमावश्यकं यद् अद्वैतवेदान्ते ज्ञानमित्यनेन कोऽभिप्रायः? अद्वैतमते ज्ञानमस्ति–अन्तःकरणस्य वृत्तौ प्रतिफलितं (प्रतिबिम्बितं) चैतन्यम्। अन्तःकरणस्य वृत्तिर्नास्ति, ज्ञानं, अन्तःकरणस्य वृत्तिस्तु साधनमेव। चैतन्यरूपज्ञानस्य प्रतिबिम्बितेऽन्तःकरणस्य वृत्तिः इन्द्रियाणां माध्यमेन विषयं (घटं इत्यादिकं) ज्ञापयति प्रकाशयति वा। अधुना धारावाहिकज्ञानस्य विषये यः सिद्धान्तः सः वर्ण्यते–

**किञ्च सिद्धान्ते धारावाहिकबुद्धिस्थले न ज्ञानभेदः, किन्तु यावद्घटस्फुरणं तावद्घटाकारान्तःकरणवृत्तिरेकैव, न तु नाना, वृत्तेः स्वविरोधिवृत्त्युत्पत्तिपर्यन्तं स्थायित्वाभ्युपगमात्; तथा च तत्प्रतिफलितचैतन्यरूपं घटादिज्ञानमपि तत्र तावत्कालीनमेकमेव इति नाव्याप्तिशङ्कापि।**[10]

अद्वैतसिद्धान्ते धारावाहिकबुद्धावपि ज्ञानस्य भेदो न स्वीक्रियते। यावत्कालम् एक

एव विषयः प्रतीयते तावत्कालं तदाकारान्तःकरणवृत्तिरपि एकैव भवति, नानेका। अन्तःकरण-वृत्तिस्तु तावत्कालमेका भवति यावत् तद्विरोधिनी वृत्तिर्न जायेत। यथा घटज्ञानस्य समये अन्तःकरणवृत्तिः तावत्कालमेका भवति यावत् तद्विरोधिनी काचित् पटज्ञान–सम्बन्धिनी अन्तःकरणवृत्तिर्नोत्पद्येत। विना वृत्तिभेदेन नास्ति ज्ञानभेदः। अतः धारावाहिकबुद्धावप्यन्तः-करणवृत्तेः एकभूतत्वात् तद्वृत्तौ प्रतिफलितचैतन्यमपि (आत्मन्नपि) अर्थात् ज्ञानमपि एकमेव भवति। धारावाहिकज्ञाने प्रत्येकक्षणे विषयस्तु भिन्नः भवति परन्त्वन्तःकरणवृत्तिस्तथा च वृत्तौ प्रतिफलितचैतन्यं (आत्मन्) अर्थात् ज्ञानम् एकमेव भवति।

**सत्तायाः त्रिविधस्तरेषु प्रमायाः स्थितिः–**

अत्रैका शङ्कोपस्थिता यत् पूर्वोक्तप्रमायाः लक्षणानुसारं यस्य ज्ञानस्य विषयो बाधितो भवति तद्ज्ञानमप्रमा भवति। तदा प्रमाया अबाधितविषयज्ञानत्वमिति परिभाषया घटादिविषयज्ञानं प्रमारूपेणाभिधातुं न शक्यते। यतो हि अद्वैतवेदान्ते ब्रह्मतत्त्वस्यैव एकमात्रसत्ता भवति एवञ्च घटादिसांसारिकाः पदार्थास्तु मिथ्या सन्ति–**ब्रह्म सत्यं जगन्मिथ्येवंरूपो विनिश्चयः।**[11] इति शङ्का नास्त्युचिता। अस्मादस्माभिः सत्तायाः त्रिविधस्तरविषये ज्ञानमावश्यकं वर्तते। अद्वैतवेदान्ते सत्तायाः त्रिविधस्तराः स्वीकृताः–

1. **पारमार्थिकी सत्ता–**यस्य त्रिविधकालेषु न बाधः। इयं सत्ता केवलं ब्रह्मणः (आत्मनः) वा अस्ति।

2. **व्यावहारिकी सत्ता–**येषां बाधः ब्रह्मसाक्षात्कारेण भवति तावत्कालिकीयं सांसारिकी दशा वर्तते। ईश्वर–जीव–माया–जगदादीनां तथा च सांसारिकाणां घटादिपदार्थानां व्यावहारिकी सत्ता सांसारिकी दशा वा भवति।

3. **प्रातिभासिकी सत्ता–**येषां बाधः उत्तरज्ञानेन/प्रमाणेन/व्यावहारिकदशया वा भवति तेषां स्वप्नरज्जुसर्पादीनां भ्रमाणां प्रातिभासिकी सत्ता वर्तते।

उक्तत्रिविधस्तरेषु घटविषयिणी प्रमा व्यावहारिकसत्तायां परिगण्यते। अतः घटादिपदा-र्थानां सत्ता ब्रह्मज्ञानपर्यन्तमेव वर्तते अर्थात् सांसारिकदशायां तु घटादिपदार्थानां सत्ता भवत्येव। तेषां बाधः सांसारिकदशायां तु न अपितु ब्रह्मज्ञानदशायां भवति। अतः सांसारिकदशायामबाधितत्वात् घटविषयज्ञानं प्रमा भवति।

अत्र शङ्का भवति यद् घटादिपदार्थानां शुक्तिरजतमिव बाधितत्वात् तेषामपि मिथ्यात्वं सिद्धम्, बाधितानां घटादिकानां ज्ञाने प्रमात्वं कथं भविष्यति? शङ्केयं नोचिता। घटादि-व्यावहारिकाणां पदार्थानां बाधः ब्रह्मसाक्षात्कारानन्तरमेव भवति शुक्तिरजतमिव संसारदशायां न भवति। शुक्तौ रजतस्य भासः संसारदशायां भवति तथा च तस्य प्रमाणद्वारा परीक्ष्यमाणे

भासितस्य रजतस्य बाधोऽपि तद्दशायामेव भवति। विषयेऽस्मिन् वेदान्तपरिभाषायां **'यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्येत्'** इति श्रुतेराधारः प्रदत्तोऽस्ति। श्रुतावस्मिन् 'तु' शब्दद्वारा अविद्यावस्थाया अपेक्षया विद्यावस्थायाः वैलक्षण्यं सूचयित्वा यस्यां ब्रह्मसाक्षात्कारावस्थायां तत्त्वज्ञस्य दृष्टौ सम्पूर्णजगत्– स्वात्मरूपेण भवति, तस्यामवस्थायां प्रमातृप्रमाणप्रमेयादीनां भेदो न भवति। एतादृश्यां स्थित्यां कथं स मुक्तः ज्ञानी वा केनेन्द्रियादिना साधनेन कान् घटादिविषयान् ग्रहीतुं प्रवर्तयतीति कथनेन श्रुत्यानया परमार्थावस्थायां व्यवहारस्थायाः बाधो भवतीति सूचितं, परन्तु सारदशायां तु घटादि-व्यावहारिकपदार्थानां बाध इत्यस्माद् व्यवहारदशायां न घटादयः पदार्थाः मिथ्या सन्ति प्रत्युत तेषां ज्ञानमपि प्रमेति कथयितुं शक्यते।

संसारदशायां तु घटादिव्यावहारिकपदार्थानां न बाधो भवतीति विषयेऽस्मिन् **'यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति।'**[12] इत्यादि श्रुतिः प्रमाणम्। श्रुत्यानया सूचितं यत् संसारदशायां प्रमातृ–प्रमाण–प्रमेयादीनां द्वैतमिव प्रत्ययो भवति तस्यां द्वैतावस्थायां आत्मन्, स्वरूपात् च्युतं भूत्वा उपाधिलक्षणप्रमातृरूपेण जीवरूपेण वाभिव्यजते तथा च स्वभिन्नविषयान् ज्ञातुं, कर्तुं भोक्तुं च प्रवर्तते–**ननु सिद्धान्ते घटादेर्मिथ्यात्वेन बाधितत्वात् कथं तज्ज्ञानं प्रमाणम्? उच्यते। ब्रह्मसाक्षात्कारानन्तरं हि घटादीनां बाधः, ''यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्येत्'' इति श्रुतेः। न तु संसारदशायां बाधः, ''यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति'' इति श्रुतेः।**[13] अत्र शङ्का भवति यद् घटादिपदार्थानामबाधितत्वं न त्रैकालिकं तथा तेषामबाधितत्वं तु केवलं संसारदशायामेव भवति तदा तु प्रमायाः लक्षणं पूर्वोक्तमिव घटादिप्रमायामव्याप्तमेव। अस्याः शङ्कायाः समाधानं वेदान्तपरिभाषायां 'तथा च' इति ग्रन्थेन प्रदत्तम्–'संसारदशायां घटादिविषयाणामबाधितत्वात् तेषां ज्ञानमपि प्रमैव ज्ञायते। अतः पूर्वोक्ते प्रमालक्षणे प्रतीयमानं व्याप्तिदोषं निवारयितुं लक्षणगतम् अबाधितमिति पदेन 'संसारदशायामबाधितत्वम्' इत्यर्थो विवक्षितोऽस्ति। अनेन घटादि–प्रमायां लक्षणस्याव्याप्तिर्न भविष्यतीति ग्रन्थस्याशयः। तथा च 'अबाधित'–**पदेन संसारदशायामबाधितत्वं विवक्षितम्, इति न घटादिप्रमायामव्याप्तिः।**[14] 'व्यवहारदशायां घटादिविषयाणां ज्ञानं प्रमास्ति' इति ग्रन्थकार-कथनं पोषयितुं वेदान्तपरिभाषाकारेण पूर्वेषां साम्प्रदयिकविदुषां सम्मतिः अपि प्रदर्शिता। आत्मनिश्चयात् प्राक् तु 'देह एवात्मा' अयमनुभवः सर्वप्राणिसाधारणोऽस्ति, स च प्रमाणरूपेण मन्यते। एवमेव आत्मनिश्चयात् प्राक् सर्वं लौकिकज्ञानं (क्रिया–कारक–फलादि–विषयज्ञानं) प्रमाणमेव (प्रमैव) अस्तीति लौकिकवचनस्य तात्पर्यम्। तदुक्तम्–

**देहात्मप्रत्ययो यद्वत् प्रमाणत्वेन कल्पितः।**
**लौकिकं तद्वदेवेदं प्रमाणन्त्वाऽऽत्मनिश्चयात्॥** इति।

**'आ आत्मनिश्चयात्'–ब्रह्मसाक्षात्कारपर्यन्तमित्यर्थः। 'लौकिकम्' इति घटादिज्ञानमित्यर्थः।**[15] संसारदशायामपि अहमस्मि इत्यात्मनिश्चयस्तु भवत्येव, आत्मनिश्चयेन कोऽभिप्रायः? तर्हि एतद्विषये ग्रन्थकारेण 'आ आत्मनिश्चयात्' इति पदानां "ब्रह्मसाक्षात्कारं यावत् तावत्कालमेव" इत्यर्थः कथितः। ब्रह्मसाक्षात्कारस्यार्थो भवति स्वजीवादारभ्य ब्रह्मपर्यन्तं सर्वेषु कीट–पतङ्ग–तिर्यक्–वृक्ष–प्रस्तर–मृदा–देवादिषु स्थावरजङ्गमेषु एकचैतन्यस्यानुभूतिः अर्थात् संसारदशायाम् 'अहमस्मि' इत्यात्मनिश्चयः भ्रान्तप्रत्ययः वर्तते। लौकिकमित्यनेन केवलं प्रत्यक्षप्रमाणजन्यज्ञानमिति नाभिप्रायः। अतः ग्रन्थकारेण तस्यार्थः "घटादिज्ञानम्" अर्थात् ब्रह्मातिरिक्तानां सर्वेषां लौकिकवस्तूनां ज्ञानमिति कृतम्। अतः घटादिज्ञानमेव प्रमेति कथयितुं शक्यते।

**उपसंहारः**

प्रमायाः विषये सर्वेषु दर्शनेषु किञ्चित् चिन्तनं कृतमस्ति। अद्वैतवेदान्ते प्रमायाः स्वरूपं तर्कपूर्णशैल्या स्पष्टतया सुविकसितमस्ति। तार्किकमते स्मृतिः संस्काराप्रमाणत्वात् प्रमा नोदीर्यते, तद्विपरीतम् अद्वैतवेदान्ते प्रमायाः द्विविधलक्षणे (स्मृतिव्यावृत्तं, स्मृति–साधारणञ्च) अनुभवस्मृत्योः उभयोः प्रमायां ग्रहणं कृतम्। स्मृतिव्यावृत्ते लक्षणे स्मृतिं पृथक्कृत्य केवलमनुभवात्मकप्रमायाः 'अनधिगताबाधितविषयज्ञानत्वं प्रमात्वम्' इति लक्षणं प्रस्तुतम्। स्मृतिसाधारणं लक्षणमिदमनुभवस्मृत्योः उपरि समानरूपमेव घटितं भवति। अतः प्रमायाः लक्षणमिदं स्मृतिसाधारणमित्यस्ति। अतः 'अबाधितविषयज्ञानत्वं प्रमात्वम्' इति द्वितीयं स्मृतिसाधारणं लक्षणं प्रदत्तम्। अत्र प्रमालक्षणं धारावाहिकज्ञानेऽपि घटितं भवतीति साधितम्। धारावाहिकज्ञानस्य प्रथमलक्षणे यस्य 'घटस्य' ज्ञानं भवति, तद् 'घटस्तु' प्रथमक्षणेन सहैव निवृत्तो भवति। अस्मात् कारणाद् द्वितीयक्षणस्य ज्ञानविषयको 'घटः', पूर्वक्षणज्ञानविषयकाद्घटात् पृथग्भवति। अनेन प्रकारेण तृतीयक्षणीयज्ञानस्य विषयभूतात् 'घटात्' द्वितीयक्षणिकज्ञानविषयको घटः भिद्यते। अतः धारावाहिकज्ञाने प्रत्येकक्षणे ज्ञानस्य विषयः 'घटः' परस्परभिन्नभूतत्वात् धारावाहिकज्ञानेऽधिगतविषयत्वं न प्रविशति। अस्मिन्नेव प्रक्रमे ज्ञानमपि लक्षितं कृतमस्ति। अद्वैतमते ज्ञानमस्ति–अन्तःकरणस्य वृत्तौ प्रतिफलितं (प्रतिबिम्बितं) चैतन्यम्। अन्तःकरणस्य वृत्तिर्नास्ति ज्ञानम्, अन्तःकरणस्य वृत्तिस्तु साधनमेव। चैतन्यरूपज्ञानस्य प्रतिबिम्बितेऽन्तःकरणस्य वृत्तिः इन्द्रियाणां माध्यमेन विषयं ज्ञापयति प्रकाशयति वा। धारावाहिकज्ञाने प्रतिक्षणविशिष्टं विषयवस्तु परस्परं

भिन्नं भवति परन्तु अन्तःकरणवृत्तिः तथा च वृत्तौ प्रतिफलितं चैतन्यं (आत्मन्) अर्थात् ज्ञानं तु एकमेव भवति।

शोधपत्रेऽस्मिन् अस्या अपि शङ्कायाः निवारणं कृतमस्ति  यत् कथमद्वैतवेदान्ते घटादीनां सांसारिकपदार्थानां ज्ञानं प्रमायां परिगण्यते। अद्वैतवेदान्ते ब्रह्ममात्रस्य सत्तास्ति एवं च घटादिसांसारिकपदार्थास्तु मिथ्या सन्ति। यतो ब्रह्मज्ञानेन घटादिज्ञानं बाधितं भवति यच्च ज्ञानं बाधितं तन्नास्ति–प्रमा। अतः घटादिसांसारिकज्ञानं प्रमा नास्ति। अस्याः दर्शनसम्बन्धिन्याः शङ्काया अत्र निवारणं कृतमस्ति। घटादिव्यवाहारिकपदार्थानां ब्रह्म-साक्षात्कारानन्तरमेव बाधः भवति। घटादीनां सांसारिकपदार्थानां बाधः सांसारिकदशायां न अपितु ब्रह्मसाक्षात्कारदशायामेव भवति। अतः घटादीनां सांसारिकपदार्थानां ज्ञानं सांसारिक-दशायां प्रामाणिकमेव मन्यते। अस्मात् प्रमालक्षणोच्चरितम् अबाधितं पदेनाभिप्रायो भवति–'संसारदशायामबाधितत्वम्।' अबाधितमिति कथिते सति तु त्रैकालिकमबाधितत्वमित्यर्थः भवति (यस्य त्रिकालेष्वपि बाधो न भवति) यत्केवलं ब्रह्ममात्रोपरि घटितं भविष्यति, न घटादिसांसारिकपदार्थेषु।

**

**सन्दर्भाः–**

1. न्यायसूत्रम्, वात्स्यायनभाष्यम्, पृ.116
2. ब्रह्मसूत्रम्, शाङ्करभाष्यम्, पृ.40
3. वेदान्तसारः (विद्वन्मनोरञ्जिनीटीकया सहितम्), पृ.25
4. वेदान्तपरिभाषा (धर्मराजाध्वरीन्द्रेण कृतम्) प्रत्यक्षपरिच्छेदः, पृ.6
5. तर्कसंग्रहः, पृ.80
6. वेदान्तपरिभाषा (धर्मराजाध्वरीन्द्रेण कृतम्) प्रत्यक्षपरिच्छेदः, पृ.6
7. तर्कसंग्रहः, पृ.75
8. वेदान्तपरिभाषा (धर्मराजाध्वरीन्द्रेण कृतम्) प्रत्यक्षपरिच्छेदः, पृ.6
9. तत्त्वचिन्तामणिः (गंगेशोपाध्यायकृतम्), पृ.43
10. वेदान्तपरिभाषा (धर्मराजाध्वरीन्द्रेण कृतम्) प्रत्यक्षपरिच्छेदः, पृ.7
11. विवेकचूडामणिः (शङ्कराचार्यकृतम्), श्लो.20
12. बृहदारण्यकोपनिषद्, 2.4.14
13. वेदान्तपरिभाषा (धर्मराजाध्वरीन्द्रेण कृतम्) प्रत्यक्षपरिच्छेदः, पृ.8
14. वेदान्तपरिभाषा (धर्मराजाध्वरीन्द्रेण कृतम्) प्रत्यक्षपरिच्छेदः, पृ.8
15. वेदान्तपरिभाषा (धर्मराजाध्वरीन्द्रेण कृतम्) प्रत्यक्षपरिच्छेदः, पृ.8

**

# रीतिविचारः

**डॉ. कृष्णकुमारकुमावतः**

'रीतिरात्मा काव्यस्य' इति मतस्य प्रतिपादक आचार्यवामनो रीतिसम्प्रदायस्य प्रधानाचार्यो बभूव। एतन्मते रीतिरेव काव्यात्मा। का च सा रीतिरिति जिज्ञासानिवृत्तये **''विशिष्टा पदरचना रीतिः, विशेषो गुणात्मा''** इति लक्षणं प्रतिपादितम्। वस्तुतो रीतिः काव्यरचनाशैली वर्तते तथा च गुणाश्रिता भवति। **''काव्यशोभायाः कर्त्तारो धर्माः गुणाः''** इति काव्यालङ्कारसूत्रे गुणानां परिभाषा प्रदत्ता। आलङ्कारिका रीतिमते गुणानां विशेषभूमिकानुभवन्ति, एतस्मात् कारणदिदञ्च रीतिमतं गुणसम्प्रदायनाम्नाऽपि व्यवहृतं जायते। प्राचीनकालादेव साहित्ये रीतिरिति शब्दस्य प्रयोगो दृश्यते। रीतिः शब्दो हि रीङ् धातोः निष्पन्नः, यदर्थश्च चलनं गमनं निर्माणञ्चेति। सरस्वतीकण्ठाभरणे भोजराजेन तु रीतीनां साहित्यमार्गेण रचनायाः क्रमेण वा सम्बन्धो दर्शितः। यथोच्यते भोजराजेन–

**वैदर्भादिकृतः पन्थाः काव्ये मार्ग इति स्मृतः।**
**रीङ्गताविति धातोः सा व्युत्पत्त्या रीतिरुच्यते॥**[1]

'रीणन्ति गच्छन्त्यस्यां गुणा इति' अर्थात् यस्यां गुणानां सन्निवेशो भवति सा रीतिः, एवमेव **'रीयते क्षरन्त्यस्यां वाङ्मधुधारेति वा रीतिः'** इत्यादयोऽपि रीतिशब्दस्य परिभाषाः व्युत्पत्तयश्च प्राप्यन्तेऽस्माभिः। ऋग्वेदेऽप्यनेकेषु स्थलेषु रीतिशब्दस्य प्रयोगोऽभवत् यथा ''महावरीतिः शवसा सरत् पृथक्[2] वातेवाजुर्यानद्येव रीतिः,[3] तामस्यरीतिपरशोरिव''[4] इति। अत्र रीतिशब्दस्य प्रयोगो गतिधारामार्गविषयकार्थेषु विहितः। सम्प्रति काव्यगतरीतेः सुस्पष्टव्याख्या वामनस्य काव्यालङ्कारसूत्रे प्राप्यते। वामनात् प्राक् दण्डिभामहाभ्यामपि रीतिसङ्केतः स्वस्वलक्षणग्रन्थेषु कृतः। भरतमुनिनापि प्रवृत्तिपदेन रीतिः सम्बोध्यते। काव्यमीमांसायां राजशेखरेणोच्यते यथा–''रीतिनिर्णयं सुवर्णनाभः' इति परमिदानीं सुवर्णनाभस्य ग्रन्थावशेषो नोपलभ्यते। आरम्भसमये रीतीनां सम्बन्धो देशविदेशस्य रचनाशैल्या सहैवासीत्। यस्मिन् प्रदेशे प्रान्ते वा यादृशी रचनाशैली विशिष्टतामधिगता सैव रचनाशैली तत्प्रान्तनाम्ना

प्रसिद्धिमवाप्नोत्। यथा विदर्भदेशोत्पन्नानां महाकवीनामियं पदरचनाशैली वैदर्भी इति, पाञ्चाल (पंजाब) देशोत्पन्नानां महाकवीनामियं पदरचनाशैली पाञ्चाली इति, गौडदेशोत्पन्नानाम् अर्थात् बंगदेशोत्पन्नानां महाकवीनामियं पदरचनाशैली गौडी इति, लाट (गुजरात) देशोत्पन्नानां महाकवीनामियं पदरचनाशैली लाटी इति, एवंप्रकारेण रीतीनां सम्बन्धो देशप्रान्तैः सह स्थाप्यते। परमुत्तरवर्तियुगे रीतीनां सम्बन्धो देशप्रान्तैः सह न भूत्वा कवेः निजरचनाशैल्या अजायत। यथा गुणाश्रिता रीतिरिति सर्वैरङ्गीक्रियते। सर्वप्रथमं भरतमुनिः काव्यगतगुणानां प्रतिपादनं चकार। नाट्यशास्त्रानन्तरं भामहस्य काव्यालङ्कारे साहित्यरचनाया मार्गद्वयं प्राप्यते–वैदर्भमार्गो गौडीयमार्गश्चेति। भामहानन्तरं दण्डिना रीतीनामितोप्यधिकं वैज्ञानिकविश्लेषणं प्रस्तूयते। परमनेनापि रीत्यै मार्गशब्द एव प्रयुज्यते। दण्डिमते सूक्ष्मभेदकारणतः काव्यरचनाया अनेके मार्गा वर्तन्ते। गदत्यपि यथा–''**अस्त्यनेको गिरां मार्गः सूक्ष्मभेदः परस्परम्।**''[5] इति। प्रत्येकं कवेः रचनाशैल्याः पृथक्–पृथक् मार्गा भवन्ति। साहित्यशास्त्रे काव्यरचनायाः कति मार्गा इति मार्गगणनायां तु विद्यादात्री सरस्वत्यप्यसमर्था भवति। का गतिः पुनः सामान्यानामतो दण्डिमते मुख्यतया मार्गद्वयमेव। भणत्यपि यथा–**इति मार्गद्वयं भिन्नं तत्स्वरूपनिरूपणात्। तद्भेदास्तु न शक्यन्ते वक्तुं प्रतिकविस्थिताः॥**[6] दण्डिना काव्यरचनाया मार्गाणां सम्बन्धो गुणैः सह स्थापितः। वैदर्भमार्गस्य प्राणभूतान् दशगुणान् निर्दिशति यथा–

**श्लेषः प्रसादः समता माधुर्यं सुकुमारता।**
**अर्थव्यक्तिरुदारत्वमोजः कान्तिः समाधयः॥**
**इति वैदर्भमार्गस्य प्राणाः दश गुणाः स्मृताः।**
**एषां विपर्ययः प्रायो दृश्यते गौडवर्त्मनि॥**[7]

रचनायां विशिष्टता गुणानामवस्थित्या उत्पन्ना भवति, अत एव गुणानामुपरि रीतिरवलम्बिता तिष्ठति। इदञ्च रीतिमतं गुणसम्प्रदायनाम्नापि व्यवहृतं जायते। परं रीतितत्त्वस्य काव्यात्मतत्त्वरूपेण सविस्तरेण साङ्गोपाङ्गविवेचनं तु वामनेनैव क्रियते। नाट्यशास्त्रे प्रतिपादिता दशगुणास्तानेव वामनः शब्दार्थगतत्वेन द्विगुणितानकुरुत। वामनेन गुणालङ्कारयोः पार्थक्यं प्रदर्श्य रीतिसम्प्रदायोऽयं स्फुटं काव्यशास्त्रस्योपरि महानुपकारः कृतः। वामनेन गुणालङ्कारयोर्भेदः प्रदर्शितः यथा–''**काव्यशोभायाः कर्त्तारो धर्मा गुणाः।**'' ये खलु शब्दार्थयोर्धर्माः काव्यशोभां कुर्वन्ति ते गुणाः। ते चौजःप्रसादादयः। न यमकोपमादयः। वामनेन गुणानां मुख्यत्वं प्रदर्शितम्, अलङ्काराणाञ्च गौणत्वम्। ''**तदतिशयहेतवस्त्वलङ्काराः**''[8] एवंप्रकारेण वामनो गुणालङ्काराणां भेदं दर्शयित्वा शब्दार्थगुण-

निरूपणमारभते। यथा–**ओजःप्रसादश्लेषसमतासमाधिमाधुर्यसौकुमार्योदारतार्थ-व्यक्तिकान्तयो बन्धगुणाः। त एवार्थगुणाः।**[9] वामनाचार्येणेत्थं दशशब्दगुणानां तथा दशार्थगुणानां निरूपणं कृतम्। उभयोः शब्दार्थगुणयोर्नामानि तु समानान्येव वर्तन्ते। परं लक्षणानि भिन्नानि–भिन्नानि प्रदीयन्ते। वामनाचार्यमते शब्दगुणानां लक्षणानि यथा– ''गाढबन्धत्वमोजः, शैथिल्यं प्रसादः, मसृणत्वं श्लेषः, मार्गाभेदः समता, आरोहावरोहक्रमः समाधिः, पृथक्पदत्वं माधुर्यम्, अजरठत्वं सौकुमार्यम्, विकटत्वमुदारता, अर्थव्यक्ति-हेतुत्वमर्थव्यक्तिः, औज्ज्वल्यं कान्तिः'' वामनाचार्यमते अर्थगुणानां लक्षणानि यथा–**''अर्थस्य प्रौढिरोजः, अर्थवैमल्यं प्रसादः, घटना श्लेषः, अवैषम्यं समता, अर्थदृष्टिः समाधिः, उक्तिवैचित्र्यं माधुर्यम्, अपारुष्यं सौकुमार्यम्, अग्राम्यत्वमुदारता, वस्तुस्वभावस्फुटत्वमर्थव्यक्तिः, दीप्तरसत्वं कान्तिः''**[10] एवंप्रकारेण काव्यालङ्कारसूत्रकारेण शब्दार्थयोराहत्य विंशतिर्गुणाः स्मृताः। भरतदण्डिवामनादिभिः शब्दार्थयोः ये गुणा उक्ताः, मम्मटविश्वनाथादयो माधुर्यौजःप्रसादेष्वेव तानन्तर्भाव्य गुणानां त्रैविध्यमेव प्रतिपादितवन्तः। वामनाचार्येण वैदर्भीरीतेः स्पष्टप्रतिपत्तये उक्तदश-गुणानामत्यधिकावश्यकता प्रदर्शिता। उक्तञ्च **'समग्रगुणा वैदर्भी'** समग्रैरोजःप्रसाद-प्रमुखैगुणैरुपेता वैदर्भी नाम रीतिः। अत्र श्लोकौ–

**अस्पृष्टा दोषमात्राभिः समग्रगुणगुम्फिता।**
**विपञ्चीस्वरसौभाग्या वैदर्भी रीतिरिष्यते॥**

तामेतामेव कवयः स्तुवन्ति–

**सति वक्तरि सत्यर्थे सति शब्दानुशासने।**
**अस्ति तन्न विना येन परिस्त्रवति वाङ्मधु॥**[11]

अथ वामनो गौडीयां लक्षयति यथा–**'ओजःकान्तिमती गौडीया'** अर्थात् यस्यां रीत्यामोजःकान्तिगुणौ विद्येते सा गौडीया नाम रीतिर्भवति। एवमपि ब्रवीति यत्–

**समस्तात्युद्भटपदामोजःकान्तिगुणान्विताम्।**
**गौडीयामिति गायन्ति रीतिं रीतिविचक्षणाः॥**[12]

पाञ्चालीं परिभाषयति यथा–**''माधुर्यसौकुमार्योपपन्ना पाञ्चाली''** अर्थात् माधुर्येण सौकुमार्येण च गुणेनोपपन्ना पाञ्चाली नाम रीतिः। इदमप्युक्तं वामनेन यथा–

**अश्लिष्टश्लथभावां तां पूरणच्छायया श्रिताम्।**
**मधुरां सुकुमारां च पाञ्चालीं कवयो विदुः॥**[13]

एवंप्रकारेण **'सा त्रेधा वैदर्भी गौडीया पाञ्चाली चेति'** इत्युक्त्वा तिसृणां रीतीनामुल्लेखः कृतो वामनेन स्वकाव्यालंकारसूत्रे। रीतिसंख्याविषयेऽपि बह्व्यो विप्रतिपत्तयो वर्तन्ते। यथा– दण्डिना मार्गद्वयं स्वीक्रियते, भणत्यपि–अस्त्यनेको गिरां मार्गः सूक्ष्मभेदः परस्परम्। तत्र वैदर्भगौडीयौ प्रस्फुटान्तरौ।। दण्डिमते वैदर्भगौडीयौ इति द्वे रीती भवतः। आचार्यदण्डी रीत्यै मार्गशब्दं गदति। केशवेन त्रिविधा रीतिर्निर्दिष्टा, यथा ''तत्तद्रसोपकारिण्यस्तत्तद्देशसमुद्भवाः। पद्येषु रीतयो गौडी वैदर्भी मागधी तथा।।'' इत्यत्र मागध्येव पाञ्चाली। मम्मटेनापि तिस्रः वृत्तयः (रीतयः) स्वीकृताः। मम्मटस्तु रीतिवर्णनं वृत्त्यनुप्रासालंकारान्तर्गते एव करोति। त्रिविधो वृत्त्यनुप्रास उपनागरिकापरुषाकोमलाश्चेति। कैश्चिदेता एव रीतयो मताः। भणति च– **माधुर्यव्यञ्जकैवर्णैरुपनागरिकोच्यते। ओजःप्रकाशकैस्तैस्तु परुषा कोमला परैः॥ केषाञ्चिदेता वैदर्भीप्रमुखा रीतयो मताः। एतास्तिस्त्रो वृत्तयः वामनादीनां मते वैदर्भीगौडीपाञ्चाल्याख्या रीतयो मताः।**[14] रुद्रटेन चतस्रः रीतयः प्रतिपादिताः, यथा–पाञ्चाली लाटीया गौडीया वैदर्भी चेति। भोजराजमतेन तु षट् रीतयोऽवगम्यन्ते, यथा–वैदर्भी चाथ पाञ्चाली गौडी चावन्तिका तथा। लाटीया मागधी चेति षोढा रीतिर्निगद्यते। वामनराजशेखरकुन्तकानन्दवर्धनोद्भट्टमम्मटहेमचन्दसिंहभूपालजगन्नाथादिभिराचार्यैः त्रिविधा रीतिरुच्यते। तथा च रुद्रटवाग्भट्टामृतानन्दजयदेवविश्वनाथादय आचार्याः चतस्रो रीतय इत्यामनन्ति। शारदातनयेनापि रीतीनां चतुर्षु मुख्यभेदेषु सौराष्ट्री द्राविडी चेति रीतिद्वयं योजयित्वा षट् रीतयः स्वीकृताः। विद्याधरेण तु षट् रीतयः निरूप्यन्ते। नरेन्द्रप्रभसूरिणा द्वादश रीतयो मन्यन्ते। इत्थमालंकारिकैः स्वस्वकाव्यालंकारग्रन्थेषु भिन्नभिन्नतर्काश्रिता रीतिसंख्याव्यवस्था विहितेत्यवगम्यते। रीतिसम्प्रदाये रुद्रटस्याप्यतिमहत्त्वपूर्णं स्थानं दरीदृश्यते। रुद्रटः रीतिं भौगोलिकबन्धनादमोचयत। अनेनैव वामनोक्तासु तिसृषु रीतिषु लाटीं योजयित्वा साहित्यशास्त्रे चतसृणां रीतीनां स्थापना विहिता। रुद्रटो रीतीनां विभाजनं समासाधारितमकरोत्। लिख्यते च–

**वृत्तेरसमासाया वैदर्भी रीतिरेकैव।**[15]
**पाञ्चाली लाटीया गौडीया चेति नामतोऽभिहिताः।**
**लघुमध्यायतविरचनसमासभेदादिमास्तत्र ॥**
**द्वित्रिपदा पाञ्चाली लाटीया पञ्च सप्त वा यावत्।**
**शब्दाः समासवन्तो भवति यथाशक्ति गौडीया॥**[16]

सहैव रुद्रटेन रीतिषु रसानामन्तर्भाव्यत्वमपि प्रदर्शितम्, यथा–

**इह वैदर्भी रीतिः पाञ्चाली या विचार्य रचनीया।**
**मधुरा ललिते कविना कार्ये वृत्ती तु शृङ्गारे॥**

**वैदर्भी पाञ्चाली प्रेयसि करुणे भयानकाद्भुतयोः।**
**लाटीयगौडीये रौद्रे कुर्याद् यथौचित्यम्।।**[17]

राजशेखरोऽपि साहित्यशास्त्रे रीतीः रसपरिस्रावकानिवार्यतत्त्वं स्वीकरोति। लिख्यते च काव्यमीमांसायाम्– 'सति वक्तरि सत्यर्थे सति शब्दानुशासने। अस्ति तन्न विना येन परिस्रवति वाङ्मधु।।' इति। कुन्तको रीतये रीतिपदस्य प्रयोगं न कृत्वा मार्गपदस्य प्रयोगमकरोत्। क्रमशः वैदर्भीरीतये सुकुमारमार्गस्य, गौडीरीतये विचित्रमार्गस्य तथा च पाञ्चालीरीतये मध्यममार्गस्य प्रयोगः कृतः। एवमपि ब्रूते यत् कालिदासादयः सुकुमारमार्गस्य, मातृगुप्तादयो मध्यममार्गस्य तथा च बाणभट्टभवभूत्यादयो विचित्रमार्गस्य कवयो बभूवुः। परमाचार्यराजशेखरेण त्वित्थमपि प्रवृत्तिवृत्तिरीतीनाञ्च विषये निर्दिश्यते यत् 'वेशविन्यासक्रमः प्रवृत्तिः विलासविन्यासक्रमो वृत्तिः, वचनाविन्यासक्रमो रीतिः।' इति। शारदातनयस्तु वचनविन्यासक्रममेव रीतेराधारं मनुते। भणत्यपि–

**बुद्ध्यारम्भानुभावेषु रीतिः प्रथममुच्यते।**
**रीतिर्वचनविन्यासक्रमः सापि चतुर्विधा।।**
**तत्र वैदर्भपाञ्चाललाटगौडविभागतः।**
**सौराष्ट्री द्राविडी चेति रीतिद्वयमुदाहृतम्।।**[18]

अलंकारसंग्रहे अमृतानन्देनापि चतसृणां रीतीनां प्रदर्शनं कृत्वा 'रीतिरात्मा काव्यस्य' इत्यङ्गीक्रियते। लिख्यते च– 'रीतिरात्मा काव्यस्य कथ्यते या चतुर्विधा' इति। ध्वनिवादिन आचार्या अपि विषयेऽस्मिन् स्वविचारान् प्रकटयन्ति। ध्वनिवादिनः पदसंघटनायाः विशेषतां रीतिममन्यन्त परमेते रीतिं काव्यस्य बाह्यतत्त्वरूपेणैव स्वीकुर्वन्ति न तु काव्यात्मतत्त्वरूपेण। आनन्दवर्धनमम्मटविश्वनाथादीनां मते पदसंघटनारीतिर्माधुर्यादिगुणानामाश्रयं प्राप्य रसानभिव्यक्ती-करोति। पण्डितराजजगन्नाथेन रीतीनां विस्तृतविवेचनं न कृतं, तथापि रसगङ्गाधरे वैदर्भीरीतेः विस्तृतविवेचनं मिलति। यथा–'अस्याश्च निर्माणे कविना नितरामवहितेन भाव्यम्, अन्यथा तु परिपाकभङ्गः स्यात्।' अर्थात् सावधानेन काव्येषु वैदर्भीरीतेरुपनिबन्धनं भवेत्। विश्वनाथेन साहित्यदपर्णे नवमे परिच्छेदे रीतीनां विस्तृतविवेचनं च प्रदर्शितम्। यथोच्यते विश्वनाथेन–

**पदसंघटना रीतिरङ्गसंस्थाविशेषवत्।**
**उपकर्त्री रसादीनां सा पुनः स्याच्चतुर्विधा।।**
**वैदर्भी चाथ गौडी च पाञ्चाली लाटिका तथा।**[19]

अत्र विश्वनाथो रसादीनामेव काव्यात्मत्वं प्रतिपाद्य 'रीतिरात्मा काव्यस्य' इति

वामनाभिमतस्य खण्डनमकरोत्। रसादिरेव काव्यात्मा न तु रीतिरिति साहित्यदर्पण-कारस्याशयः। ताः रीतयस्तु रसादीकानां पोषिका एवेति। अत्र बोध्यमिदं यत्– **यथाऽङ्गसंस्थाविशेषोऽङ्गिनं शरीरमुत्कर्षयंस्तदन्तर्यामिनं शरीरिणमप्युत्कर्षयति तथा गुणाभिव्यञ्जकपदवर्णसमासादिसंघटनात्मिका रीतिः शब्दार्थशरीर-काव्यमुत्कर्षयन्ती तदात्मभूतं रसादिकमप्युत्कर्षयति। एवञ्च रसाद्युपकारकः गुणाभिव्यञ्जकपदादिविन्यासो रीतिरिति लक्षणं फलितम्।**[20] वैदर्भीगौडीपाञ्चाली-लाटिकाश्चैतासां चतसृणां रीतीनां विश्वनाथः क्रमशः स्वरूपमाह। वैदर्भीं निरूपयति यथा–

**माधुर्यव्यञ्जकैर्वर्णै रचना ललितात्मिका।**
**अवृत्तिरल्पवृत्तिर्वा वैदर्भी रीतिरिष्यते॥**[21]

अर्थात् माधुर्यस्य तत्संज्ञकगुणस्य व्यञ्जकवर्णैर्युक्ता लालित्यस्वरूपा समासरहिता अथवा द्वित्रिमात्रपदघटितसमासविशिष्टा अल्पसमासवती वा रचना कविभिः वैदर्भीरीतिर्गद्यते। वैदर्भीरीतेरुदाहरणं यथा–

**अनङ्गमङ्गलभुवस्तदपाङ्गस्य भङ्गयः।**
**जनयन्ति मुहुर्यूनामन्तः सन्तापसन्ततिम्॥**

श्लोकोऽयं व्यञ्जकवर्णैर्युक्तोऽस्ति। विश्वनाथेन माधुर्यमोजःप्रसादश्चेति त्रयो गुणा मन्यन्ते। विश्वनाथो मार्धुयगुणस्य स्वरूपं निरूपयनाह–

**चित्तद्रवीभावमयो ह्लादो माधुर्यमुच्यते।**
**संभोगे करुणे विप्रलम्भे शान्तेऽधिकं क्रमात्॥**[22]

माधुर्यव्यञ्जकान् वर्णान् दर्शयति यथा–

**मूर्ध्नि वर्णान्त्यवर्णेन युक्ताष्टठडढान्विना।**
**रणौ लघू च तद्व्यक्तौ वर्णाः कारणतां गताः॥**
**अवृत्तिरल्पवृत्तिर्वा मधुरा रचना तथा।**[23]

अथ विश्वनाथो गौडीं निरूपयति यथा–

**ओजः प्रकाशकैर्वर्णैर्बन्ध आडम्बरः पुनः। समासबहुला गौडी।**[24]

अर्थात् ओजोनामकस्य गुणस्य प्रकाशकैर्वर्णैः या रचना कृता भवति सा समासबहुला रीतिः गौडीनाम्ना संबोध्यते। ओजो गुणं निरूपयति यथा–

**''ओजश्चित्तस्य विस्ताररूपं दीप्तत्वमुच्यते।**
**वीरबीभत्सरौद्रेषु क्रमेणाधिक्यमस्य तु॥''**

अथौजोगुणव्यञ्जकवर्णादीन्निरूपयति यथा–

**वर्गस्याद्यतृतीयाभ्यां युक्तौ वर्णौ तदन्तिमौ।**
**उपर्यधो द्वयोर्वा सरेफौ टठडढैः सह।।**
**शकारश्च षकारश्च तस्य व्यञ्जकतां गताः।**
**तथा समासो बहुलो घटनौद्धत्यशालिनी।।**[25]

गौडीरीतेरुदाहरणं यथा वेणीसंहारनाटकस्योद्धतनायकस्य भीमसेनस्योक्तिरियम्–

**चञ्चद्भुजभ्रमितचण्डगदाभिघातसंचूर्णितोरुयुगलस्य सुयोधनस्य।**
**स्त्यानावनद्धघनशोणितशोणपाणिरुत्तंसयिष्यति कचांस्त्व देवि! भीमः।।**

श्लोकोऽयं समासबहुलो ओजोगुणव्यञ्जकवर्णैर्युक्तो गौडीरीतेरुदाहरणमस्ति। अथ साहित्यदर्पणकारो तृतीयां पाञ्चालीरीतिं लक्षयति यथा–

**वर्णैः शेषैः पुनर्द्वयोः। समस्तपञ्चषपदो बन्धः पाञ्चालिका मता।।**[26]

अर्थात् वैदर्भीगौड्योः अवशिष्टवर्णैः तथा पञ्चानां षण्णां वा समासयुक्तपदानां रचना पाञ्चालीरीतिरिति भवति। पाञ्चाल्या उदाहरणं शिशुपालवधस्य महाकाव्यस्य षष्ठसर्गस्य श्लोकोऽयं यथा–

**मधुरया मधुबोधितमाधवीमधुसमृद्धिसमेधितमेधया।**
**मधुकराङ्गनया मुहुरुन्मदध्वनिभृता निभृताक्षरमुज्जगे।।**

विश्वनाथो लाटीं निरूपयति यथा–

**लाटी तु रीतिर्वैदर्भीपाञ्चाल्योरन्तरे स्थिता।**[27]

अर्थात् वैदर्भीपाञ्चाल्योः रीत्योर्मध्ये स्थिता रीतिस्तु लाटी। वैदर्भीपाञ्चाल्योर्लक्षणाक्रान्ता लाटीरीतिरित्यर्थः। उदाहरति यथा–

**अयमुदयति मुद्राभञ्जनः पद्मिनीनामुदयगिरिवनालीबालमन्दारपुष्पम्।**
**विरहविधुरकोकद्वन्द्वबन्धुर्विभिन्दन् कुपितकपिकपोलक्रोडताम्रस्तमांसि।।**

विश्वनाथः कस्यचिदन्यस्यापि रीतीनां विषये मतं प्रकटीकरोति। भणति यथा–

**गौडी डम्बरबद्धा स्याद्वैदर्भी ललिताक्रमा।**
**पाञ्चाली मिश्रभावेन लाटी तु मृदुभिः पदैः।।**[28]

विश्वनाथेनेत्थं साहित्यदर्पणे नवमपरिच्छेदे सविस्तरेणोदाहरणसहितं रीतयो निरूप्यन्ते।

रीतीनां परस्परं श्रेष्ठताविषयेऽप्यालंकारिकाणां मध्ये मतभेदो दृश्यते। प्रायः काव्यशास्त्रज्ञाः वैदर्भीरीतेः श्रेष्ठतामङ्गीकुर्वन्ति। आचार्यदण्डी अपि ''इति वैदर्भमार्गस्य प्राणाः दश गुणाः स्मृताः'' इत्युक्त्वा वैदर्भमार्गं प्रशंसति। परं कुन्तकस्तु रीतीनामुत्तममध्यमाधमभावानेव न स्वीकरोति। कथ्यते च– **'न च रीतीनामुत्तममध्यमाधमभेदेन त्रैविध्यं व्यवस्थापयितुं न्याय्यम्। यस्मात् सहृदयाह्लादकारिकाव्यलक्षणप्रस्तावे वैदर्भीसदृशसौन्दर्य-सम्भवात् मध्यमाधमयोरुपदेशवैयर्थ्यमायाति। परिहार्यत्वेनाप्युपदेशो न युक्ततामवलम्बते, तैरेवानभ्युपगत्वात्।'**[29] इति। नवसाहसाङ्कचरिते परिमलगुप्तो वैदर्भमार्गं खड्गधारावदुवाच, यो मार्गः कालिदास-भर्तृमेण्ठादिभिः प्राचीनैः कविभिः प्रदर्शितः। यथा–

**तत्त्वस्पृशस्ते कवयो पुराणाः श्रीभर्तृमेण्ठप्रमुखा जयन्ति।**
**निस्त्रिंशधारासदृशेन येषां वैदर्भमार्गेण गिरः प्रवृत्ताः।।**[30] इति।

धनपालोऽपि तिलकमञ्जर्यां वैदर्भीरीतिं प्रशंसन् स्वमतं प्रस्तौति, यथा–'वैदर्भीमिव रीतीनामधिकमुद्भासमानाम्' इति। बिल्हणेनापि वैदर्भीविषये भण्यते यत् वैदर्भीरीतिरियं कर्णयोरमृतं वर्षति, सरस्वतीविलासानां जन्मभूमिरियं, वेदर्भीरीत्यां रचनाकौशलं सौभाग्यशालिनः कवय एव प्राप्नुवन्ति। लिख्यते च–

**अनभ्रवृष्टिः श्रवणामृतस्य सरस्वतीविभ्रमजन्मभूमिः।**
**वैदर्भरीतिः कृतिनामुदेति सौभाग्यलाभप्रतिभूः पदानाम्।।**[31]

नैषधीयचरिते श्रीहर्षेणाप्युच्यते यथा–

**धन्यासि वैदर्भि! गुणैरुदारैर्यया समाकृष्यत नैषधोऽपि।**
**इतः स्तुतिः का खलु चन्द्रिकायाः यदब्धिमप्युत्तरलीकरोति।।**[32]

इत्युक्त्वा श्रीहर्षेण नैषधीयचरिते महाकाव्ये वैदर्भीरीतेः प्रशंसा कृता। नीलकण्ठदीक्षितोऽपि नलचरितनाटके वैदर्भीरीतिं प्रशंसन् श्लोकमिमं प्रकटयति। यथा–

**आदिः स्वादुषु या, परा कवयता काष्ठा यदारोहणे**
**या ते निःश्वसितं, नवापि च रसाः यत्र स्वदन्तेतराम्।**
**पाञ्चालीति परम्परापरिचितो वादः कवीनां परं**
**वैदर्भी यदि सैव वाचि किमितः स्वर्गेऽपवर्गेऽपि वा।।**[33]

एवं वैदर्भीरीतिं श्लाघित्वा नीलकण्ठदीक्षितः स्वाभिप्रायं प्रकटयति। अतः रीतिषु वैदर्भीरीतिरेव सर्वश्रेष्ठेति प्रायः सर्वैः समालोचकैः संस्कृतकविभिश्चाङ्गीक्रियते, मुक्तकण्ठेन

च प्रशंस्यते। तथापि सर्वासामेव रीतीनां न्यूनाधिकमात्रायां काव्येषु प्रयोगः तन्महत्त्वञ्च दरीदृश्यत एव।

**निष्कर्षः**

'शब्दार्थौ शरीरं रसश्च तदात्मा' इति स्वीकारादेव वैदर्भीगौड्यादिरीतीनां गुणश्रितत्वमङ्गीकृतम्। आलंकारिकैः गुणनामपि रसधर्मत्वङ्गीकृत्य तेषां काव्यात्मनः सम्बन्धः प्रकल्पितः। गुणश्रिता रीतय इति सर्वैर्गद्यन्ते, वामनेनाप्युच्यते यथा–'पूर्वे नित्याः। पूर्वे गुणाः नित्याः, तैर्विना काव्यशोभानुपपत्तेः।' वामनमते गुणान् विना काव्यं न शोभते। वामनस्त्वलंकाराणामपेक्षया गुणानामेव महत्त्वं दर्शयति। यथा यौवनरहिताङ्गना अलंकारैरपि शोभां न प्राप्नोति तथैव अलंकारयुक्ता सत्यपि गुणरहिता रचना सहृदयान्नाकर्षति, शोभां न प्राप्नोति। वामनेनोच्यते यथा–'यदि भवति वचश्च्युतं गुणेभ्यो वपुरिव यौवनवन्ध्यमङ्गनायाः। अपि जनदयितानि दुर्भगत्वं नियतमलंकाराणि संश्रयन्ते।।'[34] इति। वामनोक्तं ''रीतिरात्मा काव्यस्य'' इति मतं ध्वनिवादिनोऽलंकारवादिनश्च न स्वीकुर्वन्ति। एतैः केवलं काव्यस्य बहिरङ्गसाधनत्वेनैव रीतयः प्रतिपादिताः। आनन्दवर्धनस्तु काव्ये रीतेर्महत्त्वं नाङ्गीकृत्य केवलं ध्वनेरुत्कर्षस्य साधनत्वेनैव रीतिं वर्णयति, न तु साध्यरूपेण। आनन्दवर्धनस्तु रीतिविषये एवमपि अवदत् यत्–

**अस्फुटस्फुरितं काव्यतत्त्वमेतद् यथोदितम्।**
**अशक्नुवङ्भिर्व्याकर्तुं रीतयः सम्प्रवर्तिताः।।**

अर्थात् रीतिवादिनोऽस्फुटस्फुरितस्य काव्यतत्त्वस्य व्याख्यां कर्तुमसमर्था आसन्, एतस्मादेव कारणादेतैः रीतिवादिभिः रीतयो निरूप्यन्ते इत्याशयः। विश्वनाथेनापि 'पदसंघटनारीतिरङ्गसंस्थाविशेषवत्' इत्युक्त्वा रीतिः रसादीनामुपकर्त्री एव स्वीकृता। जगन्नाथस्तु रीतीः माधुर्यादिगुणव्यञ्जकत्वमेव स्वीकरोति न तु रसादिव्यञ्जकत्वम्। जगन्नाथेन गद्यते यथा–**वर्णरचनाविशेषाणां माधुर्यादिगुणव्यञ्जकत्वमेव न रसादिव्यञ्जकत्वम्, गौरवान्मानाभावाच्च।**[35] एवंप्रकारेण प्रायः ध्वनिवादिभिरालङ्कारिकैः रीतिः काव्यस्य बहिरङ्गसाधनमेव मन्यते, काव्यात्मत्वेन नाङ्गीक्रियते तथापि काव्यसमालोचनायां वामनोक्तस्य रीतिमतस्य अधिकं महत्त्वं दरीदृश्यत एव। वामनप्रदत्तान् काव्यशोभाधायकान् गुणान् सर्वे काव्यशास्त्रज्ञाः स्वीकुर्वन्ति। गुणान् विना काव्ये काव्यत्वं न सम्भवति। रीतितत्त्वस्य विश्लेषणपूर्वकनिरूपणानन्तरं प्रकरणमुपसंहरन् वक्तुं कामये यत् बहवः काव्यशास्त्रज्ञाः रीतिं काव्यात्मतत्त्वरूपेण नामनन्ति तथापि प्रसङ्गानुकूलविशिष्टपदरचनायां रीतीनां महत्त्वं सर्वैरनुभूयते। नूनं अलङ्कारसम्प्रदायस्याचार्याणामपेक्षया रीतिमतस्याचार्यैः काव्यमूलमुत्तमरीत्या

विश्लेष्यते। वस्तुतः रीतेः सम्बन्धः कवेः स्वभावेन सहास्ति। कविः स्वस्य मूलप्रकृत्यनुगुणम् अर्थात् स्वस्वभावानुगुणं विषयानुकूलपदानि रचयितुं प्रवर्तते, सैव रीतिः। रीतिवादिनः काव्यतत्त्वस्य समीक्षामतिसूक्ष्मतया वैज्ञानिकपद्धत्या चोपस्थापयितुं कल्पन्ते। निश्चयेन रीतिः पदरचनारूपविशिष्टतया पदार्थगतसौन्दर्येण चानुप्राणिता भवति। परं वामनाचार्यानन्तरं न त्वलङ्कारवादिभिः नैव ध्वनिवादिभिराचार्यैः रीतिः काव्यात्मत्वेन परिगण्यते। ध्रुवं काव्ये रसध्वन्योश्च विद्यमाने सति सहृदयजनो लाकोत्तरानन्दमनुभवति। नूनं पदसंघटना-रूपरीतिः उक्तिवैचित्र्यमात्रैव वर्तते। सा रसादीनामुपकर्त्री भूत्वा रसादीनामुत्कर्षस्य कारणभूता एव भवितुं शक्नोति न तु काव्यात्मा। परं काव्यसमालोचनायां वामनोक्तस्य रीतितत्त्वस्यातिशय-महत्त्वमस्त्येव।

**

**सन्दर्भाः–**


1. सरस्वतीकण्ठाभरणम्, 2.51
2. ऋग्वेदः, 2.27.14
3. ऋग्वेदः, 2.39.5
4. ऋग्वेदः, 2.48.4
5. ऋग्वेदः, 1.40
6. ऋग्वेदः, 1.101
7. काव्यादर्शः, 1.41-42
8. काव्यालङ्कारसूत्राणि, पृ.100
9. काव्यालङ्कारसूत्राणि क्रमशः 3.1.4, 3.2.1
10. काव्यालङ्कारसूत्राणि 3.1.5 तः 3.2.14
11. काव्यालङ्कारसूत्राणि, पृ.17
12. काव्यालङ्कारसूत्राणि, पृ.19
13. काव्यालङ्कारसूत्राणि, पृ.21
14. काव्यप्रकाशः, 9.81
15. काव्यप्रकाशः, 1.6

16. काव्यप्रकाशः, 2.4-5
17. काव्यप्रकाशः, 14.37 तथा 15.20
18. भावप्रकाशनम्, पृ.11
19. साहित्यदर्पणः, 9.1-2
20. साहित्यदर्पणः लक्ष्मीटीका, पृ.598
21. साहित्यदर्पणः, 9.2
22. साहित्यदर्पणः, 8.1-2
23. साहित्यदर्पणः, 8.3
24. साहित्यदर्पणः, 9.3
25. साहित्यदर्पणः, 8.4-6
26. साहित्यदर्पणः, 9.4
27. साहित्यदर्पणः, 9.4
28. साहित्यदर्पणः, 9.4 वृत्तिश्लोकः
29. वक्रोक्तिजीवितम्, पृ.46
30. नवसाहसाङ्कचरितम्, 2.5
31. विक्रमांकदेवचरितम्, 1.9
32. नैषधीयचरितम्, 3.116
33. नलचरितनाटकम्, 3.18
34. काव्यालङ्कारसूत्राणि, 3.12
35. रसगङ्गाधरः, प्रथमाननम्

**

## किञ्चिद् रामायणीयम्

*** राम एतादृशः–**

- निभृतः
- संवृताकारः
- गुप्तमन्त्रः
- सहायवान्
- अमोघक्रोधहर्षः
- त्यागसंग्रहकालवित्
- दृढ़भक्तिः
- स्थिरप्रज्ञः
- न असद्ग्राही
- न दुर्वचः
- तन्त्राशून्यः
- अप्रमत्तः
- स्वदोषपरदोषवित्
- शास्त्रज्ञः
- कृतज्ञः
- पुरुषान्तरकोविदः
- यथान्यायं प्रग्रहानुग्रहयोः विचक्षणः
- सत्संग्रहानुग्रहणे निग्रहस्य च स्थानवित्
- आर्यकर्मणि उपायज्ञः
- संदृष्टव्ययकर्मवित्
- अस्त्रसमूहेषु श्रेष्ठः
- अर्थतन्त्रौ संगृह्य सुखतन्त्रः
- न अलसः
- वैहारिकाणां शिल्पानां विज्ञातार्थविभागवित्
- वारणवाजिनाम् आरोहे विनये च युक्तः
- धनुर्वेदविदां श्रेष्ठः
- लोके अतिरथसम्मतः
- अभियाता प्रहर्ता च
- सेनानयविशारदः
- क्रुद्धैः सुरासुरैः अपि संग्रामे अप्रधृष्यः
- अनसूयः
- न दृप्तः
- न मत्सरी
- भूतानाम् अवज्ञेयः न
- न कालवशानुगः।

**-अयोध्या. 1/23-30**

*** श्रीरामस्य तुलना एभिः सह– रामः**

- क्षमागुणैः धृत्या वसुधा इव
- बुद्ध्या, मतौ बृहस्पतिः इव
- वीर्ये शचीपतिः इव, यमः इव
- अंशुभिः दीप्तः सूर्यः इव
- लोके वृष्टिमान् पर्जन्यः इव

**-अयोध्या. 1/23-39**

# कृष्णात्रेयकवेः काव्येषु कला सौन्दर्यञ्च

**डॉ. तन्मयकुमारभट्टाचार्यः**

कृष्णात्रेयकवेः सीतानाथशास्त्रिणः काव्यकला बहुधा विभक्ता। क्वचित् सा देवतानन्दनात्मिका, क्वचिन्महापुरुषस्तुत्यात्मिका, क्वचित् सज्जनानां प्रशंसनास्वरूपा, कुत्रचिद् विशिष्टव्यक्तीनामभिनन्दनरूपा, कुत्रापि देशवन्दनाविधानतत्परा, क्वचिदहो प्रेमोपजीव्या, क्वचिच्च साम्प्रतिकसमाजस्थितेः प्रतिबिम्बभूता, क्वचिद्वा शोकगाथोपजीव्या, कस्मिन्नपि वा भाषान्तरात् संस्कृतभाषायामनुवादरूपा। सा च कला कुत्रापि सरला वास्तवताभित्तिका क्वचिच्च प्रोद्दामकल्पनोतुङ्गचारिणी। क्वचित् क्वचित् सा व्यङ्ग्यबहुला, अन्यत्र क्वचिच्च व्यङ्ग्यस्वरूपिणी। आचार्यकवेः काव्यकला बाहुल्येन कविताश्रयिणी। सा च क्वचित् प्रचलितां छन्दोनीतिं पूर्णतोऽनुसरति, क्वचिद्वा व्यभिचरति। कुत्रापि पुनरंशतोऽनुसरति। क्वचिच्च पुनः सा मुक्तकच्छन्दसा आत्मानमाविर्भावयति। कुत्रापि सा भाषान्तरीयशब्दान् संस्कृत्य गृह्णाति, कुत्रापि पुनः यथास्थितमेव समादत्ते। सौन्दर्यरहितं काव्यं न कदाचित् सम्भवति। सैन्दर्यमेव काव्यस्य जीवातुभूतम्। कृष्णात्रेयकवेः काव्येष्वपि काव्यसौन्दर्यस्य भूयान् प्रकाशः परिलक्ष्यते। तच्च सौन्दर्यं क्वचिच्छब्दप्रयोगचातुर्य्यात्, क्वचिदर्थविन्यासगौरवात्, कुत्रापि अलङ्कारवैभवविस्तारात् कस्मिन्नपि तद् रसभावादिध्वन्यर्थ-सद्भावात्, कुत्रापि वा वक्रताविशेषविनिवेशनाज्जायमानं भवति।

**कृष्णात्रेयकवेः काव्यानीमानि सन्ति—**1. भावविलसितम्, 2. शिशुयुवदुर्दैव-विलसितम्, 3. का त्वं शुभे, 4. काव्यनिर्झरी, 5. गौरीनाथचरितम् , 6. कविते विश्व-वन्दिते, 7.ग्रन्थाकारेण अप्रकाशिताः, पत्रिकासु प्रकाशिताः अप्रकाशिताश्च काश्चन कविताः।

**एवं काव्यकला चित्रा कृष्णात्रेयकवेः कृतौ।**
**दृष्टौ सचेतसां भाति यस्याश्चित्रं करिष्यते॥**
**प्रबन्धेऽस्मिन् मया तावदुदाहरणसंयुतम्॥**
**काव्यसौन्दर्यमत्रापि स्यात्समीक्षितमप्यहो॥**

सर्वासु कलासु एव मानवानां सृजनशीलतायाः प्रकाशः भवत्येव। कविः शिल्पी, कलाकारः, सङ्गीतज्ञः इत्येते प्रजापतेः ब्रह्मणः सगोत्राः सन्ति। कलायाः सौन्दर्यस्य चेत्यनयोः शब्दयोः परिधिः कियान्, व्यापकता वा कियतीति सुनिर्दिष्टा काचन रूपरेखा नास्ति। सङ्कीर्णेऽर्थे कला इत्युक्ते अङ्कनं, चित्रं, भास्कर्यं, सङ्गीतं, साहित्यं, चारुकला चेति, एतदतिरिच्य सर्वमपि चारुकलान्तर्गतमस्ति। इयं कला एव सौन्दर्यस्य अवलम्बनभूतेति नन्दनतत्त्वविदामभिमतम्, अर्थात् कलासौन्दर्ययोर्मध्ये आधाराधेयसम्बन्धः। भारते भरतमुनि-प्रणीतं नाट्यशास्त्रमेव प्राचीनतमं प्रामाणिकञ्च सौन्दर्यशास्त्रम्। आचार्येण वामनेनोक्तं सौन्दर्यमलङ्कारः इति। अन्ये आचार्याः साक्षात् सौन्दर्यम् इति नोक्तवन्तः, परन्तु रमणीयता, चारुता, लालित्यमित्यादिभिः पर्यायशब्दैः सौन्दर्यस्य प्रयोगं कृतवन्तः। कलां विना सौन्दर्यं निरर्थकम्। सौन्दर्यपिपासा, सौन्दर्यसम्भोगानुभूतिः, सौन्दर्यबोधश्चैव सौन्दर्यदर्शनस्य भित्तिभूमिः। प्रत्येकं कविकर्मणः यत् सौन्दर्यं तदावेदनस्य यः साधारणधर्मस्तदेव सौन्दर्यदर्शनस्य अवलम्बनम्। सौन्दर्यस्य संज्ञानिरूपणं दुःशक्यमेव। केवलमनुभवेनैव सौन्दर्यम् अधिगतं भवति। सौन्दर्यं संज्ञारहितमनुभववेद्यमात्रम्– तच्च श्रव्यरूपेण, दृश्यरूपेण, विशुद्धकल्पनारूपेण वा अस्माकम् अन्तरात्मना युक्तं भवति, अनन्तरञ्च आनन्दं जनयति। सौन्दर्यस्यास्वादनं यथार्थं रसिकं सहृदयमेव अपेक्षते। सौन्दर्यं कीदृशं तत्त्वं तद् वर्णनया अन्यं बोधयितुं न शक्यते। रसिकः सहृदयः स्वयमेव सौन्दर्यस्यास्वादनं कुरुते। अतः सौन्दर्यमात्मगतं न तु वस्तुगतम्। सौन्दर्यं कियद् वास्तवगतं कियद् वा कल्पनागतम् एतस्य सत्यस्योद्घाटनमपेक्षितं, यच्चेदानीमपि रहस्यावृतम्। सौन्दर्यस्य जगत् कियल्लोकायतं, कियल्लोकोत्तरं वा प्रश्नस्यास्य समाधानमावश्यकम्। आनन्द. के. कुमारस्वामिमहोदयस्य मतमिदं यत्–सौन्दर्यं चिरन्तनं विश्वजनीनमखण्डमविभाज्यमविश्लेष्यम-परिवर्तनीयमपरिमापकञ्चेति कारणं तत्सौन्दर्यस्वरूपं ब्रह्मणोऽङ्गीभूतं, यच्च ब्रह्म अखण्डमद्वितीयञ्च। आत्मानन्द एव सौन्दर्यस्य चरमा परिणतिः। कलाकौशलम् इत्यत्र कौशलं यदा कलामतिक्रमेत, तदैव तत्र सौन्दर्यमपि अस्तमितं भवतीति, कवीन्द्रेण रवीन्द्रेणोक्तम्। अतः कविः, कलाकारः, शिल्पी, गायकः, नटः चेत्यादयः तदैव सार्थकाः भवन्ति, यदा तेषां कलायां सौन्दर्यं सहजतया अकृत्रिमतया च परिस्फुटं भवति।

भारतीयसौन्दर्यदर्शनस्य त्रयो मतवादाः सन्ति–1. रसब्रह्मवादः, 2. नादब्रह्मवादः, 3.वास्तुब्रह्मवादः। काव्यकलातः रसब्रह्मवादः, सङ्गीतकलातः नादब्रह्मवादः, स्थापत्यशिल्प-मूर्तिकलादिभ्यः वास्तुब्रह्मवादश्चेति। भारतीयसौन्दर्यदर्शनं भारतीयाध्यात्मचिन्तनेन समं समवायसम्बन्धेन युक्तमस्ति। भारते काव्यकलायां सर्वमपि अन्तर्भवति, तस्यां जीवनस्य

निसर्गस्य च सौन्दर्यम् आविर्भवति। उक्तञ्च नाट्यशास्त्रकृता–

**न तच्छास्त्रं न तच्छिल्पं न सा विद्या न सा कला।**
**नासौ योगो न तत्कर्म नाट्येऽस्मिन् यन्न दृश्यते॥**
**सर्वशास्त्राणि शिल्पानि कर्माणि विविधानि च।**
**सर्वशास्त्रार्थसम्पन्नं सर्वशिल्पप्रवर्त्तकम्॥**[1]

इत्यादिभिः वचनैः प्रमाणितं भवति यत् काव्यकलायां सर्वमपि समाहितमस्ति। किञ्च साहित्यदर्पणकृता विश्वनाथेनोक्तम्–**चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि।** इति। न केवलं काव्यकलायामपि तु सर्वास्वपि कलासु तत्सौन्दर्यं सहृदयाः आस्वादयन्ति। भारतीयसंस्कृतौ सत्यस्य शिवस्य सुन्दरस्य च पूजा विधीयते। भारतीयसाहित्यतत्त्वमीमांसकानां मते 'कला' चित्तानन्दजनिका, हृदयाह्लादकारिणी, सहृदयहृदयहारिणी, प्रेमप्रवाहिनी, भक्तिसञ्चारिणी, रसास्वादनसुखदायिनी, कवीनां कविताकामिनी चास्ति। तदास्वादनजन्यं सौन्दर्यं, जडमपि सञ्जीवयति, निर्बलं सबलयति, निरुत्साहिनं समुत्साहयति, अमलं यशस्तनोति, व्यवहारिणं व्यवहारज्ञानं समुपदिशति, निरञ्जनं रञ्जयति, दुःखिनं सुखयति, वज्रहृदयं सुकोमलं करोति, सृष्टिसुखेन आसंसारं प्लावयति च। भारतीयदार्शनिकाः जीवनस्य सर्वेषु क्षेत्रेषु कलामाध्यमेन सौन्दर्यस्य साधनामेव कुर्वन्ति। भारतीयसंस्कृतकाव्येषु तस्यैव सौन्दर्यस्य पराकाष्ठा परिलक्ष्यते। यतो हि–सौन्दर्यनिःस्यन्दा एव गुणालङ्काररीतयः। इमे सन्ति संस्कृतकाव्यानामुत्कर्षहेतवः। भारतीयसाहित्यतत्त्वमीमांसकाः कैश्चित् सिद्धान्तैः तन्नाम रसालङ्काररीतिध्वनिवक्रोत्यौचित्यादिभिः तत्सौन्दर्यं काव्यकलायां समुद्भासयन्ति। मतानि भिन्नभिन्नानि सन्ति, मार्गास्त्वनेके सन्ति, परन्तु सर्वेषां लक्ष्यं सौन्दर्याराधनमेव। तच्च सौन्दर्यं परिभाषितं काव्यतत्त्वविद्भिः विविधैः भणितिवैचित्र्यैः, विविधैरौचित्यैः, रसालङ्काररीतिध्वन्यादिभिश्च। तदेव सौन्दर्यमहोरात्रमुपासितं भवति, लोकयात्रायां, काव्यकलायां, सङ्गीतकलायां, चारुकलायाञ्च तज्ज्ञैः सौन्दर्योपासकैः। कृष्णात्रेयकवेः काव्येषु सा सोन्दर्यधारा सततं निस्सरति, तया सौन्दर्यधारया सुस्नाताः सन्तः साहित्यसमालोचकाः नैर्व्यक्तिकमिन्द्रिय-सुखातीतमलौकिकमसामान्यं ब्रह्मास्वादसहोदरसुखमनुभवेयुरिति मे मतिः।

अर्वाचीनसंस्कृतसाहित्यपरिसरे कृष्णात्रेयकविः श्रीसीतानाथाचार्यशास्त्री सुपरिचितः। तेन बहुविधानि काव्यानि विरचितानि। तेषु चत्वारि ग्रन्थाकारेण प्रकाशितानि, तानि तावत् भावविलसितम्, शिशुयुवदुर्दैवविलसितम्, का त्वं शुभे, काव्यनिर्झरीति। ''गौरीनाथचरितम्'' 'कविते विश्ववन्दिते' इति काव्यद्वयं साहित्याकादम्याः संस्कृतप्रतिभायां प्रकाशितमस्ति। एतदतिरिच्य कानिचन काव्यानि विविधासु पत्रिकासु प्रकाशितानि वर्तन्ते।

कृष्णात्रेयकविः श्रीमान् सीतानाथाचार्यः कलिकाताविश्वविद्यालयीयसंस्कृतविभागे महामहोपाध्यायगोपीनाथकविराजपीठाचार्यपदमलङ्करोत्। स च महामहिमभारतराष्ट्रपतिभिः 2009 ईशवीयाब्दे सम्मानितः शासकीयप्रशस्त्या। विविधैः शैक्षणिकप्रतिष्ठानैः सारस्वतसंस्थाभिश्च बहुविधैः विरुदैः सभाजितः श्रीमान् कृष्णात्रेयकविवर्यः। तस्य कवित्वप्रतिभां प्रशंसद्भिः मान्यमान्यैः राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिचरैः कविसहृदयवरिष्ठैः विद्वद्वरेण्यैः आचार्यराधावल्लभत्रिपाठिमहोदयैः समीरितम्–

**सम्प्रति कवयो नैके सुरगिरि विविधा वितन्वन्ति रचनाः।**
**सीतानाथसदृक्षा विरलाः संवदनप्रवणाः॥**[2]

यद्यपि 'कला' शब्दस्य बहवोऽर्थाः भवन्ति, तथापि अस्माभिरत्र काव्यरचनाशैली इत्यर्थे एव कलाशब्दस्यास्य ग्रहणं कृतम्। तत्र वन्दनात्मिकाः बह्व्यः कविताः कविनानेन प्रणीताः। तथाहि– वाणीवन्दना, दशमहाविद्यावन्दना, महादेवमहिमपञ्चकम्, सन्तोषीमातृकावन्दना इत्यादयो देवतावन्दनात्मिकाः स्तुतयो विरचिताः। महापुरुषवन्दनात्मिकासु कवितासु कतिचन यथा–ओङ्कारनाथवन्दना, अनुकूलचन्द्रवन्दना, निगमानन्दवन्दना, सारदादेवीवन्दना, विवेकानन्दवन्दना, निगमानन्दवन्दना, लोकनाथवन्दना इति। सज्जनानां प्रशंसास्वरूपासु कतिचन यथा–रवीन्द्रप्रशस्तिः, शरत्प्रशस्तिरिति। विशिष्टव्यक्तीनामभिनन्दनरूपासु कवितासु कतिचन यथा– सुखमयसपर्या, विविन्दे श्रीरमारञ्जनम्,सीतानाथगोस्वामिगुरुं वन्दामहे, करुणासिन्धुवर्धापना, कुलपते राधावल्लभस्याभिनन्दनम् इत्यादयः। देशमातृकावन्दनं 'भारतं भ्राजते' इत्यादयो देशमातृकावन्दनरूपाः कविताः सन्ति।

निरुक्तासु कवितासु भक्तिभावो भक्तिरसो वा प्राधान्येन समभिव्यञ्जितः परिलक्ष्यते, किञ्च एतासु कवितासु विद्यमानः बहवः अलङ्काराः काव्यसौन्दर्यं वर्धयन्ति। दिङ्मात्रमुदाहरणं वाणीवन्दनायां यथा–

**आकाशं निर्मलं जलाशयजलं पद्मप्रभोद्भासितं**
**चान्द्रः कान्तिचयस्तुषाररहितो मालिन्यमुक्तोऽखिलः।**
**आम्रो मञ्जरितोऽप्यशोककुसुमं पूर्णं विकाशं गतं**
**सर्वं विश्वमिदं प्रसाधिततमं संलक्ष्यते साम्प्रतम्॥**[3]

अत्र श्लोके चतुर्थचरणगतवाक्यार्थं प्रति पूर्ववर्तिचरणत्रितयगतवाक्यार्थानां हेतुत्वात्, वाक्यार्थहेतुकं काव्यलिङ्गं नाम अलङ्कारः। स च अलङ्कारः काव्यसौन्दर्यं सातिशयं पुष्णाति।

अन्यच्च यथा–

**अब्धिमन्थनजं पीत्वा विषं ररक्ष यो जगत्।**
**अचिन्त्यरूपचारित्रं वन्दे तं शिवशङ्करम्॥**[4]

अत्र शिवशङ्करशब्दयोः आपाततः पुनरुक्तिः प्रतिभाति, पश्चात् शिवः कल्याणमयः, शङ्करो महादेव इति अर्थभेदः प्रतीयते, अत एवात्र पुनरुक्तवदाभासो नामालङ्कारः। तल्लक्षणं यथा साहित्यदर्पणे–

**आपाततो यदर्थस्य पौनरुक्त्यावभाषणम्।**
**पुनरुक्तवदाभासः स भिन्नाकारशब्दगः॥**

अन्यच्च–

**द्वैगुण्येनाञ्चितं श्लोकपञ्चकं पञ्चचामरैः।**
**पञ्चानन! कृतं वृत्तैर्महिमपञ्चकं तव॥**
**अनेन स्मरता पञ्चजनेन पञ्चवृत्तिना।**
**पञ्चाङ्गनतियुक्तेन प्रपञ्चोत्तरणार्थिना॥**
**आचार्यवंशजातेन श्रीसीतानाथशर्मणा।**
**यच्च नृत्यैः प्रयोगार्हं गेयञ्च स्वरपञ्चमैः॥**[5]

अत्र पञ्चेति स्वरव्यञ्जनसंहतेः क्रमेणावृत्त्या यमकं नामालङ्कारः। तल्लक्षणं यथा–

**सत्यर्थे पृथगर्थायाः स्वरव्यञ्जनसंहतेः।**
**क्रमेण तेनैवावृत्तिर्यमकं विनिगद्यते॥**

वन्दनाभिनन्दनाद्यात्मकेषु काव्येषु काव्यकलायाः काव्यसौन्दर्यस्य च सामासिकविचारः प्रदर्शितः।

कृष्णात्रेयकवेरस्य प्रेमदर्शनस्य यद्बीजं भावविलसितान्तर्गतायां 'कल्पना' नामिकायां कवितायां 'रजनीगन्धा' नामिकायां कवितायाञ्चोक्तमस्ति, तस्यैव व्यापकं रूपं 'का त्वं शुभे' इति काव्ये परिप्राप्यते। 135 सङ्ख्यकश्लोकविशिष्टे 'का त्वं शुभे' इत्यस्मिन् काव्ये शुभामधिकृत्य कवेः प्रेमदर्शनं विवर्तितेतराम्। कविदृष्ट्या प्रेमा द्विविधः सोपाधिकः निरुपाधिकश्चेति। तथा चोक्तं कविना–

**या मातृरूपेण सुताप्रकृत्या प्रियास्वरूपेण च राजमाना।**
**सोपाधिकं प्रेमरसं विचित्रं मितस्थितिं यच्छति लोकमध्ये॥**

**या तु प्रसन्ना पुनरेव नित्यामुपाधिशून्यां परमावभासाम्।**
**तुरीयप्रेम्णः शतशश्च धारामुन्मोच्यमानां कुरुते जनेषु॥**[6]

काव्यनायिका शुभा अत्र पार्थिवी काचित् सत्ता, अथवा कवेर्मानसी सृष्टिरित्यस्मिन् विषये कोऽपि निश्चयो न प्राप्यते। काव्यस्यास्यादौ सम्भोगशृङ्गारः समभिव्यज्यते। अनन्तरं सप्तविंशसङ्ख्यकश्लोकादारभ्य विप्रलम्भशृङ्गारः प्राधान्येन द्योत्यते। षट्त्रिंशत्तमश्लोकादारभ्य विस्मयस्थायिभावकः अद्भुतरसः लभते। कविरत्र विश्वस्य प्रतिपदार्थं शुभाया अस्तित्व-मनुभवति।

**सङ्गमविरहविकल्पे वरमिह विरहो न सङ्गमस्तस्याः।**
**सङ्गे सैव तथैका त्रिभुवनमपि तन्मयं विरहे॥** इति।

काव्यसमीक्षकवचनस्य वास्तवायनं जातं कवेरस्मिन् काव्ये। काव्येऽस्मिन् उपमा–रूपक–निदर्शनोत्प्रेक्षातिशयोक्तिप्रभृतीनां विचित्रितानामलङ्काराणां परम्परा काव्यसौन्दर्यं नितरां वर्धयति।

**शृङ्गारालम्बनोदारनायिकारूपवर्णनम् ।**
**वसन्तादि तदङ्गञ्च सच्छायमुपजातिभिः॥**[7]

'का त्वं शुभे' इत्यस्मिन् काव्येऽपि नायिकावर्णने उपजातिवृत्तं बहुत्र प्रयुक्तमस्ति। कृष्णात्रेयकवेः काव्येषु विचित्रच्छन्दसां सुन्दरो विन्यासः परिदृश्यते। एतदस्ति कवित्वस्य कश्चन महद्गुणः। क्षेमेन्द्रेणोक्तं यत्–

**एकस्मिन्नेव ये वृत्ते कृतो द्वित्रेषु वा श्रमः।**
**न नाम विनियोगार्हास्ते दरिद्रा इवोत्सवे॥**[8]

कृष्णात्रेयकवेः काश्चन कविताः साम्प्रतिकसामाजिकस्थितेः प्रतिबिम्बभूताः। तत्र 'शिशु-युवदुर्दैवविलसितं' नाम 132सङ्ख्यकश्लोकविशिष्टं समग्रमेकं काव्यं साम्प्रतिकसमाजे शिशूनां युवजनानाञ्च समस्यां विषयीकरोति। पश्चिमवङ्गभूमौ 'नदीया' मण्डलान्तःपातिनि 'देवग्राम' स्वास्थ्यकेन्द्रे 4.4.1995 इत्यस्मिन् दिनाङ्के 'पोलिओभ्याक्सिन्' इति प्रतिषेधकौषध-स्योपचारसमयतः चतुर्विंशतिघटिकाभ्यन्तरे बहवः शिशवो मृता इति वृत्तेन शोकाभिभूतस्य कविमनसोऽभिव्यक्तिरियं कृतिः। वैज्ञानिकसमुन्नतियुक्तेऽस्मिन् समयसीमनि प्रतिदशनिमेषकमेकस्य शिशोर्मरणं जायत इति परिसंख्यानमुद्धृत्य देवग्रामीयवृत्तस्य साधिक्षेपभङ्ग्या तुच्छताप्रतिपादनं क्रियते कविना। अनन्तरं कविमानसं देवग्रामीयदुर्घटनाविशेषस्य सीमानमतिक्रम्य अधुनातने समाजे प्रतिनियतमालोक्यमानं शिशुयुवजनानां दौर्भाग्यरूपं विषयसामान्यं समवतीर्य

समुपस्थापयति कदर्थनाबहुलां वास्तविकीं स्थितिम्। करुणरस एव प्रधानतया समभिव्यज्यमानः काव्यमाधुरीमातनोति। दिङ्मात्रमुदाहरणं यथा–

**सोढुं ज्वरं क्षमबला नहि कोमलाङ्गी**
**'मा'मेति रोदनपरा सुचिराय सोमा।**
**मातुः प्रियाङ्कशयने सुखसुप्तिमाप्ता**
**पाषाणमूर्तिरभवज्जननी च तस्याः॥[9]**

सोमायाः मरणदृश्यमिदं सहृदयसहृदये समुद्दीपयति शोकप्रवाहमतितराम्। रौद्रादयो रसविशेषाः अत्र अङ्गरूपेण विराजते। अत्र हिरण्यकशिपुः स्वपुत्रं प्रह्लादं घातयितुं दैत्यानेवमादिशति यथा–

**विषान्नदानैर्निशितास्त्रपातनैः**
**शुण्डाभिघातैरथ मत्तहस्तिनाम्।**
**आशीर्विषाणां दितिजांश्च दंशनै-**
**र्हन्तुं शिशुं तं बहुधा प्रयेतिरे॥[10]**

एतादृशेषु श्लोकेषु रौद्ररसस्याभिव्यञ्जना सुस्पष्टैव। काव्येऽस्मिन् प्रयुक्ता अलङ्काराः काव्यसौन्दर्यं नितरां वर्धयन्ति। दिग्दर्शनन्यायेनोदाहरणं यथा–सोढुं ज्वरम् इति समुद्धृते त्रयोदशे श्लोके जनन्याः पाषाणमूर्तिभवनासम्बन्धेऽपि तत्सम्बन्धकथनात् तस्य च सादृश्ये पर्यवसानात् असम्भवद्वस्तुसम्बन्धरूपा निदर्शना। सा च करुणरसस्याभिव्यञ्जनायां सहायतां करोति। तथैव 43श्लोके चतुर्थचरणे मुञ्चतीवाश्रु तासामित्यत्र वाच्योत्प्रेक्षालङ्कारः तमेव करुणरसं सुतरां पुष्णाति।

काव्यमिदमतिरिच्यापि कवेरस्य 'आधुनिककाश्यपस्योपदेशः', 'सदा बिभेमि नारीभ्यः', 'पतिरप्यस्या उपाक्रमत रोदितुम्', 'सिगारेटस्यात्मकथा', 'बुद्धः स्मयमानः', 'सन्त्रासविभीषिका', 'नागमो धरणीप्रान्ते', 'महारुद्रः सज्जीभवति ताण्डवे, 'दादाजनाः', एवमादिषु कवितासु साम्प्रतिकी सामाजिकी स्थितिः यथोचितभावेन प्रतिबिम्बिता। निरुक्तासु कवितासु वास्तवोचितवर्णनासौष्ठवमेव काव्यसौन्दर्यं वितनोति। साहित्यं समाजस्य मिथः परिपूरकम्। कविः सामाजिको जनः। तस्य साहित्ये सामाजिकी स्थितिः समुपस्थापिता सहृदयान् ह्लादयेत्। प्रसङ्गेऽस्मिन् अभिनवकाव्यालङ्कारसूत्रकारस्य आचार्यस्य राधावल्लभत्रिपाठिमहोदयस्योक्तिः प्रणिधानयोग्या। तथा चोक्तं तेन–

**साहित्ये जीवनं सर्वं सर्वाङ्गीणं नवं नवम्।**
**प्रतिबिम्बत्वमायाति समुल्लसति वर्धते।**

**अद्भुतः प्रतिबिम्बोऽयं विम्बमेव विभावयन्।**
**संस्कुर्वन् जीवनं तस्मिन् समवेतो नवायते॥**
**जीवने चास्ति साहित्यं साहित्ये जीवनं तथा।**
**परस्परकृता सिद्धिरनयोः सम्प्रवर्तते।**

उक्तञ्चापि कविसार्वभौमेन रवीन्द्रनाथेन–

**पृथिवीर येथा तार यत उठे ध्वनि,**
**आमार वॉशीर सुरे साड़ा तार जागिवे तखनि॥**

एतासु कवितासु रसध्वन्यलङ्कारादीनां काव्यसौन्दर्यसम्पादकोपादानानां विद्यमानत्वेऽपि तानि सर्वाण्यतिरिच्य वर्तते समाजमुखीनतेति अस्माकं विचारणा। विषयेऽस्मिन् दिङ्मात्रमुदाहरणं यथा–आधुनिककाश्यपस्योपदेशः इति कवितायां कन्यापिता सद्योविवाहिताम् उपदिशति–

**शुश्रूषस्व वरं तथाभिनयतः स्वल्पैरहोभिर्यथा**
**जामाता भविता त्वदेकशरणः स्वातन्त्र्यहीनश्चिरम्।**
**कन्ये क्रीडनमेव तदनु भोः प्रारभ्यतां कौशलात्**
**पित्रादेः स्वजनाद् यथा स कृपणो विच्छिन्नमूलो भवेत्॥**

कन्यकेयं स्वयमेव प्रणयं कृत्वा वरं वृतवतीति आधुनिकः पिता नितरामानन्दितचित्तः तामेवमुपदिशति। साम्प्रतिके समाजजीवने एतादृशं स्त्रीचरित्रं बाहुल्येन दृष्टिपथमायाति। कवितायामस्यां 'सहसा पतिरप्यस्या उपाक्रमत रोदितुम्' एवमादिकासु कवितासु स च साम्प्रतिककविकृतनारीजीवनस्य यथायथं चित्रं प्रतिबिम्बितमालोक्यते। 1998तमे ईशवीयाब्दे अटलविहारिवाजपेयिमहोदयस्य प्रधानमन्त्रित्वावसरे भारतस्य 'पोखरण'नामके स्थाने द्वितीयं यत् परमाणुविस्फोरणं जातं तस्य नाम आसीत् 'Buddha smiles' इति। समग्रे विश्वेऽस्य विस्फोरणस्य दारुणा प्रतिक्रिया आसीत्। अमेरिका–जापानप्रभृतयो देशाः भारतस्योपरि अर्थनैतिकीं निषेधाज्ञां ज्ञापितवन्तः। कृष्णात्रेयकवेः 'बुद्धः स्मयमानः' इति कवितायां रम्यया दिशा सर्वमेतद् वृत्तजातं वास्तवोचितया भङ्ग्या काव्यरूपं लभते। अन्तिमे कविनोक्तं यथा–

**माराभिघाते स्मयमानवक्त्रो निर्माणदीप्त्या स्मयमानवक्त्राः।**
**देशस्य विश्वस्य च शान्तिकृत्ये जागर्ति बुद्धः स्मयमानवक्त्रः॥**

आन्तर्जातिकख्यातिभाजः प्राच्यविद्यापारङ्गमस्य आचार्यस्य गौरीनाथस्य चरितं काव्यरूपतां नीतं कृष्णात्रेयकविना। साहित्याकादम्याः पत्रिकायां संस्कृतप्रतिभानामिकायां काव्यमिदं

प्रकाशितमभूत्। अत्र 248–सङ्ख्यकैः श्लोकैः गौरीनाथशास्त्रिणः वंशपरिचयो बाल्यजीवनं पठनपाठनप्रगतिः कलिकातास्थितराष्ट्रिय–संस्कृतमहाविद्यालयस्य अध्यक्षरूपेण तस्य अनन्य-साधारणकर्मदक्षता चेत्यादिकानि वृत्तानि सन्ति वर्णितानि काव्येऽस्मिन्। स्वकीये कर्मणि सदैवोत्साहवतः गौरीनाथस्य चरितमत्रोपजीव्यमिति कृत्वा वीरो रसः प्राधान्येनाभिव्यज्यते। उत्साहभावस्य गौरीनाथाश्रयमबाधितस्वरूपं वर्णयता कविनोक्तं यथा–

**हन्त तिष्ठन् वयस्येकचत्वारिंशत्तमे नवे।**
**पिता कस्माद्दिवं यातः संस्मरन्निव पूर्वजम्॥**
**स्निग्धं सहोदरं तावदमरनाथमात्मनः।**
**त्रिभ्यः संवत्सरेभ्यः प्रागमरलोकसङ्गतम्॥**
**गौरीनाथः स्थितप्रज्ञस्तेन नाभूद्धतोद्यमः।**
**विद्याव्यसनिता तस्य खण्डिता नाभवत् क्षणम्॥**
**दाहकार्यं समाप्यैव काशीमित्रस्य घट्टके।**
**श्मशाने च पितुः स्वस्य स्नात्वा च गमनं कृतम्॥**
**महाविद्यालयेऽनेन ट्रामयानेन पूर्ववत्।**
**स्वाभाविकेतरेणैव वेषेण समुपागतम्॥**[11]

काव्यस्यान्तिमेंऽशे भक्तिभावः प्राधान्यं लभते, तत्र कविना प्रणामाञ्जलिः निवेद्यते–

**गौरीनाथगुरो क्वास्ते चरितं ते महत्तमम्।**
**ज्ञानस्य कर्मणो भक्तेर्योगस्य च प्रकर्षवत्॥**
**सहस्रमार्गसञ्चारि विश्वविस्मयकारकम्।**
**क्व वास्य तव शिष्यस्य मतेर्मन्दतमा गतिः॥**[12]

अत्र काव्येऽलङ्कारसौन्दर्यमपि बाहुल्येन दृष्टिपथमायाति। दिङ्मात्रमुदाहरणं यत्–

**शताब्दस्याथ विंशस्य समस्याकुलितात्मनः।**
**नवमेऽब्दे द्वितीयस्य वंशेऽस्मिन् पुण्यशालिने॥**
**वाग्वाजारस्थिते गेहे गङ्गोर्मिकलनादिते।**
**गौरीनाथः शिशुः सौम्यदर्शनः समजायत॥**
**मन्ये ज्ञानार्थिनां मर्त्यवासिनां भक्तितोषितः।**
**गौरीनाथो धरां प्राप्तो हित्वा कैलासमन्दिरम्॥**[13]

अत्र गौरीनाथस्य शिवरूपेण सम्भावनाकरणात् मन्ये इति शब्दप्रयोगाच्च जायमानवाच्योत्प्रेक्षा काव्यशोभां नितरां वर्धयति।

'**कविते विश्ववन्दिते**'[14] इति काव्यं विलक्षणधर्मि। अत्र कवितेति काव्यपरम्। काव्येऽस्मिन् काव्यस्य विविधानि वैशिष्ट्यानि कविजनोचिततया सरसया भङ्ग्या समुपस्थापितानि। अत्र रसालङ्कारादीनां विद्यमानत्वेऽपि पूर्वोक्तानि वैशिष्ट्यान्येव परं काव्यसौन्दर्यमातनोति।

कविता मानवेन मानवान्तरस्य, जात्या जात्यन्तरस्य, अतीतेन भविष्यतः, देशेन देशान्तरस्य, कविना सहृदयस्य, अरण्यप्रकृत्या मानवप्रकृतेर्मेलनं साधयति। यथोदाहरणम्–

**मानवचेतसो मैत्री, मानवचेतसा सह।**
**जात्यैकया समं भिन्नजातेः परममित्रता॥**
**अतीतेनागतस्यापि सख्यमुज्ज्वलकान्तिकम्।**
**त्वयैव साध्यते कामं कविते विश्ववन्दिते॥**
**एकस्य देशस्य च भिन्नदेशैः,**
**सौहार्द्रसेतुं रचयस्यजस्त्रम्।**
**कवेर्हृदा सार्धमहो सचेतो,**
**हृदः सुमैत्रीं वितनोति सन्ततम्॥**
**सहारण्यप्रकृत्या त्वं मानवप्रकृतेः परम्।**
**निविडं मेलबन्धं भो विधत्से कविते शुभम्॥**[15]

एवमेव कृष्णात्रेयकवेः काव्येषु विनूतना कला यथा परिलक्ष्यते तथैव अनुपमं काव्य-सौन्दर्यञ्च सचेतसां हृदयं सततम् आह्लादयति। शम्।

**

**सन्दर्भाः–**


1. नाट्यशास्त्रम्, 1.116-117
2. काव्यनिर्झरी, प्रस्तावना
3. भावविलसितम्, पृ.1
4. काव्यनिर्झरी, पृ.6
5. काव्यनिर्झरी, 1-3, पृ.6
6. का त्वं शुभे, पृ.38
7. सुवृत्ततिलकम्, 3.17
8. तत्रैव, 3.26
9. शिशुयुवदुर्दैवविलसितम्, 13
10. तत्रैव, 106
11. गौरीनाथचरितम्, श्लो.65-71,पृ.9-27
12. तत्रैव, श्लो.242-243
13. तत्रैव, श्लो.46-48
14. कविते विश्ववन्दिते, पृ.11-21
15. तत्रैव, श्लो.23-26


**

# निम्बार्कमते जीवेश्वरयोः स्वरूपविमर्शः

**डॉ. रुम्पा सरकारः**

श्रीभगवन्निम्बार्काचार्याः स्वप्रणीतवेदान्तकामधेनुनामके दशश्लोकीति ग्रन्थे जीवस्य स्वरूपं निरूपयन्ति–

**ज्ञानस्वरूपञ्च हरेरधीनं शरीरसंयोगवियोगयोग्यम्।**
**अणुं हि जीवं प्रतिदेहभिन्नं ज्ञातृत्ववन्तं यदनन्तमाहुः॥**[1]

ज्ञानं स्वयं प्रकाशमानं वस्तु, तदेव स्वरूपं यस्य तं जीवम्, यद्वा ज्ञानं चित्स्वरूपं यस्य तं जीवमित्यर्थः। ज्ञानस्वरूपमाहुः–**'सा मां स्मृतिर्मृगदेहेऽपि वीर'।**[2] स्मृतिर्ज्ञानम्। ज्ञानस्वरूपमित्यनेन जीवस्य जडत्वं व्यावृत्तं, चकारात् तस्य ज्ञानाश्रयत्वमपि बोध्यं, यथा प्रकाशरूपस्यापि चन्द्रादेः प्रकाशाश्रयत्वं तथा ज्ञानस्वरूपस्यापि ज्ञानाश्रयत्वं युक्तम् एवमात्मा चिद्रूप एव चैतन्यगुण इति, चिद्रूपता हि स्वयं प्रकाशता। तत्र तार्किकाः स्वरूपत आत्मानं जडं स्वीकृत्य तत्र ज्ञानं गुणमुत्पत्तिविनाशवदिति स्वीकुर्वन्ति। बौद्धाः स्वरूपतोऽपि क्षणिकमाहुः, तन्मतं निर्मूलत्वेन निराकृत्य श्रुतिराह–**'न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वात्।'**[3] द्रष्टुः दर्शनाश्रयजीवस्य दृष्टेः धर्मभूतज्ञानस्य नाशः न भवतीति नित्यत्वात्। स्वप्नावस्थायां जीवात्मा स्वयं ज्योतिर्भवति ज्ञानस्वरूपत्वात्स्वयं प्रकाशो भवतीत्यर्थः।

**यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः।**
**क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत॥**[4]

यथैकः परिच्छिन्नार्कः स्वयं तेजस्स्वरूपोऽपि स्वतेजोरूपायाः प्रभाया आश्रयो भवति, स्वतेजोरूपया प्रभया कृत्स्नमिमं लोकं प्रकाशयति, तथा क्षेत्री क्षेत्रज्ञो जीवः अणुपरिमाणकोऽपि स्वधर्मभूतज्ञानेन कृत्स्नमापादतलमस्तकं क्षेत्रं प्रकाशयति हे भारत! एतेन जीवस्य ज्ञानस्वरूप-सिद्धिः। जीवेन कृतो यः प्रयत्नः धर्माधर्मलक्षणः तदपेक्षः परमात्माऽन्यस्मिन्नपि जन्मनि धर्मादिकं कारयति, तदनुरूपं सुखादिकं च ददाति। तस्माद्धि सर्वशक्तिः सर्वेश्वरः श्रीपुरु-षोत्तमः पूर्वकृतधर्माधर्माद्यनुसारेण धर्मादि कारयिता तदनुरूपफलदाताऽतो जीवस्य कर्तृत्वं परायत्तमिति सिद्धम्।

एवं पञ्चविधं लिङ्गं त्रिवृत् षोडशविस्तृतम्। एष चेतनया युक्तो जीव इत्यभिधीयते।[5] त्रिभिर्वर्त्तते इति त्रिवृत् त्रिगुणमयमेकादशेन्द्रियाणि पञ्च प्राणा इत्येवं षोडशविस्तृतम्। प्राणानामेकत्वविवक्षया सप्तदशतत्त्वात्मकं, प्राणस्य स्पर्शतन्मात्रे अन्तर्भावात् षोडशतत्त्वात्मकं लिङ्गशरीरमित्यभिधीयते। चेतनया ज्ञातृत्वलक्षणया युक्तः स्वयमपि ज्ञानस्वरूप एव जीवः कर्त्ता भोक्ता अभिधीयते। तथा च श्रुतिः **'आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः'**[6] शरीरेन्द्रियमनोभिः संयुक्तमात्मानं भोक्ता कर्तृत्वभोक्त्रादिमान् इत्याहुर्मनीषिणः। जीवस्य लिङ्गशरीरे आत्मत्वाभिमानात् लिङ्गशरीरस्यापि जीव इति क्वचित् सञ्ज्ञा अस्ति।

अनेन सूक्ष्मेण लिङ्गदेहेन पुरुषो जीवः देहान् स्थूलान् गृह्णाति विमुञ्चति हर्षादिकं चानेन विन्दति। अनेन जीवस्य कर्तृत्वं भोक्तृत्वं भोक्तृत्वादिकञ्च स्थूलदेहस्य कारणत्वं स्थूलदेहस्य हर्षादेश्च कर्मभूतस्यायतनत्वं भोग्यत्वञ्च प्रतिपादितं भवति। अणुपरिमाणात्मको जीवः। सूक्ष्माणामप्यहं जीवः। जीवोऽणुः अनेन प्रद्योतनेन एष आत्मा निष्क्रामति चक्षुषो वा मूर्ध्नो वा अन्येभ्यो वा शरीरदेशेभ्यः, ये वै केचनास्माल्लोकात्प्रयान्ति चन्द्रमसमेव ते सर्वे गच्छन्ति, तस्माल्लोकात् पुनरेत्यास्मै लोकाय कर्मणे इत्युत्क्रान्तिगत्यागतीनां श्रवणात्।[7] एषोऽणुरात्मा बालाग्रशतभागस्य शतधा कल्पितस्य च भागो जीव इति स्वशब्दोन्मानाभ्यां जीवोऽणुः।[8] अणुपरिमाणकः एष जीवात्मा विशुद्धमनसा वदितुं योग्यः। प्राणापानादि-रूपेण पञ्चप्रकारैः प्राणाः यस्मिन् सन्निविष्टाः यदाश्रिताः स इत्यर्थः।

**अणुत्वपरिमाणं यत् कथितं प्रत्यगात्मनाम्।**
**श्रुत्युक्तमेव तत् तस्माद् वैदिकैरुररीकृतम्॥**
**स्वरूपेणाणुमानोऽपि विभुज्ञानेन सर्वतः।**
**देहं व्याप्नोति हि तथा दुःखादेश्चानुभावुकः॥**
**एकत्रैव च संस्थोऽपि प्रकाशयति दीपवत्।**
**अणुर्वेत्यादि वाक्यञ्च श्रौतं स्पष्टं हि विद्यते॥**[9]

आचार्यपादोक्तजीवात्मनामणुपरिमाणकत्वमित्यादि श्रीमद्भागवतश्रुतिसूत्रप्रमाणैर्निधारितम्। तस्माद्वैदिकसम्प्रदायानुयायिभिर्जीवात्मनामणुपरिमाणत्वं स्वीकृतम्। अणुत्वपक्ष एव शास्त्रीयः, तस्माज्जीवस्याणुत्वसिद्धिः।

**एक एव हि भूतात्मा भूते भूते व्यवस्थितः।**
**एकधा बहुधा चैव दृश्यते जलचन्द्रवत्॥**[10]
**यथा ह्यवतितो बह्निर्दारुष्वेकः स्वयोनिषु।**
**नानेव भाति विश्वात्मा भूतेषु च तथा पुमान्॥**[11]

**सूर्यो यथा सर्वलोकस्य चक्षुर्न लिप्यते चाक्षुषैर्बाह्यदोषैः।**
**एकस्तथा सर्वभूतान्तरात्मा न लिप्यते लोकदुःखेन बाह्यः॥**[12]

भगवान् वासुदेव एक एव चेतनाचेतनवर्गे, कार्यवर्गे कारणवर्गे चान्तर्यमितया व्यवस्थितः सदैकरसानन्दरूपेणावस्थितोऽपि तद्गतदोषासंस्पृष्टमाहात्म्य एव दृश्यते। यथा चन्द्रः श्रीगङ्गादिपुण्यजलेषु शूकरादिविलोडितदुर्गन्धिगर्त्तादिजलेषु च स्वकरनिकरव्याप्त्या वर्तमानोऽपि तद्गतगुणदोषैर्न युज्यते, एवं ब्रह्मादिश्वपाकान्तेषु चेतनाचेतनेषु साम्येन स्वरूप-व्याप्त्या निष्ठन्नपि परमेश्वरो न तद्गतगुणदोषैर्युज्यते, अस्पृष्टस्वभावत्वात्। परमपुरुषः भगवान् वासुदेवो ज्ञानस्वरूपेणाणुपरिमाणकेन जीवेन स्वकृतपुण्यापुण्यकर्मफलभोगाय प्रवर्त्तितः। यथा आर्द्रोष्मोत्तमाधमादिषु स्वयोनिषु स्वाभिव्यक्तिस्थानेषु दारुषु वह्निः एक एव समास्थितः नानेव भाति तत्तत्काष्ठस्वभावानुसारेण सर्वप्रतापकोऽपि अल्पानल्पग्राह्या-ग्राह्यतया नानेव भाति, न तु नाना। तथा एक एव ईश्वरः विश्वात्मा भगवान् वासुदेवः श्रीकृष्णो भूतेषु समास्थितः प्रकृतिस्थोऽपि प्राकृतैर्गुणैः जीवान्तर्गतैः वातकफपित्तैः आध्यात्मिका-धिभौतिकाधिदैविकैश्च प्राकृतगुणदोषैर्न युज्यते, नैव लिप्यते। देहं देहं प्रति भिन्नमिति प्रतिदेहभिन्नम् ब्रह्मादि स्थावरान्तेषु जरायुजाण्डजस्वेदजोद्भिज्जेषु एतेषु चतुर्विधेष्वपि देहेषु स्वरूपेणैव भिन्नमिति। अनेन ईश्वरस्य जीवात्मनाञ्च महद्वैलक्षण्यमुक्तम्।

**सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद् वदन्ति।**
**यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं संग्रहेण ब्रवीमि॥**[13]
**यदक्षरं वेदविदो वदन्ति विशन्ति यद् यतयो वीतरागाः।**
**यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं संग्रहेण प्रवक्ष्ये॥**[14]
**अहमात्माऽत्मनां धातः प्रेष्ठः सन् प्रेयसामपि।**
**अतो मयि रतिं कुर्याद् देहादिर्यत् कृते प्रियः॥**[15]
**महान्तस्ते समचित्ताः प्रशान्ता विमन्यवः सुहृदः साधवो ये॥**[16]

नित्यो नित्यानामत्र प्रत्यगात्मनां नानात्वं नित्यत्वञ्चोक्तं भवति। प्रत्यागात्मनां नानात्वम-भिहितं तथैव यतयो वीतारागाः अहमात्माऽत्मनां, साधवः मुनयः, आखिलात्मनां, मूढा जनाः, योगिनश्चेत्यादिभिर्बहुवचनशब्दैः प्रत्यात्म नानात्वं विहितं, तथा च प्रतिदेहं भिन्नमिति अनेकमित्यर्थः। अनेन एकजीववादः स्वतो निरस्तो वेदितव्यः। तस्मादात्मैकत्ववादिनो भ्रान्ता एव इति निश्चीयते। जीवात्मनां नानात्वं दर्शयति-

**देहेन्द्रियमनोबुद्धिप्राणादिभ्यो विलक्षणः।**
**ज्ञानस्वरूपा ज्ञातारो ह्यहमर्थाश्च ते मताः॥**

**ब्रह्मात्मकाश्च तद्व्याप्यस्तदाधेयाश्च सर्वदा।**
**तदधीनाः स्वभावेन स्थितौ शास्त्रप्रमाणतः॥**[17]

जीवात्मा नोत्पद्यते कुतः? स्वरूपस्तदुत्पत्तिवचनाभावात्। न जायते म्रियते वा विपश्चित् नित्यो नित्यानामजो ह्येको जुषमाणोऽनुशेते इत्यादिश्रुतिभ्यो जीवस्य नित्यत्वावगमाच्च।[18]

**नात्मा जजान न मरिष्यति नैधतेऽसौ न क्षीयते सवनविद् व्यभिचारिणां हि।**
**सर्वत्र शश्वदनपाय्युलब्धिमात्रं प्राणी यथेन्द्रियबलेन विकल्पितं सत्॥**
**अण्डेषु पेशिषु तरुष्वविनिश्चितेषु प्राणी हि जीवमुपधावति तत्र तत्र।**
**सन्ने यदिन्द्रियगणेऽहमि च प्रसुप्ते कूटस्थ आशयमृते तदनुस्मृतिर्नः॥**[19]

जायते, अस्ति, वर्द्धते, विपरिणमते, अपक्षीयते नश्यति च भावविकाराः षट् पठितास्ते जीवस्य न सन्तीति। असौ आत्मा जीवात्मा न जातः, किन्तु देह एव जातः। देह एव मरिष्यति, देह एव वर्द्धते, देह एव क्षीयते न तु जीवस्य। सर्वेषु देहेषु सर्वदा अविनाशि ज्ञानमात्रम् उपलभ्यते। सर्वेषु देहेषु सदा उपलब्धिमात्रं जीवाख्यं ज्ञानं स्वरूपतो धर्मतश्च सदेव, न तु क्षणिकत्वम्। अयमात्मा ज्ञ एव ज्ञानस्वरूपे सति ज्ञातृस्वरूप एव। न पाषाणकल्पः। नापि ज्ञानमात्रम्। प्रत्यगात्मा यदि ज्ञानाश्रयो न स्यात् तर्हि तदुपदेशशास्त्रस्य सार्थक्यमपि न स्यात्। मणिद्युमण्यादिष्वाधाराधेयभेदस्य प्रत्यक्षोपलभ्यमानत्वात् प्रकृष्टप्रभावान् सूर्य इत्यादि प्रतीतेश्च। अहमर्थस्यैव प्रतिपादनादहमर्थस्वरूप एव भगवान् पुरुषोत्तमः श्रीकृष्णः तथैव तस्मादभिन्नचित्स्वरूपो जीवश्चेत्यवगम्यते। तथा च प्रत्यक्षागममानतः, प्रत्यक्षागमाभ्यामनुमानेन मुक्तानामनुभूत्या चाहमर्थस्यैव सर्वास्वप्यवस्थासु जाग्रत्स्वप्नसुषुप्तिमूर्च्छाजन्मरणादिषु नरकस्वर्गापवर्गेषु चानुगतिरनुवृत्तिस्तयाऽत्मस्वरूपत्वनिश्चयादिति।

परमात्मनो जीवोंऽशः, 'ज्ञाज्ञौ द्वावजीवीशानीशावि' त्यादि भेदव्यपदेशात् 'तत्त्वमसी' त्याद्यभेदव्यपदेशाच्च। 'ममैवांशो जीवलोके जीवभूतः सनातनः' इति जीवस्य ब्रह्मांशत्वं स्मर्यते। जीवस्य परमपुरुषांशत्वे अंशी सुखदुःखं नानुभवति, यथा प्रकाशादिः स्वांशगतगुणदोषवर्जितो भवति।[20]

**सृष्टं स्वशक्त्येदमनुप्रविष्टश्चतुर्विधं पुरमात्मांशकेन।**
**अघो विदुस्तं पुरुषं सन्तमन्तर्भुक्तेहृषीकैर्मधुसारघं यः॥**[21]

अनेन श्लोकेनापि श्रीमद्भागवतकारेण प्रकृतिः जीवः सच्चिदानन्दः परमात्मेति त्रिरूपत्वं प्रतिपादितम्। तथैवाचार्योक्तिः–**'त्रिरूपतापि श्रुतिसूत्रसाधिता'**[22] इत्यादि

श्रुतिस्मृति-सिद्धान्तभूतद्वैताद्वैताख्यब्रह्मजीवसम्बन्धज्ञानिनो भक्ता भगवतोऽतिप्रियास्ते चांशांशिभावेन भगवन्तं भजन्तो जना भक्तवत्सलेन भगवता अनुग्राह्या इति। स्वाभाविकभेदाभेदलक्षण-सिद्धान्ते देहेन्द्रियमनोबुद्धिप्राणादिजडवर्गभिन्नो ज्ञानस्वरूपो ज्ञातृत्वादिधर्माश्रयोऽणुपरिमाणको जीवः प्रतिशरीरं भिन्नो बन्धमोक्षार्हः। हरेरधीनः स्वरूपतोऽजन्मा अतो नित्यः। पुरुषोत्तमो भगवान् श्रीकृष्णोंऽशी सर्वे जीवाः तस्यांशभूताः सन्ति।

केचित्तु जीवः स्वरूपेण ब्रह्मैव, जीवत्वमस्याविद्योपाधिकृतं सूर्यस्य जले प्रतिबिम्बमिव घटावच्छिन्नाकाश इव च। जलघटाद्युपाध्यपाये बिम्बरूपसूर्यमहाकाशतापत्तिमात्रत्ववत् अविद्योपाध्यपाये निरुपाधिब्रह्मस्वरूपतापत्तिमात्रमेवावशिष्यते इत्याहुः। तत्र ''**ममैवांशो जीवलोके जीवभूतः सनातनः।**''[23] न हि प्रतिबिम्बोऽवच्छिन्नो वा सनातनो भवति प्रमाणाभावात्।

उत्क्रान्तिगत्यागतीनाम्, नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारात् इत्याद्यणुत्वप्रतिपादकेषु श्रुतिसूत्रेषूपाध्यणुत्वनिरूपितजीवाणुत्वमिति प्रतिपादितसिद्धान्तभङ्गेन जीवस्य प्रतिबिम्बत्वानुपत्तिः। सावयवत्वेऽणुत्वप्रतिपादकश्रुतिसूत्रविरोधाद् भ्रान्तिपरिकल्पित एव जीवप्रतिबिम्बवादः। तस्माज्जीवः हरेरंशः अणुपरिमाणक एवेति औपनिषदां सिद्धान्तः।

श्रीभगवान्निम्बार्काचार्याः अथातो ब्रह्मजिज्ञासा जन्माद्यस्य यत इति सूत्रद्वयमाश्रित्य ईश्वरस्वरूपं निरूपयन्ति। '**मुमुक्षुणाऽनन्ताचिन्त्यस्वाभाविकस्वरूपगुण-शक्त्यादिभिर्बृहत्तमो यो रमाकान्तः पुरुषोत्तमो ब्रह्मशब्दाभिधेयस्तद्विषयिका जिज्ञासा सततं सम्पादनीया, इत्युपक्रमवाक्यार्थः।**'[24] तल्लक्षणापेक्षायां सिद्धान्तमाह– 'अस्याचिन्त्यविचित्रसंस्थानसम्पन्नस्यासंख्येय-नामरूपादि–विशेषाश्रयस्याचिन्त्यरूपस्य विश्वस्य सृष्टिस्थितिलया यस्मात् सर्वज्ञाद्यनन्तगुणाश्रयाद् ब्रह्मेशकालादि नियन्तुर्भगवतो भवन्ति, तदेव पूर्वोक्तनिर्वचनविषयं ब्रह्मेति लक्षणवाक्यार्थः।'[25]

**स ईश्वरो काल उरुक्रमोऽसावोजः सहः सत्त्वबलेन्द्रियात्मा।**
**स एव विश्वं परमः स्वशक्तिभिः सृजत्यवत्यत्ति गुणत्रयेशः॥**[26]

कालस्य सर्वनियामकत्वेऽपि परमेश्वरनियम्यत्वमेव। ज्ञः कालकालो गुणी सर्वविद्यः। देहशक्तिः इन्द्रियाणि च तेषामात्मा आश्रयः, त्रयाणां गुणानां नियन्ता परमेश्वरो भगवान् श्रीपुरुषोत्तमो पालयति। अचिन्त्यविचित्रसंस्थानसम्पन्नं विश्वं संहरति।

निम्बार्कमते '**यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व तद्ब्रह्म**'[27], '**सत्यं ज्ञानमनन्तं ब्रह्म**'[28] इत्यादिश्रुतेर्जगदभिन्ननिमित्तोपादानत्वे सति सत्यत्वादिमत्त्वं ब्रह्मणः स्वरूपम्। यस्मात्

रमाकान्ताच्छ्रीपुरुषोत्तमात् इमानि महदादि-तृणान्तानि भूतानि भवन्ति, इति सृष्टिरुक्ता, येन जातानि जीवन्ति, इति स्थितिरुक्ता, अभिसंविशन्तितीति लयो दर्शितः, यं सर्वकर्मध्वंसानन्तरं प्राप्नुवन्तीति मोक्षः उक्तः।

**

**सन्दर्भाः–**


1. वेदान्तकामधेन्वाम्, श्लो.1
2. श्रीमद्भागवते, 5.12.15
3. बृहदारण्यकोपनिषदि, 4.3.23
4. श्रीमद्भगवद्गीता, 13.33
5. श्रीमद्भागवते, 4.29.74
6. कठोपनिषदि, 1.3.4
7. ब्रह्मसूत्रनिम्बार्कभाष्ये, 2.3.19
8. ब्रह्मसूत्रनिम्बार्कभाष्ये, 2.3.22
9. वेदान्तरत्नमालायाम्,श्लो.79-81, पृ.36
10. त्रिपुरातपनोपनिषदि, 5.12
11. श्रीमद्भागवते, 1.2.31,32
12. कठोपनिषदि, 2.2.11
13. कठोपनिषदि, 1.2.15
14. श्रीमद्भगवद्गीतायाम्, 8.11
15. श्रीमद्भागवते, 3.9.42
16. श्रीमद्भागवते, 5.5.2
17. वेदान्तकारिकावल्याम्, श्लो.4.6
18. ब्रह्मसूत्रनिम्बार्कभाष्ये, 2.3.17
19. श्रीमद्भागवते, 11.3.38-39
20. ब्रह्मसूत्रनिम्बार्कभाष्ये, 2.3.44
21. श्रीमद्भागवते, 4.24.64
22. वेदान्तकामधेनुः, श्लो.7
23. गीता, 15.7
24. ब्रह्मसूत्रनिम्बार्कभाष्ये, 1.1.1
25. ब्रह्मसूत्रनिम्बार्कभाष्ये, 1.1.2
26. श्रीमद्भागवते, 7.8.9
27. तैत्तिरीयोपनिषदि, 3.1
28. तैत्तिरीयोपनिषदि, 2.1


**

# जगत्सृष्टेरुद्देश्यम् - वैशेषिकनयेन सह दर्शनान्तराणामेका समीक्षा

**शारदा मुखर्जी**

जगतः सृष्टिविषये तु अनादिकालादारभ्य सर्वत्र अहर्निशं चर्चा प्रचलन्ती वर्तते। निखिलस्यास्य संसारस्य सृष्टिः कदा जाता इति निर्णेतुमद्यापि अशक्यम्। तथापि आधुनिकाः वैज्ञानिकास्तु सृष्टेः कालं निर्णेतुं सर्वदा प्रयतन्ते, एवञ्च आनुमानिकरूपेण तैः निर्णीयते यत् अष्टशतकोटिवर्षपूर्वं जगदिदं जातम्। तत्र विज्ञानस्य विविधासु शाखासु जगति दृश्यमान-प्राकृतिकविविधतायाः अन्वेषणं क्रियते गवेषकैः। दर्शनशास्त्रं तु न केवलं दृश्यमानं बहिर्जगदिदमाश्रित्य अनुसन्धानाय प्रवर्तते अपि च अन्तर्जगतः विविधतायाः स्वरूपं ज्ञातुमपि तद् निरन्तरं प्रयतते। तेन सत्यमिदं यत् विज्ञानस्य सीमा यत्र अवरुध्यते ततः एव दर्शनस्य अनुसन्धानं प्रारभ्यते। अतः विज्ञानं दर्शनञ्च परस्परं परिपूरके वर्तेते। तत्र यथा विज्ञानस्य बह्व्यः शाखाः विद्यन्ते तथैव दर्शनस्यापि प्रस्थानभेदाः सन्ति। विज्ञानस्य या शाखा भौतिकीत्याख्यायते, तादृशी शाखा दर्शने तत्त्वमीमांसा इत्युच्यते। विज्ञानदर्शनयोः एतादृशं साम्यं ज्ञापयति यद् विश्वस्य अनेके महान्तः दार्शनिकाः भौतिक-वैज्ञानिकाः अपि सन्ति। भारते अवतीर्णेषु एतेषु दार्शनिकवैज्ञानिकेषु वैशेषिकदर्शनस्य प्रवर्तकः आचार्यः कणादः भवत्यन्यतमोऽग्रगण्यश्च।

भारतीयदार्शनिकैः सृष्टिविषये बहुधा आलोचितम्। वेदेऽपि सृष्टिविषये अनेकानि मतानि प्रचलितानि दृश्यन्ते। किन्तु आदिसृष्टिः कदा जाता तत्तु केनापि निश्चितरूपेण न वक्तुं शक्यते। किञ्च सृष्टेः पश्चात् प्रलयः, प्रलयस्य पश्चात् पुनः सृष्टिरित्येष क्रमः शास्त्रेषु आलोचितः। तस्मादधुना यस्मिन् जगति वयं भवामः तस्य सृष्टेः पूर्वं पूर्वतनसृष्टेः प्रलयोऽभूत्। एवं यदैव सृष्टिः भवति सा सृष्टिः प्रलयानुसारिण्येव भवति। एवञ्च सृष्टिप्रलययोः प्रवाहोऽयं निरन्तरं प्रचलन्नस्ति। अतः, सृष्टिरनादिरित्युच्यते। वैदिकऋषयोऽपि एवमेव अवोचन्। किन्तु तदा प्रश्नो भवति यत् किमर्थमेषा सृष्टिः बोभूयते इति। तत्रादौ वैशेषिक-

दर्शनमाश्रित्य विषयस्यास्य विश्लेषणं कृत्वा दर्शनान्तराणामपि चर्चा करिष्यते।

वैशेषिकदर्शनानुसारं जगतः सृष्टिसंहारौ महेश्वरस्य इच्छया एव भवतः। प्रशस्तपादाचार्येणोक्तम्–''**सर्वप्राणिनां निशि विश्रामार्थं सकलभुवनपतेर्महेश्वरस्य सञ्जिहीर्षासमकालं शरीरेन्द्रियमहाभूतोपनिबन्धकानां सर्वात्मगतानामदृष्टानां वृत्तिनिरोधे सति महेश्वरेच्छात्माणुसंयोगजकर्मभ्यः शरीरेन्द्रियकारणाणुविभागेभ्यस्तत्संयोगनिवृत्तौ तेषामापरमाण्वन्तो विनाशः**''[1] इत्यादि।

पुनः तत्रैवोक्तम्– ''**महेश्वरसिसृक्षानन्तरं सर्वात्मगतवृत्तिलब्धादृष्टापेक्षेभ्यस्तत्संयोगेभ्यः पवनपरमाणुषु कर्मोत्पत्तौ...**''[2] इत्यादि। अर्थात् दृश्यते यत् जगतोऽस्य संहारः महेश्वरस्य इच्छया एव भवति, सृष्टिरपि तथा। किन्तु किं यदा कदा उद्देश्यं विनैव महेश्वरस्य सिसृक्षासञ्जिहीर्षयोः सत्योः जगतः सृष्टिसंहारौ भवतः वा। नास्तीति। वस्तुतस्तु जीवानां कर्मफलभोगार्थमेव सृष्टिः भवति। प्रशस्तपादाचार्येणोच्यते–

''**ततः पुनः प्राणिनां भोगभूतये महेश्वरसिसृक्षा...**''[3] इत्यादि।

अर्थात् प्राणिसमूहस्य भोगभूतिसम्पादनार्थमियं सृष्टिः साध्यते। अस्मिन्नवसरे स्वभावतः एव प्रश्नः जायते यत् प्राणाः अस्य सन्ति इति व्युत्पत्त्यनुसारेण आत्मनि प्राणवायुसम्बन्धानन्तरमेव प्राणी इत्युच्यते। तर्हि सृष्टेः प्राक् आत्मना सह प्राणवायोः सम्बन्धात् पूर्वमेव 'प्राणिनाम्' इति प्रयोगः समीचीनो वेति? प्रश्नस्यास्य समाधानं न्यायकन्दल्याम् इत्थं प्राप्यते यत् यद्यपि सृष्टेः प्राक् आत्मसु प्राणवायोः सम्बन्धाभावः वर्तते तथापि तेषु आत्मसु प्राणवायोः सम्बन्धयोग्यतायाः सत्त्वात् प्राणिनाम् इति प्रयोगः साधु वर्तते। यथा श्रीधराचार्येणोक्तम्–''**यद्यपि तदा आत्मनां प्राणसम्बन्धो नास्ति, तथापि प्राणिन इत्युक्तं योग्यत्वात्**''[4] इति।

तेषां प्राणवायुसम्बन्धयोग्यवताम् आत्मनां भोगसम्पादनार्थं सृष्टिः विहिता महेश्वरेण। इदानीं प्रश्नो भवति, कोऽयं भोगः इति। तर्कसंग्रहदीपिकायामुच्यते–''**सुखदुःखसाक्षात्कारो भोगः**''[5] इति। अर्थात् सुखदुःखादीनामुपभोग एव भोगः इति। प्राणिनः यथा यथा कर्माणि कुर्वन्ति तथारूपेण तेषाम् अदृष्टा अपि उत्पद्यन्ते। तेनैव अदृष्टानुसारेण तेषां भोगः निर्धार्यते। किन्तु जीवास्तु अनन्ताः वर्तन्ते। तस्मात् तत्कृते अदृष्टा अपि अनन्ताः सन्ति। एते सर्वेऽपि अदृष्टाः भोगान् जनयन्ति। अतः प्रलयकालेऽपि यदा कश्चन जनः अदृष्टनाशवशाद् भोगाद् विरमति, कश्चन जनो वा तदा भोगं भुञ्जानोऽस्ति, कस्यचिद्वा भोगः भविष्यत्कालस्य कृते उत्पद्यते। तथा सति सर्वेषां भोगः एकस्मिन्नेव काले न समाप्तो भवतीत्यत उक्तं यत् प्राणिकृतकर्मणां संस्कारवशात् स्वस्वादृष्टेषु ये सञ्चितभोगाः

विद्यन्ते, इदानीं ते भोगाः कर्तव्या इति धिया महेश्वरस्य सृष्टेः इच्छा भवति। अतः प्राणिनां कर्मफलभोगाय एव सृष्टिरियं भवति पुनः पुनः। जीवानां कर्मणामनादित्वात् तत्कर्मफलभोगाय सृष्टिरपि अनादिः पुनः पुनः आवर्तते।

अत्र केनचित् आशङ्क्यते, महेश्वरेण स्वस्य कृते सृष्टिस्तु न कृता, तर्हि तेन कृता सृष्टिः सुखमयी एव भवेत्, दुःखमिश्रिता न भवेत् तस्य करुणावशात् इति। अस्याः शङ्कायाः समाधानार्थमुच्यते यत् प्राणिनां कर्मविपाकं ज्ञात्वा तदनुरूपं सृष्टिकार्यं क्रियते। अर्थात् अन्यस्य कृते प्रवृत्तत्वादपि महेश्वरः केवलं सुखमयीं सृष्टिं कर्तुं न क्षमः। यतो हि सुखदुःखयोः जनकविचित्रकर्माशयसहायेन एव महेश्वरे सृष्टिकर्तृत्वमस्ति। अनन्तरं ब्रह्मा ज्ञानभोगायुर्युक्तान् दक्षप्रजापतिप्रभृतीन् पुत्रान् उत्पादयति। पुनश्च मनुदेवतर्षिपितॄन् उत्पादयति। तदनु मुखात् ब्राह्मणान्, बाहुभ्यां क्षत्रियान्, उरुभ्यां वैश्यान्, चरणाभ्याञ्च शूद्रान् तथा च अन्यक्षुद्रप्राणिनः उत्पादयति। ते प्राणिनः आशयानुरूपैः अर्थात् फलोत्पत्तिपर्यन्तं तिष्ठन्ति। पदस्यास्य व्युत्पत्तिर्यथा न्यायकन्दल्याम्–''**आशेते फलोपभोगकालं यावदात्मन्यवतिष्ठत इत्याशयः**''[6] इति। कर्मणा तथा अदृष्टानुसारेणैव जीवानां धर्मज्ञान-वैराग्यैश्वर्याः निर्धार्यन्ते। विषयेऽस्मिन् श्रीधराचार्येणोक्तम्– ''**यस्य यथाविधं कर्म्म तत्तदनुरूपेण ज्ञानादिना सम्यग् योजयति, मात्रयाऽप्यन्यथा न करोतीत्यर्थः**''[7] इति।

वैशेषिकाणामिव अन्यदर्शनेषु वेदोपनिषत्सु अपि जगतः सृष्टिविषये आलोचना दरीदृश्यते। सांख्यदर्शनानुसारं प्रतिपुरुषविमोक्षार्थमेव सृष्टिः क्रियते। यथा सांख्यकारिकायाम् ईश्वरकृष्णेनोक्तम्–

**इत्येष प्रकृतिकृतो महदादिविशेषभूतपर्यन्तः।**
**प्रतिपुरुषविमोक्षार्थं स्वार्थ इव परार्थ आरम्भः॥**[8]

अर्थात् महदहंकारौ, ज्ञानेन्द्रियपञ्चकं, कर्मेन्द्रियपञ्चकं, मनः, शब्दादिविषयः तथा च विशेषभूतात्मिका या सृष्टिः प्रकृतिना कृता सा सृष्टिः न स्वस्याः कृते अपि तु प्रतिपुरुषविमोक्षार्थम्। अस्मिन् विषये वाचस्पतिमिश्रेण परिष्क्रियते, ''**यथौदनकाम ओदनाय पाके प्रवृत्तः ओदनसिद्धौ निवर्तते, एवं प्रत्येकम्पुरुषान् मोचयितुम्प्रवृत्ता प्रकृतिर्थं पुरुषम्मोचयति तम्प्रति पुनर्न प्रवर्तते।**''[9] अर्थात् अत्रापि दृश्यते यत् पुरुषस्य भोगापवर्गसम्पादनार्थमेव सृष्टिः विधीयते।

वेदान्तदर्शनेऽपि तादृशं मतसादृश्यं दृश्यते। तद्यथा वेदान्तपरिभाषायाम् उक्तम्, ''**सर्गाद्यकाले परमेश्वरः सृज्यमानप्रपञ्चवैचित्र्यहेतुप्राणिकर्मसहकृतोऽ-**

**परिमितानिरूपितशक्तिविशिष्टमायासहितः सन्नामरूपात्मकं निखिलप्रपञ्चं प्रथमं बुद्धावाकलय्य 'इदं करिष्यामि' इति सङ्कल्पयति...''**[10] एवमत्र शक्तिविशेष-विशिष्टमायासहितपरमेश्वरः जगतः सृष्टौ कारणमिति स्वीक्रियते। एवञ्च प्राणिनां कर्मवैचित्र्यमपि सृष्टेः सहकारिकारणत्वेन गण्यते।

अतः दृश्यते यः कोऽपि वा दर्शनसम्प्रदायः भवतु, प्रायः सर्वे कर्मफलभोगाय इयं सृष्टिरिति अङ्गीकुर्वन्ति। तत्र सृष्टिकर्तुः महेश्वरस्य प्रकृतेः परमेश्वरस्य वा कोऽपि स्वार्थो न भवति। वैशेषिकाणामनुसारेण तत्र महेश्वरस्य सिसृक्षा प्राणिनां भोगभूतये एव भवति। कपिलानामनुसारमपि प्रकृतिः पुरुषाणां भोगापवर्गसम्पादनार्थमेव सृष्टिं करोति, न तु स्वस्याः कृते। वेदान्तिनोऽपि प्राणिनां कर्मफलमेव सृष्टेः सहकारित्वेन स्वीकुर्वन्ति।

एवं दृश्यते यत् जीवस्य मुक्तिहेतोः सृष्टिरियं कल्पिता। किन्तु सा मुक्तिस्तु भोगद्वारेणैव सम्भवति। वस्तुतस्तु धर्मार्थकाममोक्षरूपेति जीवानां पुरुषार्थचतुष्टयम्। तत्र इतरेषामनित्यत्वेन मोक्ष एव परमपुरुषार्थः, तस्य नित्यत्वात्। स च मोक्षः **''तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यते अयनाय'', ''ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्''** इत्यादि श्रुतिस्मृतिप्रामाण्याद् ब्रह्मतत्त्वज्ञानाद् भवति। किन्तु ब्रह्मज्ञाने उदिते सत्यपि तावत् सम्पूर्णमुक्तिः न प्राप्यते, यावत् लेशमात्रमपि भोगोऽवशिष्यते। ब्रह्मज्ञानस्योदये नित्यानित्यवस्तुविवेकात् कर्माणि प्रति अकर्तृभावः अभोक्तृभावश्च आगच्छतः। तेन नूतनतया कर्मबन्धनमपि न जायते। तथा च तेन सह यदा सर्वेषां सञ्चितकर्मणामपि भोगाः समाप्यन्ते, तदा सर्वकर्मबन्धनाशे अपवर्गः प्राप्यते। अतः अपवर्गार्थमादौ भोगः कर्तव्य इति स्वीक्रियते भारतीयदर्शने। भोगं विना अपवर्गो न सम्भवति। तस्माद् जीवानां कर्मफलभोगाय पुनः पुनः इयं सृष्टिः अपि कल्पिता। अतः तस्याः व्यवहारिकनित्यता प्रवाहनित्यता वा स्वीकृता। तथा च तेन कर्मफलभोगद्वारेणैव मुमुक्षवः प्राणिनः मोक्षमपवर्गं वा प्राप्नुवन्ति। अस्माद्धेतोः सृष्ट्युद्देश्यत्वेन 'पुरुषाणां भोगापवर्गार्थम्' 'प्रतिपुरुषविमोक्षार्थम्' इत्यादिकमुक्तं शास्त्रेषु। अतः ईश्वरकृष्णेनोक्तम्–

**रङ्गस्य दर्शयित्वा निवर्तते नर्तकी यथा नृत्यात्।**
**पुरुषस्य तथाऽत्मानं प्रकाश्य विनिवर्तते प्रकृतिः॥**[11]

अर्थात् सृष्टिद्वारेण जीवानां भोगान् सम्पाद्य क्षीणे कर्मबन्धने शुद्धान्तःकरणे विवेकज्ञानस्य चोदये प्रकृतिः तत्समीपे स्वस्वरूपं प्रकाश्य विनिवर्तते, तं पुनः न बध्नाति इति भावः। तदा सकलबन्धननाशेः सः पुरुषः मोक्षं लभते।

एवं मुख्यरूपेण कणादप्रवर्तितवैशेषिकशास्त्रमाश्रित्य तेन सह दर्शनान्तराणि च

समीक्ष्य जगत्सृष्टेः प्रयोजनविषये भारतीयदर्शनस्य विचारः प्रतिपादितः। अनेन शोधलेखेन शास्त्रदृष्ट्या जगत्सृष्टेरुद्देश्यं किमित्यस्मिन् विषये एका सुस्पष्टा धारणा अवश्यं जायेत इति आशासे।

**

**सन्दर्भाः–**


1. प्रशस्तपादभाष्यम्, (सं. दुर्गाधर झा), पृ.122
2. तदेव, पृ.127
3. तदेव, पृ.127
4. न्यायकन्दली, (सं. दुर्गाधर झा), पृ.127
5. तर्कसंग्रहदीपिका, पृ.21
6. न्यायकन्दली, पृ.131
7. तदेव, पृ.131
8. सांख्यकारिका, कारिकासंख्या 56
9. सांख्यतत्त्वकौमुदी, कारिकासंख्या 56
10. वेदान्तपरिभाषा, (सं. दुर्गाधर झा), पृ.96
11. सांख्यकारिका, कारिकासंख्या 59


**

## किञ्चिद् रामायणीयम्

*** दशरथस्य दृष्ट्या रामः—**

- वीर्ये पुरन्दरसमः परपुरंजयः
- पुष्येण युक्तः चन्द्रः इव
- धर्मभृतां वरः
- पुरुषपुङ्गवः
- प्रजानाम् अनुरूपः नाथः
- लक्ष्मीवान्

**-अयोध्या. 2/11-13**

*** पौरजानपदैः सह समेषां ब्राह्मणानां बलमुख्यानां दृष्ट्या श्रीरामः—**

- दिव्यैः गुणैः शक्रसमः
- सत्यः
- सत्यपराक्रमः
- सत्पुरुषः
- सत्यपरायणः
- प्रजासुखत्वे चन्द्रः इव
- क्षमागुणैः वसुधा इव
- बुद्ध्या बृहस्पतिः इव
- वीर्ये शचीपतिः इव
- धर्मज्ञः
- सत्यसन्धः
- शीलवान्
- अनसूयकः
- क्षान्तः
- सान्त्वयिता
- श्लक्ष्णः
- कृतज्ञः
- विजितेन्द्रियः
- मृदुः
- स्थिरचित्तः
- सदा भव्यः
- भूतानां प्रियवादी
- सत्यवादी
- बहुश्रुतानां वृद्धानां ब्राह्मणानाम् उपासिता
- देवासुरमनुष्याणां सर्वास्त्रेषु विशारदः
- सम्यग् विद्याव्रतस्नातः
- यथावत् साङ्गवेदवित्
- गान्धर्वे भुवि श्रेष्ठः
- कल्याणाभिजनः
- साधुः
- अदीनात्मा
- महामतिः
- यदा ग्रामार्थे नगरस्य वा कृते संग्रामं व्रजति, अविजित्य न निवर्तते
- संग्रामात् कुञ्जरेण रथेन वा आगत्य पौरान् स्वजनवत् नित्यं तेषां पुत्रेषु अग्निषु दारेषु प्रेष्यशिष्यगणेषु च कुशलं परिपृच्छति।

**-अयोध्या. 2/19-38**

# शब्दतत्त्वविमर्शः

**जयदेवदिण्डा**

**प्रबन्धसारः**

'शब्दतत्त्वविमर्शः' इत्यभिधेये प्रबन्धेऽस्मिन् शब्दस्वरूपं प्रतिपाद्यते। न्यायदर्शने चतुर्षु प्रमाणेषु अन्तिमप्रमाणत्वेन महर्षिगौतमेन शब्दः प्रतिपादितः। कस्तावच्छब्दः इत्यत्र तेनैव प्रतिपादितम् 'आप्तोपदेशः शब्दः' इति। नैयायिकाः शब्दस्य अनित्यत्वं प्रतिपादितवन्तः। 'वर्णाः एव तु शब्दाः इति भगवानुपवर्षः' इति शङ्करवचनात् वर्णानामेव शब्दत्वं मीमांसकैः स्वीकृतम् इति स्पष्टमेव उपपद्यते। गौः इत्यत्र उच्चारणे गकारौकारविसर्जनीयानाम् उच्चारणमेव शब्दत्वेन अभिधीयते। एतेषां मते शब्दाराशिभूतस्य वेदस्य नित्यत्वाद् अपौरुषेयत्वाच्च शब्दोऽपि नित्यः। शब्दस्य नित्यत्वमङ्गीकुर्वन्तोऽपि मीमांसकाः शब्दस्य स्फोटस्वरूपं नाङ्गीकुर्वन्तः वर्णात्मकशब्दस्यैव नित्यत्वम् अङ्गीकुर्वन्ति। शाब्दिकास्तु शब्दनित्यत्ववादिनः। भाष्यकारमते शब्दः द्विविधः स्फोटरूपः ध्वनिरूपश्चेति। तत्र स्फोट-स्यैव मुख्यत्वात्, ध्वनेश्च तदभिव्यञ्जकत्वेन गौणत्वात् महाभाष्यकृता प्रथमतः स्फोटरूपस्वरूपं प्रतिपाद्यते, ''येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति स शब्दः'' इति। ततः शब्दस्य ध्वनिरूपं प्रतिपाद्यते, ''अथवा प्रतीतपदार्थको लोके ध्वनिः शब्द इत्युच्यते'' इति। वैयाकरणैः नादेन ध्वनिना वा अभिव्यङ्ग्यः स्फोटः नित्यः इति स्वीकृतम्। तस्मात् स्फोटः शब्दस्वरूपः, ध्वनिः स्फोटाभिव्यञ्जकः। वैयाकरणैः स्फोटस्य वर्णस्फोटः, पदस्फोटः, वाक्यस्फोटः, वर्णजातिस्फोटः, पदजाति-स्फोटः, वाक्यजातिस्फोटः, अखण्डपदस्फोटः, अखण्डवाक्यस्फोटश्चेति अष्टविधत्व-मङ्गीकृतम्। अष्टविधेषु स्फोटेषु अखण्डवाक्यस्फोटः, अखण्डवाक्यजातिस्फोटो वा नित्यः। स्फोटरूपशब्दस्य नित्यत्वे 'तदशिष्यं संज्ञाप्रमाणत्वात्' इति सूत्रं, 'सिद्धे शब्दार्थसम्बन्धे', 'सिद्धन्तु नित्यशब्दत्वात्' इत्यादिवार्तिकानि, 'संग्रह एतत्प्राध्यानेन परीक्षितं नित्यः शब्दः', 'नित्येषु शब्देषु कूटस्थैरविचालिभिर्वर्णैः भवितव्यमनपायोजनविकारादिभिः' इत्यादि-महाभाष्यवचनानि प्रमाणम्। नित्यत्वादेव शब्दतत्त्वं सर्वपरिकल्पातीततत्त्वं भेदसंसर्गसमतिक्रमेण

समाविष्टं सर्वाभिः शक्तिभिः विद्याविद्याप्रविभागरूपम् अप्रविभागं कालभेददर्शनाभ्यासेन मूर्तिविभागभावनया च व्यवहारानुपपत्तिभिर्धर्माधर्मैः सर्वास्ववस्थासु अनाश्रितादिनिधनं ब्रह्मेति प्रतिज्ञायते।

**कुञ्चिशब्दाः**

शब्दः। नित्यः। अनित्यः। न्यायः। मीमांसा। व्याकरणम्।

**उपोद्घातः**

सर्वोऽपि व्यवहारः शब्दनिबन्धन एव। लोके निखिलोऽपि व्यवहारः शब्देनानुविद्ध इव प्रतीयते। नास्ति सोऽर्थः यः कदाचित् क्वचित् कथञ्चिदपि वा शब्देन वियुज्यते। तदुक्तं भर्तृहरिणा–

**न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।**

**अनुविद्धमिव ज्ञानं सर्वं शब्देन भाषते॥** इति। (वाक्यपदीयम्, 1.123)

अनादिरेष शब्दव्यवहारः। सर्वोऽपि लोकः शब्दव्यवहारेणैव अर्थमुपादयति। अतः शब्दव्यवहाराभावे सर्वोऽपि आर्थव्यवहारो निरस्यते। आर्थव्यवहारस्य निराशे कृत्स्नमिदं जगत् गाढे तमसि लीयते। तदुक्तं दण्डिना–

**इदमन्धतमः कृत्स्नं जायेत भुवनत्रयम्।**

**यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते॥** इति। (काव्यादर्शः, 1.4)

अत एव शब्दस्य तत्त्वविषये व्याकरणदर्शनं स्वकीयविचारं प्रस्तौति। साधुशब्दज्ञान-जनकं शास्त्रमेव व्याकरणम्। भाष्यकृता 'अथ शब्दानुशासनम्' इत्युक्त्वा व्याकरणस्य शब्दानुशासनत्वं प्रतिपादितम्। 'ओमित्येकाक्षरं ब्रह्म', 'रामेति द्व्यक्षरं नाम मानभङ्गः पिनाकिनः', 'रामो द्विर्नाविभाषते' इत्यादिव्यवहारदर्शनात् शब्दार्थयोस्तादात्म्यं स्पष्टं प्रतिभाति। किं च पुरोवर्तिनो गोर्दर्शनेन अविभक्तरूपेण जात्यादीनां ज्ञानेनेयं जिज्ञासोदेति, अयं गौरिति ज्ञाने शब्दः कः पदार्थः? शब्दरूपेण किं ज्ञेयमिति प्रश्नाशयः। प्रबन्धेऽस्मिन् नैयायिक-मीमांसकमतप्रतिपादनपूर्वकं वैयाकरणमते शब्दतत्त्वं यथामति अल्पीयसा वचसा विमृश्यते।

**1. शब्दस्वरूपम्**

परिवर्तनशीले जगत्यस्मिन् नानाविधेषु रूपवर्णाकारव्यामिश्रितेषु इन्द्रियाधिष्ठानशरीर-धारिषु भूतेषु सकलव्यवहारशिरःशेखरीभूतशब्दस्यैव सत्यपि महत्त्वे सर्वेषां हृदि जागर्त्ये-वायं कस्तावात् शब्दः? किं तस्य स्वरूपम्? सः वर्णरूपः तदतिरिक्तो वा? नित्यः अनित्यः वा? एकः अनेको वा? सन्ति च विषयेऽस्मिन् नैयायिक–मीमांसक–वेदान्ति–

सांख्य–योगानुयायि–वैयाकरणानां महत्यः विप्रतिपत्तयः। तत्र केषाञ्चिन्मते वर्णा एव वाचकाः। अन्येषां केषाञ्चिन्नये वर्णानां नित्यत्वमेकत्वं विभूत्वं द्रव्यत्वादिकत्वञ्च, तर्हि अन्येषां मते अनेकत्वं गुणत्वादिकत्वम्। ध्वनिशब्दस्वरूपपक्षेऽपि केषाञ्चिन्मते शब्दः अणुपरिमाणः, अपरेषां मते वायुरेव वक्त्रिच्छावर्तिना प्रयत्नेन लब्धक्रियस्सन् कण्ठताल्वाद्यभिघातादिना तत्तद्वर्णादिशब्दरूपेण परिणमते। अर्थाद्वायुपरिणाम एव शब्दः। केषाञ्चिन्मते ज्ञानपरिणामः शब्दः। सूक्ष्मवागात्मना स्थितम् आन्तरज्ञानं स्वात्मानं प्रकाशयितुं शब्दत्वेन बहिः परिणतं विवृतं वा भवति। एवं शब्दस्वरूपादिविषये तत्र तत्र तत्तच्छास्त्रानुयायिनां नानाविधानि मतान्युपलभ्यन्ते।

### 1.1. नैयायिकनये शब्दस्वरूपम्

न्यायदर्शने चतुर्षु अन्तिमप्रमाणत्वेन '**प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि**' (न्यायसूत्रम्, 1.1.3) इत्यादिना महर्षिगौतमेन प्रतिपादितम्। कस्तावच्छन्दः इति जिज्ञासायां तेनैव प्रतिपादितम् '**आप्तोपदेशः शब्दः**' (न्यायसूत्रम् 1.1.7) इति। ''**आप्तत्वञ्च प्रयोगहेतुभूतयथार्थज्ञानवत्त्वम्**''[1] इति न्यायबोधिनीकारः। चतुर्विंशतिगुणेषु शब्दस्य अन्तर्भावः नैयायिकैः प्रदर्शितः। ''**श्रोत्रग्राह्यो गुणः शब्दः आकाशमात्रवृत्तिः**''[2] इति तर्कसंग्रहे अन्नम्भट्टः। स च द्विविधः, ध्वन्यात्मकः वर्णात्मकश्च। तत्र अभिघातादिजन्योऽस्फुटशब्द एव ध्वन्यात्मकशब्दः भेर्यादौ। कण्ठसंयोगादिजन्यः क–खादिरूपः स्फुटशब्दः एव वर्णात्मकः संस्कृतभाषादिरूपः। तर्कसंग्रहकृता अन्नम्भट्टेन दीपिकायां शब्दस्य भेदत्रयमुपन्यस्तम्, ''**शब्दस्त्रिविधः–संयोगजः, विभागजः, शब्दजश्चेति। तत्र आद्यो भेरीदण्डसंयोगजन्यः। द्वितीयो वंशे पाट्यमाने दलद्वयविभागजन्यश्चटचटाशब्दः। भेर्यादिदेशमारभ्य श्रोत्रपर्यन्त-द्वितीयादि-शब्दाः शब्दजाः**''[3] इत्यादिना। न्यायबोधिनीकृता गोवर्धनाचार्येणापि शब्दस्य त्रिविधः भेदः स्वीकृतः, ''**स त्रिविधः–संयोगजः, विभागजः, शब्दजश्चेति। यथा, भेरीदण्डसंयोगजो झंकारादिशब्दः, हस्ताभिघातसंयोगजन्यो मृदङ्गादिशब्दः, वंशे पाट्यमाने दलद्वयविभागजश्चटचटाशब्दः। शब्दोत्पत्तिदेशमारभ्य श्रोत्रदेशपर्यन्तं वीचीतरङ्गन्यायेन कदम्बमुकुलन्यायेन वा निमित्तपवनेन शब्दधारा जायन्ते, तत्र उत्तरोत्तरशब्दे पूर्वपूर्वशब्दः कारणम्**''[4] इति। विश्वनाथपञ्चाननेन मुक्तावल्यां ध्वनिवर्णभेदेन शब्दः द्विधा प्रतिपादितः–

**शाब्दो ध्वनिश्च वर्णश्च मृदङ्गादिभवो ध्वनिः।**
**कण्ठसंयोगादिजन्या वर्णास्ते कादयो मताः॥**[5] इति।

आकाशे समवायेनोत्पन्नस्य शब्दस्य धारावाहिकोत्पत्त्या कर्णात्मकाकाशे समुत्पन्नस्य प्रत्यक्षं भवति। सजातीयशब्दोत्पत्तिस्तु द्विधा वीचितरङ्गवत् कदम्बपुष्पमञ्जरीवच्च निमित्तपवनेन। वीचिर्यथा सर्वदिगवच्छेदेन एकदा तरङ्गान् जनयति परन्तु यद्देशदिगभिमुखो वायुस्तद्देशदिगवच्छेदेनाधिकतरङ्गान् जनयति तथा च भेरीमृदङ्गाद्यवच्छेदेन जायमानशब्दः भेर्यादिभिन्नसर्वदेशावच्छेदेन सर्वदिगवच्छेदेन चैकदैव शब्दान् जनयति। यद्वा कदम्बपुष्पमेकनालकाधिकरणविशेषे यथा स्वसमीपदेशेषु सजातीयपुष्पाणि जनयति तादृशपुष्पाणि तस्मिन्नेवाधिकरणे तत्समीपदेशेषु चान्यानि सजातीयपुष्पाणि जनयन्ति तथा भेर्यवच्छेदेन जायमानशब्दः भेरीसमीपदेशावच्छेदेन शब्दान् जनयति, ते च तत्समीपदेशावच्छेदेन सर्वदिगवच्छेदेन च बहून् शब्दान् जनयन्ति। उक्तं च मुक्तावल्यां–

**सर्वः शब्दो नभोवृत्तिः श्रोत्रोत्पन्नस्तु गृह्यते।**

**वीचितरङ्गन्यायेन तदुत्पत्तिस्तु कीर्तिता।**

**कदम्बगोलकन्यायादुत्पत्तिः कस्यचिन्मते।।**[6] इति।

किरणावल्यां कृष्णवल्लभाचार्येण ''**श्रोत्रेन्द्रियजन्यप्रत्यक्षविषयत्वे सति गुणत्वं शब्दस्य लक्षणम्**''[7] इति शब्दस्वरूपं प्रतिपादितम्। तथा चैतादृशवर्णानां समूह एव पदं भवति, पदानां समूहश्च वाक्यम्। न्यायभाष्ये, ''**वर्णसमूहः पदम्, पदसमूहो वाक्यम्**'' इति। अतः वर्णा एव समुदिताः पदभावापन्नाः सन्तो वाचकाः भवन्ति। अर्थाद्वर्णव्यतिरिक्तस्य पदस्य पदातिरिक्तस्य वाक्यस्य वा काचित् पृथक्सत्ता नैव स्वीक्रियते, अपि तु वर्णसमुदायस्यैव वाचकत्वं पदत्वम्, पदसमुदायस्यैव वाक्यत्वं स्वीक्रियते।

अत्रैका शङ्कोदेति कमलाकान्तकायकायिककान्तिकमनीयतादिपदेषु श्रूयमाणः ककारादिवर्णः एकः अनेको वा। नैयायिकानां मतेऽत्र ककारास्तु नैके। वर्णानेकत्ववादिनः नैयायिकाः। ककारादिवर्णानामेकत्वे युगपदनेकेषु तेषाम् अनुपलब्ध्यापत्तिः। भवति च नैकेषु स्थलेषु कमलाकान्तादिषु भिन्नभिन्नस्थलेषु ककारादिवर्णानामुपलब्धिः। तेषामेकत्वे तु भिन्नपुरुषैः सकृत् ककारोच्चारणाभावापत्तिः। अतो वर्णानां बहुत्वं मन्तव्यम्।

नैयायिकनये आकाशस्य विशेषगुणत्वात् श्रोत्रेन्द्रियग्राह्यकत्वाद् उत्पत्तिमत्त्वाच्च शब्दोऽनित्यः। यतो हि ककार उत्पन्नः ककारो विनष्ट इत्येवं प्रतीतिर्भवति। यदि शब्दो नित्यः स्यात्तदा ककार उत्पन्नः ककारो विनष्ट इत्यादिरूपा उत्पत्तिविनाशावगाहिनी प्रतीतिर्नैव स्यात्। किन्तु प्रतीतिस्तु भवत्येव। अतः शब्दस्य अनित्यत्वमेव मन्तव्यमिति नैयायिकानां निष्कर्षः।

ननु 'सोऽयं ककारो यः पूर्वं श्रुतः' इत्यादिप्रत्यभिज्ञया पूर्वश्रुतस्य इदानीं श्रुतस्य च

ककारस्याभेदत्वात् ककारादिवर्णस्य नित्यत्वं नितरां सिद्ध्यतीति चेन्न। कारणं हि प्रत्यभिज्ञया शब्दानां नित्यत्वं नैव साध्यते। यतो हि प्रत्यभिज्ञा स्वसजातीयत्वविषया भवति। यतो व्यक्त्यभेदः प्रत्यभिज्ञाया विषयो नास्ति अपि तु स्वजातीयत्वं प्रत्यभिज्ञाया विषयः। अतः प्रत्यभिज्ञया वर्णानां नित्यत्वं नैव स्वीकर्तुं शक्यते। महर्षिगौतमेन **'आदिमत्त्वादैन्द्रियकत्वात् कृतकवदुपचाराच्च'** (न्यायसूत्रम्, 2.2.13) इत्यादिसूत्रेण शब्दस्य अनित्यत्वं प्रत्यपादि। तदेव प्रत्यपादि किरणावल्यां कृष्णवल्लभाचार्येण, **''शब्दानामुत्पादविनाशप्रत्यय-शालित्वादनित्यत्वमित्यर्थ''**[8] इति।

वैशेषिकनये तु यथा महत्या वीच्या क्षुद्रास्तरङ्गा जायन्ते। क्षुद्रेभ्यः क्षुद्रतमा। तेभ्योऽपि क्षुद्रतमा अनेन क्रमेण वलाभूमिपर्यन्तं तरङ्गा गच्छन्ति। तथा हि संयोगो विभागोत्पन्ना-च्छब्दात् सर्वदिक्षु वलयाकृता परिव्याप्तैका शब्दधारा जायते। कणादेन शब्दस्वरूपकथने सूत्रितम्, **'श्रोत्रग्रहणो योऽर्थः स शब्दः'** (वैशिषिकसूत्रम्, 2.2.21) इति। एतन्मते संयोगाद् विभागाद् शब्दाच्च शब्दनिष्पत्तिः। **'नित्यवैधर्म्यात्'** (वैशेषिकसूत्रम्, 2.2.27), **'अनित्यश्चायं कारणतः'** (वैशेषिकसूत्रम्, 2.2.28), **'लिङ्गाच्चानित्यः शब्दः'** (वैशेषिकसूत्रम्, 2.2.32), **'संप्रतिपत्तिभावाच्च'** (वैशेषिकसूत्रम्, 2.2.35) इत्यादिभिः सूत्रैः कणादेन शब्दस्य अनित्यत्वमपि प्रतिपादितम्।

### 1.2. मीमांसकनये शब्दस्वरूपम्

मीमांसकानां मते वर्णानामेव वाचकत्वमपि। किन्तु नैयायिकानां वर्णा यथा अनित्याः तथा एतेषां मते वर्णा अनित्या न। अपितु वर्णा ध्वनिव्यङ्ग्या नित्या विभव एकत्वसंख्या-वन्तश्च। **''अथ गौरित्यत्र कः शब्दः? वर्णा एव तु शब्दा इति भगवानुपवर्षः''**[9] इति शङ्करवचनात् वर्णानामेव शब्दत्वं मीमांसकैः स्वीकृतम् इति स्पष्टमेव उपपद्यते। गौः इत्यत्र उच्चारणे गकारौकारविसर्जनीयानाम् उच्चारणमेव शब्दत्वेन अभिधीयते। प्रकरणपञ्चिकायां प्रमाणपारायणनाम्नः षष्ठप्रकरणस्य शास्त्रपरिच्छेदनामके तृतीयपरिच्छेदे शालिकनाथमिश्रेणापि प्रोक्तम्, **''कः शब्दोऽभिमतः? वर्णाः, तेषां श्रोत्रग्राह्यत्वात्''**[10] इति। तथाहि शबरभाष्ये प्रोक्तम्, **''श्रोत्रग्रहणे ह्यर्थे लोके शब्दशब्दः प्रसिद्धः''**[11] इति। **''कण्ठताल्वाद्यभिघातानां श्रवणेन्द्रियविषयाणां वर्णानामेव शब्दत्वं वाचकत्वम्''**[12] इति मनोमयदयकारः। एतेषां मते श्रोत्रग्राह्यवस्तुन्येव शब्दशब्दः प्रसिद्धः। श्रोत्रग्राह्यश्च वर्ण एव भवति न तु स्फोटः। तस्मादेते स्फोटतत्त्वं नाङ्गीकुर्वन्ति। अतो वर्णात्मकशब्दा एव वाचकाः। स्फोटनामा कश्चित् वर्णातिरिक्तो वाचकः शब्दो नास्त्येव। शास्त्रदीपिकायां पार्थसारथिमिश्रेण निगदितम्, **''तस्माद् व्यञ्जकध्वनीनां क्रमेण व्यङ्ग्येषु**

**वर्णेषु समारोपितेन तद्वन्तः स्मर्यमाणा वर्णा वाचकाः, नान्यः शब्दोऽस्ति''**[13] इति। प्रत्यक्षो गकारादिभ्योऽन्यो गोशब्दो नास्ति। गकारादीनि हि प्रत्यक्षाणि। तस्माद् गौरिति गकारादिविसर्जनीयान्तपदम् अक्षराण्येव। अतः तेभ्यो व्यक्तिरिक्तमन्यत् पदं नामेति।

एतन्मते शब्दराशिभूतस्य वेदस्य नित्यत्वाद् अपौरुषेयत्वाच्च शब्दो नित्यः। वर्णात्मकशब्दस्यैव नित्यत्वम्। कारणं हि 'सोऽयं ककारः' इति प्रत्यभिज्ञया सुस्पष्टं भवति यत् ककारादिवर्णः तावत्कालपर्यन्तं स्थिरोऽस्ति। स्थिरत्वे सिद्धे 'तावत्कालं स्थिरं चैनं कः पश्चान्नाशयिष्यति इति न्यायेन वर्णात्मकशब्दस्य नित्यत्वं नितरां सिध्यति।

किञ्च कमलाकान्तकायकायिककान्तिकमनीयतादिपदेषु नानास्थलेषु युगवत् ककारादिवर्णः गगनवत् उपलभ्यते इति सर्वैः अनुभूयत एव। एकस्य ककारस्य विभुत्वं विना सर्वत्र उपलभ्यमानत्वात् ककारादेः विभुत्वं स्वीकरणीयम्।

अस्तु। ननु सर्वत्र उपलभ्यमानत्वात् ककारादिशब्दस्य बहुत्वमेव मन्यताम्, विभुत्वं कथमिति चेन्न। शब्दस्य बहुत्वस्वीकारे महद्गौरवं स्यात्। अतो लाघवाद् एकत्वमेव मन्तव्यम्। ककारादिघटितेषु सर्वेष्वपि पदेषु अनुभूयमानः ककार एक एव न तु नाना। एवमेव गकारादिवर्णेष्वपि ज्ञेयम्। नैयायिकानां मते शब्दस्य गुणत्वेऽपि मीमांसकनये शब्दो द्रव्यमेव। एवं निष्कर्षो यद्वर्णा एव शब्दाः। ते च नित्या द्रव्यरूपा विभवश्च। पदवाक्यानामपि वर्णसमुदायरूपत्वं प्रत्येकमेकत्वं नित्यत्वं विभुत्वं च बोध्यम्। अत एव महर्षिजैमिनिना, **'औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धस्तस्य ज्ञानमुपदेशोऽव्यतिरेकश्चार्थेऽनुपलब्धे तत्प्रमाणं बादारायणस्यानपेक्षत्वात्'** (मीमांसासूत्रम्, 1.1.5) इति सूत्रितम्। शबरेण भाष्ये भाषितम्, **''औत्पत्तिक इति नित्यं ब्रूमः। उत्पत्तिर्हि भाव उच्यते लक्षणया। अवियुक्तः शब्दार्थयोर्भावः सम्बन्धो नोत्पन्नयोः पश्चात्सम्बन्धः''**[14] इति। अतो वर्णसमुदायरूपाणि पदानि वाक्यानि च नित्यान्येव। अन्यथा वर्णपदवाक्यादीनामनित्यत्वे शब्दार्थसम्बन्धस्यापि अनित्यतापत्तिः।

### 1.3. अमरकोषे शब्दस्वरूपम्

अमरकोषे शब्दो द्विविधः स्वीकृतः। अमरकोषकृता प्रथमकाण्डे शब्दवर्गे **शास्त्रे शब्दस्तु वाचकः**[15] इत्यादिना शब्दस्य लक्षणं प्रस्तुतम्। तत्तु शास्त्रव्याकरणादौ यो वाचकः साधुः स शब्दः। भट्टोजिदीक्षितात्मजश्रीभानुदीक्षितेन सुधाख्यव्याख्यायामुक्तम्, **शास्त्रे व्याकरणादौ यो वाचकः साधुः स शब्दः एव निरुपपदेन शब्दशब्देन व्यवह्रियते**[16] इति। उक्तलक्षणे स्फोटात्मकः शब्दः स्वीकृतः। द्वितीयं ध्वनिः शब्द इति। एवमेव कुत्रचित् स्फोटात्मकः, ध्वन्यात्मकः, वर्णात्मकश्चेति। भिन्नभिन्नमतवादैः शब्दआलोचितः।

## 1.4. शाब्दिकनये शब्दस्वरूपम्

वाङ्मनसोः विशुद्धिकारकमिदं व्याकरणशास्त्रं स्वरूपतः द्विविधम्। शब्दस्य प्रायोगिकरूपनिर्णये प्रयोगसिद्धिरूपं व्याकरणम् इति। शब्दब्रह्मणः स्वरूपनिरूपणे दार्शनिकरूपं चेति। साधुशब्दप्रयोग एव व्याकरणस्य मूललक्ष्यम्। तेनैव साधुशब्देन लोकव्यवहारः सुशृङ्खलितो भवति। व्याकरणस्य प्रयोगसिद्धिविभागेन शुद्धस्य शब्दतत्त्वस्य ज्ञानमेव लभ्यते। समेषां व्याकरणशास्त्राणां प्रयोजनमिदमेवास्ति यत् प्रयुक्तभाषायाः साधुत्वविवेकः। व्याकरणेन लौकिकवैदिकशब्दानामनुशासनं क्रियते। अत एव पस्पशाह्निके महाभाष्यकृतोक्तम्, **''केषां शब्दानाम्? लौकिकानां वैदिकानां च''**[17] इति। ननु वैयाकरणरीत्या प्रतिपाद्यमानस्य शब्दस्य स्वरूपं किमिति पर्यालोच्यते।

### 1.4.1. सूत्रकृन्मते शब्दस्वरूपम्

यद्यपि पाणिनिना शब्दतः कुत्रचिदपि अष्टाध्याय्यां शब्दस्वरूपं न प्रतिपादितं तथापि **'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्'** (पाणिनिसूत्रम्, 1.2.45) इति सूत्रादनुमीयते पाणिनिना स्फोटात्मकः शब्दः प्रतिपादितः इति। यतो हि अनेनार्थविषयकबोधजनकं शब्दमुद्दिश्य प्रातिपदिकसंज्ञा विहिता। शब्देऽर्थविषयकबोधजनकत्वरूपशक्तेः अभावात् स्फोटात्मकं शब्दं विना उक्तसंज्ञाविधायकस्य सूत्रस्य व्यर्थतापत्तिः स्यात्। ननु शब्दस्य स्फोटात्मकत्व एव **'इको यणचि'** (पाणिनिसूत्रम्, 6.1.77) इत्यनेन सूत्रेण इकः स्थाने यणादेशः भवितुं नार्हति, स्फोटात्मकशब्दस्यैव स्वीकारात्। तस्मात् शास्त्रप्रक्रियानिर्वाहाय ध्वन्यात्मकः शब्दोऽपि पाणिनिना अङ्गीकृत इति मामकी मतिः। एतेन पाणिनिना शब्दस्य द्विविधत्वं स्वीकृतमिति स्पष्टं प्रतीयते।

### 1.4.2. वार्तिककारमते शब्दस्वरूपम्

उक्तानुक्तदुरुक्तानां विशिष्टः प्रवाचकः कात्यायनः शब्दस्य स्फोटरूपत्वं स्वीकरोति। 'सिद्धे शब्दार्थसम्बन्धे' इत्यनेन वार्तिकेन तेन स्फोटात्मकः शब्दः प्रतिपादितः। अत्र तु शब्दः इति शब्दः स्फोटरूपेऽर्थे प्रयुक्तः। अन्यथा शब्दस्य अनित्यत्वम् आपद्येत। **'स्वं रूपं शब्दस्याशब्दसंज्ञा'** (पाणिनिसू.,1.1.68) इति सूत्रस्य 'शब्देनार्थगतेरर्थस्यासम्भवात् तद्वाचिनः संज्ञाप्रतिषेधार्थं स्वरूपवचनम्', 'न वा शब्दपूर्वको ह्यर्थे सम्प्रत्ययस्तस्मादर्थनिवृत्तिः' चेति वार्तिकाभ्यां कात्यायनः शब्दस्य स्फोटात्मकत्वम् उररीकरोति। एतद्भिन्नस्य स्फोटातिरिक्तस्य शब्दस्य स्वीकारेऽर्थबोधसम्भवात् वार्तिकयोः अनुपपत्तिः भवेदिति अभिप्रायः। अत एव तेन एक एवाद्वितीयः स्फोटात्मकः शब्दः शास्त्रसिद्धान्तेन प्रतिपादितः।

### 1.4.3. महाभाष्यमते शब्दस्वरूपम्

भाष्यकृता शब्दस्वरूपं प्रतिपादयता प्रश्नः उपस्थापितः **''अथ गौरित्यत्र कः पदार्थः?''**[18] इति। तत्र भाष्यकारेण अनुभूयमानानां द्रव्यगुणक्रियाजातीत्यादीनां सर्वेषां शब्दत्वं निराकृत्य उपसंहारे शब्दस्य द्विविधं स्वरूपं प्रतिपादितम्। प्रस्तुतप्रश्नस्योत्तरे भाष्ये इदं दृश्यते, **''किं यत्तत् सास्नालाङ्गूलककुदखुरविषाण्यर्थरूपम्, स शब्दः। नेत्याह, द्रव्यं नाम तत्''**[19] इति। भिन्नेन्द्रियग्राह्यत्वाद् द्रव्यं शब्दो न भवितुमर्हति। यदि द्रव्यानुशासने विवक्षितम् अभविष्यत् 'अथ द्रव्यानुशासनम्' इत्येवावक्ष्यत्। क्रियायाः शब्दत्वं निराकुर्वन्नाह, **''किं यत्तर्हि तदिङ्गितं निमिषितम्, स शब्दः? नेत्याह, क्रिया नाम सा''**[20] इति। एवं गुणस्य शब्दत्वं निराकृतवान्, **''यत्तर्हि शुक्लो नीलः कपिलः कपोत इति, स शब्दः। नेत्याह। गुणो नाम सः''**[21] इति। अत्र शुक्लादिशब्दाः शुक्लत्वादिगुणमात्रपराः, द्रव्यस्य प्रागुपन्यासादिति बोध्यम्। जातेः शब्दत्वं निराकरोति, **''यत्तर्हि तद्भिन्नेष्वभिन्नं छिन्नेष्वच्छिन्नं सामान्यभूतम्, स शब्दः। नेत्याह, आकृतिर्नाम सा''**[22] इति। गोत्वादिकं न शब्द इति भावः।

एवं द्रव्यादीनां शब्दत्वं निराकृत्य अधोलिखितरीत्या द्विविधं शब्दत्वं प्रतिपादितम्, **''येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति स शब्दः''**[23] इति। अत्र **'उच्चारितेन' इत्यस्य प्रकाशितेन'**[24] इत्यर्थः। वर्णानामनित्यत्वात् तेषां समूहस्य कदाप्यभावेन तेषां वाचकत्वासम्भवात् पदत्वानुपपत्त्या वैयाकरणा वर्णातिरिक्तस्य पदस्य वाक्यस्य वा वाचकत्वमङ्गीकुर्वन्ति। न च पूर्वपूर्ववर्णानुभव-जन्यसंस्कारसहितान्त्यवर्णस्य न दोष इति न वाच्यम्, 'सरः', 'रसः', 'नदी', 'दीनः', इत्यादौ दोषापत्तेः। येन क्रमेणानुभवस्तेनैव स्मरणमिति निमयाभावाच्च। अतो वैयाकरणैः स्फोटः शब्दत्वेन अङ्गीक्रियते। तस्य द्विविधा व्युत्पत्तिः स्फुट्यते अभिव्यज्यते वर्णैरिति स्फोटः। ध्वनयो व्यञ्जकाः स्फोटस्तु तद्व्यङ्ग्य इति बोध्यम्। स्फुटति व्यक्तीभवति प्रकटीभवति अर्थो यस्मात् स स्फोटः। पक्षेऽस्मिन् स्फोट एवार्थबोधकः। एवञ्च गोरूपार्थवाचक एव शब्द इति तत्त्वम्। ननु स्फोटस्य भाष्येऽस्मिननुल्लेखाद् एवमर्थस्वीकारे किं बीजमिति चेद्, उत्तरभाष्यमेवात्र मानम्। तेन हि ध्वनेः शब्दत्वमुच्यते। ईदृशार्थाभावेऽस्यापि स एवार्थः स्यादित्येतस्य भाष्यस्य स्फोटपरत्वव्याख्याने बीजम्। अन्यथा अनन्वयापत्तिरिति।

नायं स्फोटरूपः शब्दः सर्वानुभवसिद्धः न वा शास्त्रक्रियोपयोगी। अत एव लोकप्रसिद्धं ध्वन्यात्मकं शब्दस्वरूपं प्रतिपादितं भाष्यकारेण, **''अथवा प्रतीतपदार्थको लोके ध्वनिः शब्द इत्युच्यते। तद्यथा, शब्दं कुरु, शब्दं मा कार्षीः, शब्दकार्ययं**

**माणवक इति ध्वनिं कुर्वन्नेवमुच्यते। तस्माद् ध्वनिः शब्दः''**[25] इति। अत्र द्वितीयस्वरूपे शब्दस्य प्रसिद्धार्थबोधकत्वरूपं प्रतिपादितम्। एवञ्च गौरित्यत्र अर्थसम्प्रत्यायकः प्रतीतपदार्थको ध्वनिरेव वा शब्दः न वाक्यादयः इति। प्रतिपादितञ्च तपरसूत्रभाष्यस्य 'भेर्याघातवान्' इति वार्तिके भाष्यकृता[26]–

**ध्वनिः स्फोटश्च शब्दानां ध्वनिस्तु खलु लक्ष्यते।**
**अल्पो महांश्च केषाञ्चिदुभयं तत्स्वभावतः॥** इति।

### 1.4.4. कैयटमते शब्दस्वरूपम्

स्फोटात्मको ध्वन्यात्मकः शब्दो द्विविध इति भाष्यप्रदीपे कैयटेन प्रतिपादितम्। ध्वनिः व्यञ्जकरूपेण स्फोटः व्यङ्ग्यरूपेण च परिभासमानं भवति इति मतं तेन तपरसूत्रभाष्ये व्याख्यानकाले प्रदीपे स्पष्टीकृतम्। प्रतिपादितं तेन, ''**ध्वनिः स्फोटश्चेति। व्यञ्जको व्यङ्ग्यश्चेत्यर्थः। शब्दानां व्यङ्ग्यानां सम्बन्धी व्यञ्जकत्वेन यो ध्वनिः स एव महानल्पश्च लक्ष्यते। व्यङ्ग्यस्त्वभिन्नकाल एवेत्यर्थः। उभयमिति। व्यङ्ग्यो व्यञ्जकश्च प्रमाणेन स्वभावतः स्वरूपेण सिद्धावित्यर्थः। केषाञ्चिदिति। व्यक्तानामुभयं गृह्यते, अव्यक्तानां तु ध्वनिरेव॥**''[27] इति। स्फोटस्य नादाभिव्यङ्ग्यत्वं शब्दस्वरूपव्याख्याप्रसङ्गे पस्पशायामपि वर्णितम्। उक्तञ्चानेन, ''**वैयाकरणाः वर्णव्यतिरिक्तस्य पदस्य वाक्यस्य वा वाचकत्वमिच्छन्ति। वर्णानां प्रत्येकं वाचकत्वे द्वितीयादिवर्णोच्चारणानर्थक्यप्रसङ्गात्। आनर्थक्ये तु प्रत्येकमुत्पत्तिपक्षे यौगपद्येनोत्पत्त्यभावात्, अभिव्यक्तिपक्षे तु क्रमेणैवाभिव्यक्त्या समुदायाभावात्। एकस्मृत्युपारूढानां वाचकत्वे 'सरः' 'रसः' इत्यादावर्थप्रतिपत्त्यविशेष-प्रसङ्गाद्व्यतिरिक्तः स्फोटो नादाभिव्यङ्ग्यो वाचकः विस्तरेण वाक्यपदीये व्यवस्थापितः''**[28] इति।

### 1.4.5. नागेशनये शब्दस्वरूपम्

वैयाकरणानां मतं स्वीकृत्य वैयाकरणचूडामणिना नागेशेनापि ध्वनिः स्फोटश्चेति द्विविधं शब्दस्वरूपं विशेषेण व्याख्यातम्। तन्नये लोके व्यवहर्तृषु पदार्थबोधकत्वेन प्रसिद्धः श्रवणेन्द्रियग्राह्यत्वाद् वर्णरूपध्वनिसमूहः शब्दः। तस्य अर्थबोधकतापि अविचारितरमणीयतैव लोके प्रसिद्धा तादृशस्यैव शास्त्रेणान्वाख्यानमिति तात्पर्यम्। ध्वनिपदेनात्र वैखरी वागुच्यते। स्फोटपदेन अभिव्यक्तैकत्वादेको मध्यभावस्य आन्तरः शब्द उच्यते। तपरसूत्रभाष्ये स्फोटस्य शब्दत्वेन ध्वनेस्तु शब्दगुणत्वेन प्रतिपादनं विद्यते। तस्य व्याख्यायां नागेशेन शङ्क्यते यद्, ''**ध्वनिरपि शब्दविशेषः स कथं शब्दगुण**''[29] इति। शब्दगुणो नाम शब्दस्य

गुण उपरञ्जकः, व्यञ्जकत्वेनेत्यर्थः। यथा घटः पुनः पुनर्दृश्यमानोऽपि न भेदमवलम्बते, तथा विलम्बितायां वृत्तावकार एव पुनः पुनरुपलभ्यते इति वृत्तिभेदेऽपि वर्णस्य भेदो न गृह्यते। नागेशेन प्रदीपकारकृतस्य व्यञ्जकत्वेन इत्यस्य स्फोटोपलब्धिप्रतिबन्धकस्तिमितवा-व्यपसरणद्वारा स्वधर्मरुषिततदुपलब्धिहेतुत्वेन ध्वनिः शब्दस्य गुणः इत्यर्थः प्रतिपादितः। अत्र ध्वनिः शब्दगुण इति ध्वनिशब्देन वैकृतध्वनिकृतम् उपलब्धिकालकृतमित्यर्थः।

### 1.4.6. वाक्यपदीये शब्दस्वरूपम्

यद्यपि 'वागेव विश्वा भुवनानि यज्ञे', 'ओमित्येतदक्षरमिदं सर्वम्', 'वाचो ह वाक्', इत्यादिश्रुतिषु वाचः ब्रह्मरूपतायाः अवधारणं कृतं तथापि व्याकरणदर्शने शब्दब्रह्मणः सुनिर्धारितं स्वरूपं भर्तृहरिरेव उपस्थापितवान्। यथैव ब्रह्म व्यापकं सर्वजगति परेषु तन्तुवद् वर्तते तथैव सर्वोऽपि प्रत्ययः शब्दानुगमनेन अनुविद्धं शब्दं विनार्थस्य कल्पनापि कर्तुमशक्या।

शब्दस्यास्यैव जगन्मूलकत्वम्। वाच्यवाचकरूपस्यास्य जगतः निबन्धनी वाच्यवाचिका-त्मिका शक्तिः शब्देष्वेवाश्रिता वर्तते। तथाहि निगदितम्–

**शब्देष्वाश्रिता शक्तिर्विश्वस्यास्य निबन्धनी।**

**यन्नेत्रः प्रतिभाऽत्माऽयं भेदरूपः प्रतीयते॥** इति। (वाक्यपदीयम्, 1.118)

व्यापकदृष्ट्या शब्दस्य ब्रह्मरूपता प्रसिद्धा। न केवलं व्यापकतादृष्ट्या अपि तु ''एकमेवाद्वितीयं ब्रह्म'' इति ब्रह्मलक्षणान्यपि शब्दे सङ्घटन्ते। ब्रह्म एकमपि शक्तीनां विस्ताराद् अनन्तरूपेण विपरिणमते। तथैव शब्दः एकोऽपि उपाधीनामाश्रयादनन्तरूपेण प्रतिपद्यते। तदुक्तम्,

**एकमेव यदाम्नातं भिन्नशक्तिं व्यपाश्रयात्।**

**अपृथक्त्वेऽपि शक्तिभ्यः पृथक्त्वेनैव वर्तते॥** इति।(वाक्यपदीयम्, 1.2)

किञ्च शब्दस्यैव कालशक्तिमाश्रित्य जायतेऽस्ति विपरिणमते वर्धतेऽपक्षीयते विनश्यतीति निरुक्तोक्ताः षड् भावविकाराः जायन्ते इत्यपि भर्तृहरिणा प्रतिपादितम्–

**अध्याहितकलां यस्य कालशक्तिमुपाश्रिताः।**

**जन्मादयो विकारा षड् भावभेदस्य योनयः॥** इति। (वाक्यपदीयम्, 1.3)

अद्वैतवेदान्ते चिरप्रसिद्धब्रह्मतत्त्वेन वैयाकरणोक्तशब्दतत्त्वं समानतामेति। भर्तृहरिः संसारोऽयं शब्दस्य परिणाम इत्यपि स्वीचकार। उक्तञ्च वाक्यपदीये ब्रह्मकाण्डे–

**शब्दस्य परिणामोऽयमित्याम्नायविदो विदुः।**

**छन्देभ्य एव प्रथममेतद्विश्वं व्यवर्तत॥** इति। (वाक्यपदीयम्, 1.120)

शब्दस्वरूपोत्पत्तौ भर्तृहरिणा मतत्रयं प्रदर्शितम्। वायुः शब्दस्वरूपमापद्यते इति प्रप्रथमं मतम्। वक्ता हि यदा उच्चारयितुमिच्छया प्रयतते तदा तस्य हृद्गतवायुः उच्चारणानुकूलक्रियावत्तां लभते। लब्धक्रियश्च स ऊर्द्ध्वमुच्चरन् तेषु तेषु उच्चारणस्थानेषु कण्ठताल्वादिषु अभिहन्यते। अनेनैव अभिघातेन वायुः शब्दत्वं लभते। उक्तं हि तेन–

**लब्धक्रियप्रयत्नेन वक्तुरिच्छानुवर्तिना।**

**स्थानेष्वभिहितो वायुः शब्दत्वं प्रतिपाद्यते॥** इति। (वाक्यपदीयम्, 1.108)

अणवः शब्दत्वमापद्यते इति द्वितीयम्। अणवः सर्वशक्तित्वात् भेदसंसर्गवृत्तयो भवन्ति। भेदो विभजनं, संसर्गः सङ्घीभवनम्, तादृशी वृत्तिः व्यवहारो येषां ते तथाभूता भवन्ति। अत एव छायातपतमःशब्दभावेन ते परिणामिनः परिणामविशिष्टा भवन्ति। अर्थात्ते एव छायारूपेण, तमोरूपेण, शब्दरूपेण च परिवर्तिताः भवन्तीति। तथाहि वाक्यपदीये–

**अणवः सर्वशक्तित्वात् भेदसंसर्गवृत्तयः।**

**छायातपतमःशब्दभावेन परिणामिनः॥** इति। (वाक्यपदीयम्, 1.110)

तृतीयञ्च ज्ञानं शब्दरूपेण प्रकाशं लभते इति। ज्ञानं नाम पदार्थानां दृष्टश्रुतानुभूतौ बोधः। स एव व्यक्तः शब्दतां यातीति भर्तृहरेराशयः। ज्ञानस्य शब्दत्वापत्तिविषये विस्तृतम् आलोचनं दृश्यते। तदुक्तं तेन–

**अथायमान्तरो ज्ञाता सूक्ष्मे वागात्मनि स्थितः।**

**व्यक्तये स्वस्य रूपस्य शब्दत्वेन विवर्तते॥** इति। (वाक्यपदीयम्, 1.112)

सूक्ष्मे वाक्स्वरूपे स्थित आन्तरो ज्ञाता ज्ञानाश्रयः, स्वरूपस्य स्वस्याकारस्य व्यक्तये शब्दत्वेन विवर्तते। अत्र ज्ञाता नाम ज्ञानाश्रयः। ज्ञानं च इन्द्रियसन्निकर्षजन्यबोधः। स च बोधः अन्तःकरणम् आश्रयते। अन्तःकरणं च मनोबुद्धिचित्ताहंकारभेदेन चतुर्धा। तेषु बुद्धावेव बोधस्तिष्ठति। स चायमान्तरो ज्ञाता बुद्धिस्थः स्फोटरूप एव। बुद्धिस्थः शब्द एव श्रुतिरूपाणां शब्दानां कारणम्। बुद्धिस्थस्फोटस्य अभिव्यक्तिस्तु ध्वनिरूपेण शब्देन एव जायते। एवंरूपेण ज्ञानस्य शब्दत्वपक्षे आन्तरः शब्दः स्फोटरूपः बाह्यः ध्वनिरूपश्चेति शब्दरूपस्य भेदद्वयं स्पष्टमेव प्रतिपादितं भर्तृहरिणा–

**द्वावुपादानशब्देषु शब्दौ शब्दविदो विदुः।**

**एको निमित्तं शब्दानामपरोऽर्थे प्रयुज्यते॥** इति। (वाक्यपदीयम्, 1.44)

**2. शब्दनित्यत्वविचारः**

शाब्दिकास्तु शब्दनित्यत्ववादिनः। वैयाकरणाः नादेन ध्वनिना वा अभिव्यङ्ग्यः स्फोटः नित्य इति स्वीकृतः। प्रदीपोद्योते नागेशेन स्फोटस्य नित्यत्वं प्रतिपादितम्, **''अतो नित्यमतिरिक्तं स्फोटमादाय समाधत्ते भाष्ये, एवं तर्हीति॥ अत्रेति। भाष्ये इत्यर्थः॥ स च नित्यः इति।''**[30] इति। वैयाकरणैः स्फोटस्य अष्टविधत्वमङ्गीकृतम्। ते च, वर्णस्फोटः, पदस्फोटः, वाक्यस्फोटः, वर्णजातिस्फोटः, पदजातिस्फोटः, वाक्यजातिस्फोटः, अखण्डपदस्फोटः, अखण्डवाक्यस्फोटश्चेति। अष्टविधेषु स्फोटेषु अखण्डवाक्यस्फोटः अखण्डवाक्यजातिस्फोटः वा स नित्यः।

**नित्याः शब्दार्थसम्बन्धाः समाम्नाता महर्षिभिः।**

**सूत्राणां सानुतन्त्राणां भाष्याणाञ्च प्रणेतृभिः॥** (वाक्यपदीयम्, 1.23)

इत्यादिवाक्यैः भर्तृहरिणा सूत्रवार्तिकभाष्यकारमते स्फोटरूपशब्दस्य नित्यत्वम् उपवर्णितम्। नित्यत्वे 'तदशिष्यं संज्ञाप्रमाणत्वात्' (पाणिनिसूत्रम्, 1.2.53) इति सूत्रं, **'सिद्धे शब्दार्थसम्बन्धे'**[31], **'सिद्धन्तु नित्यशब्दत्वात्'**[32] इत्यादिवार्तिकवचनानि, **'संग्रह एतत्प्राधान्येन परीक्षितं नित्यः शब्दः'**[33], **'नित्येषु शब्देषु कूटस्थैरविचालिभिर्वर्णैः भवितव्यमनपायोपजनविकारादिभिः'**[34], **'ध्रुवं कूटस्थमविचाल्यपायोपजनविकार्यनुत्पत्त्यबुद्ध्यव्ययोगि यत्तन्नित्यम् इति। तदपि नित्यं यस्मिंस्तत्त्वं न विहन्यते'**[35] इत्यादिमहाभाष्यवचनानि शाब्दिकैः प्रमाणत्वेन उपन्यस्यन्ते।

नित्यत्वादेव शब्दतत्त्वं सर्वपरिकल्पातीततत्त्वं भेदसंसर्गसमतिक्रमेण समाविष्टं सर्वाभिः शक्तिभिः विद्याविद्याप्रविभागरूपम् अप्रविभागं कालभेददर्शनाभ्यासेन मूर्तिविभागभावनया च व्यवहारानुपपत्तिभिर्धर्माधर्मैः सर्वास्ववस्थासु अनाश्रितादिनिधनं ब्रह्मेति प्रतिज्ञायते। तदुक्तं भर्तृहरिणा–

**अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।**

**विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः॥** इति। (वाक्यपदीयम्, 1.1)

ननु शब्दोऽनित्यः अभिव्यङ्ग्यत्वात् दीपाभिव्यक्तेः घटादिवद् इत्यादिरूपेण अनुमित्या शब्दस्य अनित्यत्वमेव। अत्रोच्यते अनित्यानामेव अभिव्यक्तिर्भवति, न तु नित्यानामिति नास्ति नियमः। नित्यानामपि भवत्येवाभिव्यक्तिः। तथाहि घटत्वपटत्वादिजातीनामपि अभिव्यक्तिर्भवति। परन्तु न तु घटत्वादिकम् अनित्यम्। तस्माद् यत्र यत्र अभिव्यक्तत्वं तत्र तत्र अनित्यत्वमिति व्याप्तेरभावात् शब्दो न अनित्यः। शब्दनित्यत्वविषये शान्तिपर्वणि महाभारतकृता उक्तम्–

**अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा।**
**आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः॥** इति।

(महाभारतम्, 12.224-55)

शब्दस्य नित्यत्वे निरुक्तकारोऽपि प्रमाणम्। शब्दानित्यत्वे औदुम्बरायणमतखण्डनकाले तेन प्रतिपादितं यच्छब्दस्यानित्यत्वे 'चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्च' इति विभागः नोपपद्यते।[36] किञ्च शास्त्रदृष्टः योगः शब्दस्य शब्दान्तरेण सम्बन्धः। तद्यथोपसर्गस्य धातुना, धातोः प्रत्ययेन, प्रत्ययस्य च लोपागमवर्णविकारैः। सोऽपि वचननित्यत्वात् नोपपद्यते। भर्तृहरिणा संसर्गानित्यता, विपरिणामानित्यता, वस्तुविनाशानित्यता इति त्रिविधानित्यता प्रतिपादिता। अनित्यतात्रयस्य अभावाच्छब्दो नित्यः।

### 3. उपसंहृतिः

'शब्दतत्त्वविमर्शः' इत्यभिधे लेखेऽस्मिन् प्रप्रथमं नैयायिकमते शब्दस्वरूपं पर्यालोचितम्। तदुत्तरं मीमांसकानां शब्दतत्त्वं प्रतिपाद्य प्रतिपाद्यं वस्तुतत्त्वं प्रतिपादयितुमनसा शब्दिकानां शब्दतत्त्वम् उपन्यस्तम्। शाब्दिकमते शब्दः द्विविधिः। ध्वनिरूपोऽनित्यः, स्फोटरूपश्च नित्यः। शब्दव्यवहारः कदाप्रभृत्यारब्धः कदा वा समाप्तिमेष्यतीति केनापि वक्तुम् अशक्यत्वात् स्फोटात्मकशब्दस्य नित्यत्वमेव। ऋग्वेदसंहितायां शब्दस्य अवस्थाचतुष्टयं वर्णितं, 'परा पश्यन्ती मध्यमा वैखरी' इति। तथा हि–

**चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्रह्मणा ये मनीषिणः।**
**गुहा त्रीणि नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति॥** इति।

(ऋग्वेदः, 1.164-65)

चतुर्विधासु वाक्षु परां पश्यन्तीं मध्यमां च साधारणमनुष्याः न प्रकाशयितुं समर्थाः। तुरीयं वैखरीरूपां वाचं मनुष्या वदन्ति। व्यक्ताव्यक्तभेदेन वाक् द्विविधा। व्यक्ता मनुष्याणाम्, अव्यक्ता मनुष्येतराणाम्। परा पश्यन्ती मध्यमा इति त्रिविधा वागव्यक्ता। चतुर्थी वाक् वैखरी व्यक्तरूपा। सूक्ष्मा सूक्ष्मतरा सूक्ष्मतमा इति भेदेनापि वाक् त्रिधा भिद्यते। परा पश्यन्ती मध्यमा इति नामान्तराणि। वाक्यपदीयकृता तु पश्यन्ती, मध्यमा, वैखरी इति त्रिविधा एव वाक् स्वीकृता। पश्यन्त्येव सूक्ष्मत्वेन परा वाक्। तथा हि प्रोक्तम्–

**वैखर्या मध्यमायाश्च पश्यन्त्याश्चैतदद्भुतम्।**
**अनेकतीर्थभेदायाः त्रय्या वाचः परं पदम्॥** इति। (वाक्यपदीयम्, 1.133)

शुद्धाशुद्धभेदन शब्दोऽपि द्विधा। केचन शब्दाः शुद्धाः केचन अशुद्धाश्च।

कृतविद्येभ्यो विद्वद्भ्यो गुरुशिष्यपरम्परया प्रवहन्तः शास्त्राद्ये शब्दाः स्वीकृतास्ते हि शुद्धाः, अवशिष्टा अशिष्टजनेभ्य आगता आगमेनास्वीकृता अपभ्रंशाः शब्दा अशुद्धाः। उपादानानुपादानभेदेन पुनः शब्दो द्विधा विभक्तः। उपादानो नाम अर्थस्य वाचकः। यन्मनुष्यवाग्रूपः शब्दः उपादानः, अवाग्रूपश्च शब्दोऽनुपादानः ध्वनिः। द्वयोरपि शब्दत्वं महाभाष्यकृता समर्थितम्।

केषाञ्चिद् आधुनिकवैयाकरणानां मते व्याकरणे शब्दः त्रिधा विभक्तो दृश्यते, अनुपहितः,ध्वन्युपहितः, उपाधिभूतश्च इति। तत्र परारूपः शब्दोऽनुपहितः, स्फोटशब्दः ध्वन्युपहितः, ध्वनिरूपशब्दः उपाधिभूतश्च वर्तते। यद्यपि विषयेऽस्मिन् 'आ परितोषाद्विदुषां न साधु मन्ये प्रयोगविज्ञानम्' इति कविताकामिनीविलासकालिदासवचः स्मारं स्मारं तथा नामं नामं नीरक्षीरविषयविनिश्चयकुशलाः सहृदयहृदया एवात्र प्रमाणमिति कृतं पल्लवितेनेति शम्।

**

**सन्दर्भाः–**


1. न्यायबोधिनी, शब्दपरिच्छेदः, पृ.241
2. तर्कसंग्रहः, शब्दनिरूपणम्, पृ.112
3. तत्रैव, पृ.114
4. तत्रैव, पृ.114
5. न्यायसिद्धान्तमुक्तावली, कारिका, 164-165
6. न्यायसिद्धान्तमुक्तावली, कारिका, 165-166
7. किरणावली, पृ.498
8. तत्रैव, पृ.449
9. शाङ्करभाष्यम्, 1.4.28
10. प्रकरणपञ्चिका, 6.3
11. शाबरभाष्यम्, 1.1.5
12. मानमयोदये प्रथमप्रकरणम् (द्रव्यनिरूपणम्)।
13. शास्त्रदीपिका, 1.1.5
14. शाबरभाष्यम्, 1.1.5
15. अमरकोषः, प्रथमं काण्डम्, शब्दादिवर्गः, श्लो.2

16. अमरकोषः, प्रथमं काण्डम्, शब्दादिवर्गः, पृ.63
17. महाभाष्यम् , पस्पशाह्निकम्, पृ.9-10
18. महाभाष्यम् , पस्पशाह्निकम्, पृ.12
19. तत्रैव, पृ.14
20. तत्रैव, पृ.15-16
21. तत्रैव, पृ.16
22. तत्रैव, पृ.16
23. तत्रैव, पृ.17
24. तत्रैव, भाष्यप्रदीपे
25. तत्रैव, पृ.19
26. तत्रैव, तपरसूत्रभाष्यम्, पृ.564
27. तत्रैव, भाष्यप्रदीपे, पृ.564
28. तत्रैव, पृ.17
29. तपरसूत्रभाष्यम् , प्रदीपोद्द्योतः, पृ.564
30. तत्रैव, पृ.564
31. महाभाष्यम्, पस्पशाह्निकम्, पृ.59
32. तत्रैव, वृद्धिरादैच्, पृ.167
33. तत्रैव, पस्पशाह्निकम्, पृ.58
34. तत्रैव, दाधा घ्वदाप्, पृ.289
35. तत्रैव, पृ.63-64
36. तत्र चतुष्ट्वं नोपपद्यते। अयुगपदुत्पन्नानां वा शब्दानामितरेतरोपदेशः। शास्त्रकृतो योगश्च। इति निरुक्तम्, पृ.56

**

## किञ्चिद् रामायणीयम्

**वनगमनप्रसङ्गं श्रुत्वा श्रीरामस्य क्रियाः प्रतिकियाश्च–**

- अहं हि वचनाद् राज्ञः **पतेय**मपि पावके।
- **भक्षयेयं** विषं तीक्ष्णं **पतेय**मपि चार्णवे। अयो.18.28-29
- तद् ब्रूहि वचनं देवि राज्ञो यदभिकाङ्क्षितम्।
- **करिष्ये प्रतिजाने** च रामो **द्विर्नाभिभाषते।**। अयो.18.30
- एवमस्तु **गमिष्यामि** वनं **वस्तु**महं त्वितः।
  जटाचीरधरो राज्ञः प्रतिज्ञा**मनुपालयन्**।। अयो.19.2
- दण्डकारण्यमेषोऽहं **गच्छाम्येव** हि सत्वरः।
  **अविचार्य** पितुर्वाक्यं समा **वस्तुं** चतुर्दश।। अयो.19.11
- आभिषचनिकं भाण्डं **कृत्वा** रामः प्रदक्षिणम्।
  शनै**र्जगाम** सापेक्षो दृष्टिं तत्रा**विचालयन्।।** अयो.19.31
- न चास्य महतीं लक्ष्मीं राज्य**नाशोऽपकर्षति।**
  लोककान्तस्य कान्तत्वाच्छीतरश्मेरिव क्षयः।। अयो.19.32
- **न** वनं गन्तुकामस्य **त्यजतश्च** वसुन्धराम्।
  सर्वलोकातिगस्येव **लक्ष्यते** चित्तविक्रिया।। अयो.19.33
- सर्वोऽप्यभिजनः श्रीमान् श्रीमतः सत्यवादिनः।
  **नालक्षयत** रामस्य किंचिदाकारमानने।। अयो.19.36
- उचितं च महाबाहुर्न **जहौ** हर्षमात्मवान्। अयो.19.37
- वाचा मधुरया रामः सर्वं **सम्मानय**ञ्जनम्। अयो.19.38
- न चैव रामोऽत्र **जगाम** विक्रियां।। अयो.19.40

# फार्म - ४

**नियमः ८ द्रष्टव्यः**

| | | | |
|---|---|---|---|
| 1. | प्रकाशनस्थानम् | : | आरा (विहारः) |
| 2. | प्रकाशनस्य अवधिः | : | अर्धवार्षिकम् |
| 3. | मुद्रकस्य नाम | : | प्रो. गोपबन्धु मिश्रः |
| | किमसौ भारतस्य नागरिकः? | : | एवम् |
| | सङ्केतः | : | संस्कृतप्रसारपरिषद्, आरा |
| 4. | प्रकाशकस्य नाम | : | प्रो. गोपबन्धु मिश्रः |
| | किमसौ भारतस्य नागरिकः? | : | एवम् |
| | सङ्केतः | : | संस्कृतप्रसारपरिषद्, मौलाबाग आरा (विहारः) |
| 5. | सम्पादकस्य नाम | : | प्रो. गोपबन्धु मिश्रः |
| | किमसौ भारतस्य नागरिकः? | : | एवम् |
| | सङ्केतः | : | संस्कृतप्रसारपरिषद्, मौलाबाग आरा (विहारः) |
| 6. | तेषां जनानां नामानि सङ्केताश्च ये समाचारपत्रस्य स्वामिनः स्युः तथा च ये समस्तव्ययस्य एकप्रतिशतात् अधिकस्य अंशग्राहकाः स्युः | : | संस्कृतप्रसारपरिषद्, मौलाबाग आरा (विहारः) |

अहं गोपबन्धु मिश्रः एतद्द्वारा उद्घोषयामि यत् मम अधिकतमस्य बोधस्य विश्वासस्य च अनुसारेण उपरि प्रदत्तं विवरणं सत्यम् अस्ति।

**ह. गोपबन्धु मिश्रः**
सम्पादकः

## संस्कृतप्रसारपरिषद्, आरा

### प्रकाशनम्

1. मेघदूतम् (सभूमिका-हिन्दीपद्यानुवादसहितम्)
   - स्व. पण्डित कमलाकान्त उपाध्यायः
   15 रूप्यकाणि
2. भोजपुरी नीतिसतक (भर्तृहरि 'नीतिशतक'स्य भोजपुरी-पद्यानुवादः)
   -श्री देवकुमार मिश्रः 'अलमस्त'
   15 रूप्यकाणि
3. पण्डित दीनदयाल उपाध्याय के 'एकात्ममानवदर्शन' की मीमांसा
   - श्री नर्मदेश्वर ओझा
   15 रूप्यकाणि
4. माण्डूक्योपनिषद्-'नलिन-भाष्य' - पं. जगदीश्वर प्रसाद मिश्र 'नलिन'
   35 रूप्यकाणि
5. भरतचरितम् (महाकाव्यम्) - स्व. भवानीदत्त शर्मा
   51 रूप्यकाणि
6. राष्ट्रियता : सांस्कृतिक अवधारणा - श्री नर्मदेश्वर ओझा
   51 रूप्यकाणि
7. संस्कृतनिबन्धसञ्चयनम् - पं. व्रजभूषण मिश्र 'आक्रान्तः'
   41 रूप्यकाणि
8. ईशावास्योपनिषद् एवं केनोपनिषद्-'नलिन-भाष्य'
   - श्री जगदीश्वर प्रसाद मिश्र 'नलिन'
   51 रूप्यकाणि
9. आध्यात्मिकनिबन्धसंग्रह - श्री जगदीश्वर प्रसाद मिश्र 'नलिन'
   51 रूप्यकाणि
10. उपेन्द्रविज्ञानदर्शनम् (वेदान्तग्रन्थः) - स्व. पं. उपेन्द्रनारायणदत्त शर्मा
    41 रूप्यकाणि
11. भावनाविलासशतकम् - स्व. पं. उपेन्द्रनारायणदत्त शर्मा
    21 रूप्यकाणि
12. हनुमच्चरितम् - स्व. पं. व्रजभूषणमिश्र 'आक्रान्तः'
    51 रूप्यकाणि
13. उपनिषदों की भूमिका - पं. जगदीश्वर प्रसाद मिश्र 'नलिन'
    51 रूप्यकाणि
14. महाभारतसारसंग्रहः (प्रकाश्यः) - स्व. पण्डित वचन मिश्रः
15. चरितरत्नत्रयी - स्व. पं. व्रजभूषणमिश्र 'आक्रान्तः'
    51 रूप्यकाणि
16. जगन्नाथचरितम् - डॉ. बनमाली बिश्वालः
    60 रूप्यकाणि
17. कृत्-प्रत्ययविश्लेषण - डॉ. गोपबन्धु मिश्रः
    204 रूप्यकाणि